प्रद्युम्नानन्दीयनाटकसमीक्षा

सम्पादकः
डा. के. राजगोपालन्
उपाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

रचयिता
डा. पठान् वलि साहेब्
संस्कृतातिथ्यध्यापकः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

प्रकाशकः
श्रीवनमाली प्रकाशनम्
तिरुपति – ५१७ ५०१
आन्ध्रप्रदेशः
२०१५

प्रद्युम्नानन्दीयनाटकसमीक्षा

सम्पादकः : **डा. के. राजगोपालन्**
उपाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति

रचयिता : **डा. पठान् वलि साहेब्**
संस्कृतातिथ्यध्यापकः, आधुनिकविद्याविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः
Phone : 88851 61850

प्रथममुद्रणम् : २०१५
प्रतिलिपयः : ५००
मूल्यम् : रू.२००/-
ISBN : 978-93-5281-359-9
Barcode :

प्रकाशकः : **श्रीवनमाली प्रकाशनम्**
तिरुपति - ५१७ ५०१, आन्ध्रप्रदेशः। भारतदेशः।

प्राप्तिसङ्केतः : **डा. पठान् महम्मद् वलि खान्**
गृहसङ्ख्या - ४-४-५४२, रामकृष्णडीलक्स् समीपे,
नेहूनगर्, तिरुपति - ५१७ ५०७, आन्ध्रप्रदेशः।
दूरवाणी - ८८८५१६१८५०
Email: mahammadvalipathan@gmail.com

टङ्कणं पुटनिर्माणञ्च : **पठान् महम्मद् वलि,** वैदनग्रामः, बल्लिकुरवमण्डलम्, प्रकाशम् जिल्ला,
आन्ध्रप्रदेशः - ५२३ ३०३

मुद्रणालयः : प्रजाशक्तिदैनिकमुद्रणालयः, रेणिगुण्टमार्गः, तिरुपति।
दूरवाणी - ०८७७-२२१९९७, १९९८

ISBN : 978-93-5281-359-9

PRADYUMNĀNANDĪYANĀṬAKASAMĪKṢĀ

Editor

Dr. K. Rajagopalan
Associate Professor, Dept. of Sahitya
Rashtriya Sanskrit Vidyapeetha, Tirupati

Author

Dr. Pathan Vali Saheb
Guest Lecturer in Sanskrit
Sri Venkateswara Vedic University, Tirupati

SRI VANAMALI PUBLICATIONS

TIRUPATI - 517 501

Andhra Pradesh

2015

PRADYUMNĀNANDĪYANĀṬAKASAMĪKṢĀ

Editor : **Dr. K. Rajagopalan**
Associate Professor
Dept. of Sahitya
Rashtriya Sanskrit Vidyapeetha, Tirupati - 517 507

Author : **Dr. Pathan Vali Saheb**
Guest Lecturer in Sanskrit
Sri Venkateswara Vedic University, Tirupati - 517 502
Phone : 88851 61850

First Edition : **2015**
Total Pages : **xxii + 232 = 254**
Copies : **500**
Price : **Rs.225/-**
ISBN : **978-93-5281-359-9**
Barcode :
9 789352 813599 >

Published by : **Sri Vanamali Publications**
Tirupati - 517 501 A.P. INDIA

Available Address : **Pathan Mahammad Vali Khan**
Door No. 4-4-542/H4,
Near Ramakrishna Delux Circle,
Nehru Nagar, Tirupati - 517 501 A.P.
Email: mahammadvalipathan@gmail.com

DTP & Page Setting :
Pathan Mahammad Vali, Vaidana Post, Ballikurava Mandal,
Prakasam District, Pin - 523303

Printed at : Praja Sakti Daily Printing Press, Tirupati. PH: 0877-2271997, 1998

।। श्रीः ।।

सम्पादकनिवेदनम्

रति-प्रद्युम्नयोः प्रणयवृत्तान्तः, प्रद्युम्नेन कृतः शम्बरासुरवधश्च एतदुभयविषयककथावर्णनं **भागवत-हरिवंश-विष्णुपुराणेषु महाभारते** च उपलभ्यते । प्रकृतं **प्रद्युम्नानन्दीयनाटकम्** तत्तत्पुराणकथाम् आश्रित्य विरचितमिति ज्ञायते। नाटकेऽस्मिन् प्रतिपादितमिति वृत्तं सङ्ग्रहेण प्रदीयते —

तत्र प्रथमाङ्के -

पुरा किल घोरे तपसि वर्तमानश्शिवः निजतपोविघ्नप्रवृत्तं कामं फालनेत्राग्निना दग्ध्वा तद्विरहखिन्नाया रतेस्तपसा तोषितस्सन् ऋक्षवन्तनगराधीशस्य मायाविनश्शम्बरस्य निग्रहार्थं श्रीकृष्णद्रुक्मिण्यां प्रद्युम्ननाम्ना जन्मान्तरं प्राप्तेन प्रियेण समागमिष्यसि तावत्तद्गृहे मायावतीरूपेण पाकशालाधिकारं प्राप्य मदुपदिष्टमायाविद्यया निजपातिव्रत्यं रक्षन्ती तिष्ठेत्यादिदेश।। -।।

ततश्शम्बरश्श्रीकृष्णोत्पन्नप्रद्युम्नेनात्मवधमाकलय्य जननषष्ठदिने तमपहृत्य समुद्रे पातयामास। तत्र तं मीनोऽगिलत्। तस्मिन्नितरमीनैस्सह धीवरेणानायेन गृहीत्वा शम्बराय समर्पिते सूदैः खण्डितेऽन्तर्बालकमालोक्य विस्मयमाना मायावती मदुपदेशेन तमेव स्वपतिमाकलय्य तद्रक्षणार्थं प्रियसखीमुखेन दर्भकमुन्याश्रमं निनाय।। -।।

ततस्तस्मादेव गृहीतविद्यं प्राप्तयौवनं प्रद्युम्नमहमेव मायावत्या उद्बोध्य भृगुमद्गिरितटे वनसौभाग्यविलोकनाय विदूषकसहायः प्रद्युम्नो निर्जगाम। त्वमपि मायया शम्बरं विमोह्य तत्रत्यं मञ्जुदुज्जीवनाभिधानं सरोवरं गच्छेत्युपादिशमिति नारदः पर्वतमुनये जगाद।

अथ तत्र स्नातानां मायावत्यादीनां दर्शनेन सानुरागः प्रद्युम्नः परस्परसल्लापे तत्सखी-वर्णितमात्मनो रतेष्टा दाम्पत्यं निराकरोत्। ततः खिन्ना मायावती तस्माद्देशादपससार। ततः पश्चात्तापी प्रद्युम्नोऽपि विदूषकेण सह दर्भकमुन्याश्रमं प्रति जगामेत्यादि वर्णितम्।।

द्वितीयाङ्के -

अथ मायावती प्रद्युम्नवृत्तान्तपरिज्ञानाय महेन्द्रप्रेषितदूतमुखेन मायावतीविरहावस्थां विज्ञाय सोमश्रवानाम मुनिरेत्य मायावतीमाश्वास्य प्रद्युम्नस्य जन्मान्तरसंस्कारोद्बोधनाय सालग्रामाचलस्थपुष्करारण्यस्थितोद्बोधननामकतीर्थप्रवेशनं मायया कारयितव्यमित्यादिदेशेत्यादि प्रतिपादितम्।

तृतीयाङ्के -

ततो मायावती प्रयुक्ता मायाशार्दूलरूपमाश्रित्य दर्भकाश्रमं प्रविश्य स्ववधार्थमुद्युक्तं प्रद्युम्नमुद्बोधनसरस्समीपं निनाय। स च तज्जलपानानन्तरं जन्मान्तरसंस्कारोद्बोधेन पूर्वं स्वतः प्राप्तमायावतीनिराकरणजातपश्चात्तापेन तत्र तत्रोन्मत्तवत्परिभ्रमन् माधवीमण्डपस्थां तां दृष्ट्वा स्वाज्ञाननिवेदनपूर्वकमुपलालयन् समागम्य तात्कालिकयुद्धार्भटीश्रवणखिन्नां तां समाश्वास्य विमुच्ययुद्धोद्योगाय विदूषकेण सह दर्भकाश्रमं विवेशेत्युक्तम्।।

चतुर्थाङ्के -

शम्बरोऽपि जरानिर्विण्णकञ्चुकिवचनेन युद्धे प्रद्युम्नशक्तिमवधायास्थाने मन्त्रिभिर्मन्त्रयन् चित्रसेनादिपुत्रशतं योद्धुकामं प्रस्थाप्य ततस्तद्वधश्रवणदुःखमनुभवन् मन्त्रिप्रार्थनया तानपि योद्धुमनुमोदयन् स्वयमपि रथमारुह्य युद्धे प्रद्युम्नेन सह विवदमानस्तच्छरप्रहारजर्जरशरीरो मुमूर्छ। तदानीं प्रद्युम्नोऽपि विश्रमार्थं रथेन समीपारामं प्रविश्य तत्र मायावतीमालिङ्गन् मध्ये युद्धार्भटीसमाकर्णनभीतां तामाश्वास्य रथेन युद्धभूमिं प्राप्य सेनां निरस्य नारायणास्त्रेण शम्बरासुरमवधीदिति कथितम्।।

पञ्चमाङ्के -

अनन्तरं प्रद्युम्नो विदूषकमायावती तत्सखीजनैस्सह द्वारकां गन्तुं मातलिसनाथं रथमधिरुह्य युद्धभूमिं प्रदर्श्य उद्बोधनसरः प्रभावमनुवर्ण्य, रामसेतु-ताम्रपर्णीनद्यगस्त्याश्रम-श्रीरङ्गक्षेत्र-चोलदेश-पिनाकिनीनदी-काञ्चीनगर-शेषाद्रि-गोदावर्यार्यावर्त-काशीक्षेत्र-यमुनानदी-समुद्रादिदर्शन-तन्माहात्म्यश्रवणसमुदितमानसो द्वारकासमीपमेत्य श्रीकृष्णप्रहितदूतवचनेनातीवमातापितृसन्दर्शनसमुत्सुकोऽभूदित्यभिहितम्।।

षष्ठाङ्के -

तदानीं द्वारकायामास्थानमण्डपे नारदादिमुनिभी रुक्मिण्यादिभिस्सह स्वागमनं प्रतिपालयन्तं श्रीकृष्णमभिवीक्ष्य नारदादिमहर्षिवन्दनपूर्वकं मातापितृवन्दनेन तत्तदाशिषः प्रतिजग्राह।।

ततो रुक्मणीश्रीकृष्णौ तयोरानुरूप्यं प्रशस्य तौ दम्पती एकासने उपवेश्य नारदादिभिराशिषः कारयित्वाऽभिनन्दतुरित्यादिनिरूपितम्।।

एतादृशेऽस्मिन् विशिष्टपूर्णे षडङ्कात्मके प्रद्युम्नानन्दीयनाटके रचयिता आयुष्मान् **डा. पठान् वलि साहेब्** महता सुपरिश्रम्य, उपोद्घातरूपेण काव्यवाङ्मयपरिचयं विधाय, वेङ्कटाध्वरिणः जीवनवृत्तं समग्रं प्रतिपाद्य, नाटकलक्षणदृष्ट्या समीक्षां विधाय, वेङ्कटाध्वरिणः श्लेष-यमकपाण्डित्यं सोदाहरणं निरूप्य, अलङ्कारशास्त्रतत्त्वानि सम्यगनुशील्य, ग्रन्थममुं प्रणिनाय। परिशिष्टे **डा. वलि** सर्वोपयोगकारकं पुराणस्थं प्रद्युम्न-रतिवृत्तान्तं, विविधरूपककराः तेषां रूपकाणि च प्रादात्।

सन्दर्भेऽस्मिन् **डा. पठान् वलि साहेब्** महोदयेन कृतः शैक्षिकव्यवसायः तस्य च अनुसन्धानकौशलं च सर्वदा प्रशंसार्हमिति भावये।।

इत्थम्

डा. के. राजगोपालन्
सम्पादकः

रचयितृनिवेदनम्

प्रवृत्तिनिमित्तम् :–

दिव्यां भव्यां सुबोधां च शुद्धामर्थप्रदायिनीम्।
जननीं बहुभाषाणां वन्दे गीर्वाणभारतीम्।।

संस्कृतभाषा प्रपञ्चभाषासु पुरातना। संस्कृतसाहित्यम् अतिविस्तृतम्। संस्कृत-साहित्यं स्थूलतः वैदिकं लौकिकमिति द्विधा भवति। वेदसम्बद्धं साहित्यं वैदिकम्। लोकसम्बद्धं च साहित्यं लौकिकम्। लौकिकं साहित्यम् अपि पुराणानि, काव्यानि, रूपकाणि, शास्त्राणि, दर्शनानि, स्तोत्राणि एवंरूपेण बहुधा विद्यते। तत्र काव्यं कलात्मकं सरसतापादकं कान्तासम्मितं च भवति। अनन्यसामान्यविधानेन अनेन लक्षणेन काव्यं ग्राह्यं सम्पन्नम्। तत्रापि दृश्यकाव्यं सुलभतया श्रेयस्साधकम्। तत्र च **सन्दर्भेषु दशरूपकं श्रेयः, नाटकान्तं हि साहित्यम्, काव्येषु नाटकं रम्यम्** इत्यादीनि सहृदयवचनानि दृश्यकाव्यस्य महत्तां प्रकटयन्ति।

परिशोधनक्षेत्रे पाठसमीक्षात्मकम् अध्ययनं हि बुद्धिं ग्रन्थाध्ययने संसक्तं करोति, तथैव बुद्धेः विश्लेषणात्मकताम् आपादयति। साधुपाठस्वीकरणाय हेतुं निर्दिशति। विषयप्रतिपादनाय विमर्शनात्मकताम् अभ्यासयति। विषयस्य शास्त्रीयतां सम्पादयति।

दक्षिणभारतदेशे **श्रीमद्वेङ्कटाध्वरिमहाशयाः** सुप्रसिद्धाः विशिष्टाद्वैतमतानुयायिनः शताधिकग्रन्थकर्तारः। अस्य कृतिषु शास्त्रग्रन्थाः, दार्शनिकग्रन्थाः, चम्पूकाव्यानि रूपकाणि च सन्ति।

नाटकस्य श्रेयस्साधकत्वं, पाठसमीक्षणात्मकाध्ययनस्य गुणात्मकतां, शताधिक-ग्रन्थकर्तॄणां वेङ्कटाध्वरिमहाशयानां ग्रन्थेषु अस्य ग्रन्थस्य समीक्षात्मकसम्पादनस्य आवश्यकतां च मनसि निधाय अहं तदीयप्रद्युम्नानन्दीयनाटकस्य समीक्षात्मकाध्ययने प्रवृत्त इति निवेदयामि।

ग्रन्थस्वरूपनिवेदनम् :–

'**श्रीमदरिशाणफालवेङ्कटाध्वरिविरचितं प्रद्युम्नानन्दीयनाटकम्** इति शीर्षकोपेतेऽस्मिन् साहित्यग्रन्थरत्ने एते विषयाः परिशीलिताः।

तत्र भूमिकायां **काव्यवैशिष्ट्यम्** इति प्रथमांशे – वेदवाङ्मयम्, पुराणवाङ्मयम्, काव्यस्वरूपम्, काव्यवैशिष्ट्यम्, नाटकस्य रम्यत्वम् इत्येते विषयाः बहुभिः उपशीर्षकैः प्रतिपादिताः।

अथ **ग्रन्थकर्तुः परिचयः** इत्यङ्किते द्वितीयांशे – नाटककर्तुः परिचयः – तस्य देशकालादीनि, रचनाः तासां परिचयः इत्येते विषयाः निरूपिताः।

एवञ्च सम्पादितस्यास्य **नाटकस्य समीक्षणम्** सप्तांशेषु विहितम्। तत्र–

१. प्रथमांशे नाटकस्य कथावस्तुत्वेन **प्रद्युम्नानन्दीयनाटकाङ्ककथाः** समुपस्थापिताः।

२. **नाटककथासमीक्षणम्** इति द्वितीयांशे नाटकस्य नामौचित्यम्, पञ्चसन्धीनां समन्वयः, नाटके काल्पनिकता, तदन्तर्गततया उद्बोधनसरोवृत्तान्तः, नान्दी–विष्कम्भक–प्रवेशक–आकाशभाषितानां विचारः कृतः। ततश्च नाटककर्तरि पूर्वकविप्रभावः संसूचितः।

३. **नेता (नायकः)** इति शीर्षकसमन्विते तृतीयांशे नायकस्य स्वरूपस्वभावादि–विमर्शनद्वारा प्रद्युम्नस्य दिव्यत्वम्, उदात्तत्वं, विनीतत्वञ्च स्फुटीकृतः।

४. **रसविचार**प्रकाशकेऽस्मिन् चतुर्थांशे आदौ भरतमुनि–मम्मट–धनञ्जयैः प्रतिपादितं रसस्वरूपम्, तदनु रससामग्री, रसभेदाः, रसपोषणम् इत्येते अंशाः निरूपिताः।

५. अस्मिन् **श्लेष–यमकालङ्काराध्ययन**परे पंचमांशे प्रथमम् अलङ्कारस्वरूपनिरूपणम्, पश्चाच्च मम्मट–जयदेवयोः मते श्लेष–यमकालङ्कारयोः लक्षणम्, मम्मटप्रोक्तयमकभेदाः, प्रकृतग्रन्थे श्लेष–यमकनिबन्धनम् इत्येते विषयाः विशदीकृताः।

६. **कवेः वर्णनवैदुष्यम्** इति निगदिते षष्ठांशे वेङ्कटाध्वरिणा स्वकल्पनाचातुर्येण कृताः वर्णनाः नाटककथायाः रसस्य वा औचित्यभङ्गं विना सहृदयं रञ्जयन्ति – इति सोदाहरणं प्रदर्शिताः।

७. **छन्दोऽध्ययनम्** इति समाहूते अष्टमांशे अस्मिन्नंशे नाटके विद्यमानानि विभिन्नानि छन्दांसि अध्ययनाय लक्ष्यीकृतानि विद्यन्ते। छन्दश्शास्त्रानुसारेण नाटककृता स्वीकृतानि प्रसिद्धानि भिन्नभिन्नवृत्तानि सविस्तरं लक्षणसमन्वयपुरस्सरं निवेद्यन्ते। तत्रादौ वर्णच्छन्दसि समवृत्तप्रकरणस्थानि अनुष्टुप्–त्रिष्टुप्–जगती–अतिजगती–शक्करी–अतिशक्करी–अत्यष्टि–अतिधृति–प्रकृतिजातिस्थानि प्रसिद्धानि छन्दांसि यानि नाटके प्रयुक्तानि तान्यत्र समुपस्थापितानि।

परिशिष्टम् इत्यभिधानात्मके – ग्रन्थाध्ययनाय उपयोगिनः १. नाटककथामूलम् (पौराणिकम्), २. संस्कृतरूपककाराः – रूपकाणि च, ३. आंग्लभाषायां रति–प्रद्युम्नयोः वृत्तान्तः, **भागवतकथा** च अनूद्य सारः संस्थापिता। दशरूपकस्थ–नाटकलक्षणानि, ४. अनुशीलितग्रन्थसूची इत्येतादृशाः विषयाः समुपस्थापिताः।

कार्तज्ञ्याविष्कारः

कृष्णेन स्नानकेळौ वसनमपहृतं याचमानास्सलज्जं
कालिन्द्यां गोपकन्याः प्रहसितुमपरास्वागतास्वङ्गनासु।
तं दृष्ट्वा लोभनीयं स्मरविवशतया स्रस्तवस्त्रासु तौल्यात्
सानन्दाः पश्यतस्ताः कलयतु कुशलं तस्य मन्दस्मितं नः॥

महानयं मे प्रमोदावसरः यत्– भगवतः अनुग्रहेण **पठान् वलि साहेब**भिधानेन मया संस्कृतभाषायां साहित्यशास्त्रे **श्रीवेङ्कटाध्वरिविरचितस्य प्रद्युम्नानन्दीयनाटकसमीक्षा** इति शीर्षकोपेतः प्रबन्धः विदुषां पुरतः समर्प्यत इति। जन्मना **इस्लाम्** सम्प्रदायिनोऽप्यहम् संस्कृतभाषाध्ययनेन संस्कृतवाङ्मयस्थहिन्दूसंस्कृतेः संस्कृतस्य च प्रभावेन तत्र बद्धानुरागस्सञ्जात इत्यत्र नास्ति मे सन्देहलेशः।

प्रबन्धममुं रचयितुं प्रेरितवद्भ्यः सहकृतवद्भ्यश्च तथा ग्रन्थस्यास्य सम्पादकाः भूत्वा समुचितेषु स्थलेषु अनेकान् विषयान् उद्बोधितवद्भ्यः मद्गुरुभ्यः **डा. के. राजगोपालन् महोदयेभ्यः** धन्यवादाः वितीर्यन्ते।

यस्याः करुणया अत्यन्तप्रेम्णा च लालितः पालितश्चाहं, यस्याः निरन्तर–प्रोत्साहनेन मम संस्कृताध्ययनं च सम्पन्नं तस्यै जनन्यै **दरियाबी** इत्यभिधायै, यस्य च पालने शिक्षितोऽहं तस्मै जनकाय स्वर्गीयाय **पठान् नासर्वलिमहाशयाय** च सभक्ति सश्रद्धं च सन्दर्भममुं पुरस्कृत्य नमस्सुमाञ्जलिमर्पयामि।

येषां वात्सल्येन विद्यापीठे मह्यं पुनःप्रवेशः उन्नतविद्याभ्यासावकाशश्च लब्धः, येषां च मार्गदर्शने अनुसन्धानसूक्ष्मानंशान् ज्ञातवानहं, येषां चानुग्रहेण सुखी अहं, **त्यागाय सम्भृतार्थानाम्** इत्यार्योक्तेः दर्पणायमानानां श्रीवेङ्कटेश्वरवेदविश्वविद्यालयकुलपतिवर्याणाम् **आचार्य सन्निधानं सुदर्शनशर्मामहाभागानां** चरणकमलयोः सभक्ति प्रणमाम्यहम्।

येषां च सहकारेण अविज्ञातश्लोकेषु तत्तद्सूचनाप्रदानेन छन्दोज्ञानं सफलं जातं तान् आन्ध्र-संस्कृतभाषयोः कविप्रवरान् शतावधानिमान्यान् प्रियभाषणशीलान् कुशलान् शैक्षिकसङ्घायप्रमुखान् **आचार्य कोम्पेल्ल रामसूर्यनारायणमहाभागान्** सश्रद्धं नौमि।

श्रीमद्वेङ्कटाध्वरिविषये अनुशीलनीयग्रन्थान् संसूच्य ग्रन्थसम्पादने उपकृतवद्भ्यः प्राक्तनकुलपतिभ्यः लिपिविद्यावरिष्ठेभ्यः न्याय-वेदान्तादिदर्शननिष्णातेभ्यः **आचार्य का.इ. गोविन्दन् महाशयेभ्यः** प्रणतिपूर्वकं कार्तज्ञ्यं विनिवेदयामि।

सकाले समुचितसूचनादिभिः अनुगृहीतवद्भ्यः हितैषिणेभ्यः न्याय-वेदान्त-मीमांसादिशास्त्रेषु अनितरसाधारणविद्वद्वरेभ्यः विद्यापीठस्य स्वर्णजयन्तीग्रन्थमालायाः सञ्चालकेभ्यः **आचार्य का.इ. देवनाथन् महाशयेभ्यः** नमस्सुमाञ्जलिं समर्पयामि।

एवं विद्यापीठस्य साहित्यविभागाध्यक्षेभ्यः प्रवाचकेभ्यः **डा. सत्यनारायणाचार्य-महाभागेभ्यः**, यदा तदा आवश्यकसूचनादानेन परम्परया च नितान्तमुपकृतवद्भ्यः साहित्यविभागाचार्येभ्यः **आचार्य गुल्लपल्लि श्रीरामकृष्णमूर्तिमहोदयेभ्यः, डा. सि. ललिताराणीमहाभागाभ्यः, डा.सि. रङ्गनाथन् महाशयेभ्यः, डा. राणी सदाशिवमूर्ति-महोदयेभ्यः** सप्रश्रयं धन्यवादान् समर्पयामि।

इत्थमनुसन्धानविभागस्य अध्यक्षेभ्यः **डा. कोराड सूर्यनारायणमहोदयेभ्यः** धन्यवादान् समर्पयामि। शीर्षकगतसंशयं निवार्य अनुसन्धाने पुरःप्रवर्तयितुम् प्रेरणां दत्तवद्भ्यः **आचार्य सिहेच्.पि. सत्यनारायणमहोदयेभ्यः**, मातृकासम्पादनशीलेभ्यः नानालिपि-विशारदेभ्यः **विरूपाक्ष वि. जड्डीपालमहाशयेभ्यः** हार्दान् धन्यवादान् निवेदयामि।

अथ श्रीवेङ्कटेश्वरप्राच्यपरिशोधनासंस्थायाः निदेशकेभ्यः **डा. वि. वेङ्कटरमणरेड्डि-** महाभागेभ्यः, मैसूरप्राच्यमातृकाग्रन्थालयाधिकारिभ्यः, डा. एस्. जगन्नाथमहोदयप्रभृतिभ्यः, एवं मद्रास्नगरस्थप्रभुत्वप्राच्यपरिशोधनामातृकालयाधिकारिभ्यः तत्रस्थकर्मचारिभ्यः धन्यवादान् प्रकटयामि।

वस्तुतः पाठशालाविद्याध्यापकेभ्यः विद्यागुणाः मयि सन्निधत्ताः। अतः प्राथमिक–विद्यागुरून् सर्वान् बन्धुगणान् च अस्मिन्नवसरे सश्रद्धं वन्दे।

प्राथमिकविद्यानन्तरं कलाशालायां प्रवेशात्प्रभृति मामत्यन्तादरेण पुत्रवात्सल्येन च संस्कृतवाङ्मयसूक्ष्मांशान् उपदिश्य मामनुग्रहपात्रं कृतवद्भ्यः श्रीकाञ्चीकामकोटिपीठाधिपतिभिः ***अद्वैतवेदान्तरत्न*** इति बिरुदाञ्चितेन सम्मानितेभ्यः **डा. श्रिष्टि लक्ष्मीकुमारशर्ममहाशयेभ्यः,** तेषां धर्मपत्नीभ्यः **शर्वाणीमहाभागाभ्यः** च नूनमयमधमर्णः।

अस्य प्रबन्धस्य निर्माणे प्रकाशने च यदा तदा वा आवश्यकं साहाय्यं कृतवद्भ्यः **डा. श्रिष्टि लक्ष्मीधरशर्ममहोदयेभ्यः** नमस्सुमाञ्जलिमर्पयामि।

अपि च प्रकाशनकार्यसम्पूर्तौ बहवः विद्वांसः श्रेयोऽभिलाषिणः सहकृतवन्तः उपकृतवन्तश्च तानत्र संस्मृत्य तेभ्यः कार्तज्ञ्यमाविष्करोमि।

एवमस्मिन् प्रबन्धनिर्माणे प्रत्यक्षतया उत परोक्षतया उपकृतवद्भ्यः गुरुभ्यः हितैषिणेभ्यः मित्रेभ्यः बन्धुभ्यश्च मम हार्दान् धन्यवादान् वितरन् विरमामि ।।

दिव्या मधुरा सरसा, धर्मबोधे हि ज्ञानदा।
प्रभु–मित्र–कान्तायुता, वाणी गीर्वाणी जयतात् ।।

कुतो वा संस्कृतवाणी, का च मम मन्दा मतिः।
अथापि क्रियते यत्नो, भाषायामासक्तिहेतोः ।।

‘कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ।।’

।। इति शम् ।।

इत्थं विदुषामाश्रवः

– पठान् वलि साहेब्

दिनाङ्कः : **22-08-2015**
स्थलम् : **तिरुपतिः**

विषयसूची

प्रद्युम्नानन्दीयनाटकसमीक्षा

८. छन्दोऽध्ययनम्

परिशिष्टम्

सङ्केताक्षरसूची

का.प्र.	–	काव्यप्रकाशः, मम्मटाचार्यः ।
काव्यालं.	–	काव्यालङ्कारः, रुद्रटः ।
कु.आ.	–	कुवलयानन्दः, अप्पय्यदीक्षितः ।
चं.आ.	–	चन्द्रालोकः, जयदेवः ।
ज.सि.प.	–	जगन्नाथसिद्धान्तपरिशीलनम्, डा. श्रिष्टि लक्ष्मीकुमारशर्मा ।
द.रू.	–	दशरूपकम्, धनञ्जयः ।
ध्व.आ.	–	ध्वन्यालोकः, आनन्दवर्धनः ।
नार.	–	नारदीयपुराणम्, भगवान् वेदव्यासः ।
नाट्य. प्र.	–	नाट्यशास्त्रम्, भरतमुनिः (प्र.–प्रथमोऽध्यायः) ।
भाग.	–	भागवतपुराणम्, भगवान् वेदव्यासः ।
प्र.रु. रत्ना.	–	प्रतापरुद्रीयम् – विद्यानाथः। रत्नापणव्याख्यासहितम् – श्रीकुमारस्वामी ।
पृ.	–	पृष्ठसंख्या ।
मनु.	–	मनुस्मृतिः।
महा.प.आ.	–	महाभाष्यम्, पश्पशाह्निकम्, महर्षिपतञ्जलिः ।
रस. प्र.आ.	–	रसगङ्गाधरः, प्रथमाननम्, पण्डितराजजगन्नाथः ।
लक्ष्मी.रत्न.	–	लक्ष्मीसहस्रम् – रत्नाप्रकाशिकाव्याख्यासहितम्, वेङ्कटाध्वरिः – श्रीकृष्णब्रह्मतन्त्रपरकालमुनीन्द्रः ।
व.जी.	–	वक्रोक्तिजीवितम्, राजानककुन्तकः ।
वायु.	–	वायुपुराणम्, भगवान् वेदव्यासः ।

वि.गु.पदार्थ.	–	विश्वगुणादर्शचम्पूः वेङ्कटाध्वरिः, पदार्थचन्द्रिकाटीकासहिता – बालकृष्णशास्त्री
वि.गु.भाव.	–	विश्वगुणादर्शचम्पूः – वेङ्कटाध्वरिः, भावदर्पणाटीकासमेता मधुरासुब्बाशास्त्री सम्पादकः – श्यामरायशर्मा विठ्ठलः
वृ.र.	–	वृत्तरत्नाकरः, केदारभट्टः ।
शिशु.	–	शिशुपालवधम्, महाकविमाघः ।
सं.सा.च.	–	संस्कृतसाहित्यचरितत्रमु, मुदिगण्टि गोपालरेड्डी – सुजातारेड्डी च ।
सा.द.	–	साहित्यदर्पणम्, विश्वनाथः ।
G.O.M.L.	=	Government Oriental Manuscripts Library, Madras.
H.C.S.L.	=	History of Classical Sanskrit Literature, M. Krishnamachariar
N.C.C.	=	The New Catalogus Catalogorum

भूमिका

१. काव्यवैशिष्ट्यम् :-

काव्यं कान्तासम्मितत्वात् सहजतया आकर्षकं भवति। तत् आकर्षणं पाठकम् अनिष्टात् अविवेकात् मोहात् च दूरमपनीय इष्टपूर्त्या विवेकेन अवगाहनपुरस्सरम् आचरणाय प्रेरयति, पुरुषार्थान् साधयति च। अत एव काव्यस्य वैशिष्ट्यं प्रतिपादयन्तः काव्यशास्त्रकाराः **काव्यं कान्तासम्मितम्** इति वदन्ति।

तस्य अयमर्थः। कान्ता नाम प्रेयसी। प्रेयसी इत्युक्तावेव सा मनोहारिणी इति सिद्ध्यति। सा प्रियम् आकर्षति। करं गृहीत्वा समवधाने स्थापयति। भुजयोः हस्तं निक्षिप्य उन्मुखीकरोति। वचांसि मधुराणि कृत्वा श्रावयति। स्वाभिप्रायं मनः प्रापयति। प्रियं सङ्कल्पयति। आनन्दयति आचरणोन्मुखं करोति। तथैव शब्दप्रधानेभ्यः प्रभुसम्मितेभ्यः वेदेभ्यः, अर्थप्रधानेभ्यः मित्रसम्मितेभ्यः पुराणेभ्यश्च विलक्षणतया कान्तासम्मितं सत् काव्यं पाठकजनान् आकर्षति।

यथा कान्ता (प्रेयसी) स्वकटाक्षभ्रू-विक्षेपादिभिः सरसतया प्रियमाकृष्य मधुरया वाचा स्वाभिलषितम् अर्थं निगद्य प्रेम्णा अर्थसाधनाय उद्युक्तं करोति तथैव काव्यमपि रमणीयार्थप्रतिपादकैः ललितपदैः सरसतया पाठकमाकृष्य मधुरेण व्यक्तीकरणेन स्वाभिलषितं सन्देशं पाठकजनाय निगद्य बाधां वा कष्टं वा विना इष्टपूर्वकं सन्देशाचरणाय उद्युक्तं करोति इति वेद-पुराणेभ्यश्च काव्यस्य वैशिष्ट्यं सिद्ध्यत्येव। अयमेवांशः प्रतापरुद्रिय-काव्यप्रकाशयोः स्पष्टं निरूपितवतः विद्यानाथ-मम्मटाचार्याभ्याम्। तद्यथा -

यद्वेदात् प्रभुसम्मितादधिगतं शब्दप्रधानाच्चिरम्,
यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्सम्मितात्।
कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया,
कर्तव्ये कुतुकी बुधो विरचितः तस्यै स्पृहां कुर्महे।।[1]

"प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः, सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म

1. प्र.रु. रत्ना. पृ. ४.

तत् कान्तेव सरसतापादनेन अभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवत् इत्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।"[1]

काव्यं ग्राह्यम् अलङ्कारात्, सौन्दर्यमलङ्कारः।।[2]

काव्यं सुललितभाषानिबन्धन-कल्पनाचातुर्येण अलङ्कार-प्रसादमाधुर्यादिगुण-समन्वयानाम् रसादीनां च काव्यसामाग्रीभिः सहृदयमनोभावाभिव्यञ्जनेन सर्वेषाम् अपि सुधियां चेतांसि आवर्जयति। विविधकला-प्रख्यापनात् विद्वन्मनोमोहनत्वाञ्च **कलासीमा काव्यम्** इति सादरम् उद्घोष्यते। काव्ये यादृशी कल्पना रुचिरा मनोहारिणी विद्यते तादृशी कल्पना चेतः प्रसादिनी रुचिरा भावाभिव्यक्तिः वैदिक-पुराणवाङ्मयादिषु न विद्यते। अत एव सहृदयतल्लजैः माघकविविरचितशिशुपालवधमहाकाव्यपठनेन **माघे मेघे गतं वयः** इति सादरमुद्घोषितम्।

एतादृशं वैशिष्ट्यं वहतः काव्यस्य स्वरूपस्वभावयोः विचारणम् अत्र किञ्चित् क्रियते।

२. काव्यस्य स्वरूपम् :-

बहवः आलङ्कारिकाः काव्यस्वरूपं बहुधा निरूपयन्ति। प्रमुखानां केषाञ्चित् लक्षणकाराणां काव्यलक्षणानि अत्र प्रस्तूयन्ते।

शब्दार्थौ सहितौ काव्यम्।[3]
शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली।[4]

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।[5]

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।[6]

इति दत्तकाव्यलक्षणानुसारं दोषरहितौ गुणालङ्कारसहितौ शब्दार्थौ काव्यम् इति। क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वस्य हानिः भवति। अर्थात् रसादिः अलङ्कारश्च चमत्कारस्य हेतुः। अतः यत्र रसादीनां संस्थितिः तत्र स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः इति मन्तव्यम्।

---

1. का.प्र. प्रथमोल्लासः पृ. ६, ७.
2. काव्यालङ्कारसूत्रवृत्तिः
3. काव्यालं १.१६
4. का.आ. १.१०
5. व.जी. १.७.१६.
6. का.प्र. प्रथमोल्लासः पृ. ४

वाक्यं रसात्मकं काव्यम्।[1]

एतेषु केचन शब्दं प्रधानं कृत्वा काव्यस्य लक्षणं कथयन्ति। यथा दण्डि-पण्डितजगन्नाथादयः। अपरे केचन अर्थं प्रधानं सम्भाव्य काव्यस्य स्वरूपं निरूपयन्ति। यथा साहित्यदर्पणकारादयः। अन्ये केचन शब्दम् अर्थञ्च प्रधानं कृत्वा काव्यस्य स्वरूपं प्रतिपादयन्ति। एवमेतानि सर्वाण्यपि सर्वैर्बहुधा विमृष्टानि इति कृत्वा काव्यगतां गुणात्मकतामाधारीकृत्य काव्यस्य स्वरूपं निरूपयितुं किञ्चित् प्रयतिष्ये।

२.१. पण्डितराजमते काव्यलक्षणम् :-

वेदप्रतिपादितमेवार्थं सरसतया स्वकल्पनाचातुर्येण स्वकाव्ये कविः यदा प्रतिबिम्बयति तदा सः कविः लोके कीर्तिं लभते। तादृशमेव काव्यं जगति आदरणीयतां वहति। सहृदयस्य हृदङ्गमतया यदि काव्यं निबध्यते तर्हि तत् काव्यं पाठक/प्रेक्षकजनग्राह्यं भवति। सहृदयं पुनःपुनः आलोचयति तदेव उत्तमोत्तमं काव्यं भवति। अत एव जगन्नाथपण्डितराजः काव्यं लक्षयन् -

रमणीयार्थप्रतिपादकशब्दः काव्यम्।[2]

इति निष्कृष्टं काव्यलक्षणं प्राचीनसकलालङ्कारिकविलक्षणतया प्रकटितवान्। काव्यस्य रमणीयता सम्पादने शब्दस्य अर्थस्य च परस्परस्पर्धायां सत्यामपि, पाठकदृष्ट्या तु शब्दस्यैव प्रथमोपस्थिततत्वात् शब्दस्यैव प्राधान्यं स्वीकृत्य इदं लक्षणं प्रवृत्तम्। काव्ये अर्थचमत्कारस्यैव प्राधान्यात् तज्जनक-गुणालङ्कारप्रसक्तिं विना अर्थरमणीयतयैव काव्यं लक्षितम्।

तत्र च लक्षणघटितरमणीयार्थप्रतिपादकत्वं शब्दस्य स्वाभिविकम् उत प्रयत्नान्तरसाध्यम् इत्याकांक्षायां प्रयत्नान्तरसाध्यम् इति समाधनम्। कुत इति चेत् यदि शब्दस्य रमणीयार्थप्रतिपादकत्वं स्वाभाविकम् इति ब्रूमः चेत् तर्हि सर्वस्यापि शब्दस्य रमणीयार्थप्रतिपादकत्वं स्वभावतः सिद्धमिति, वाक्यसामान्ये काव्यलक्षणस्य अतिप्रसङ्गः स्यात्। अतः रमणीयता प्रयत्नान्तरसाध्या इत्येव वक्तव्यम्। तर्हि कोऽसौ प्रयत्नः इत्युक्ते पण्डितराजेन **भावना**[3] इत्युक्तम्।

1. सा.द. १.३.
2. र.गं. प्रथमाननम् पृ. १३
3. र.गं. प्रथमाननम्, पृ. १५, **कारणं च तदवच्छिन्ने भावनाविशेषः पुनःपुनरनुसन्धात्मा। यत्किञ्चित् चमत्कारजनकज्ञाने समूहालम्बनविधया भासमानान्यार्थप्रतिपादकशब्दे काव्यत्ववारणाय ज्ञानेत्यपहाय भावना इत्युक्तम्।** र.गं. प्रथमाननम् मर्मप्रकाशः पृ. १७

लौकिकशब्दप्रतिपादितस्य काव्यशब्द इव भवनावकाशः न भवति। काव्यशब्देन प्रतिपादितार्थस्तु चमत्कारं जनयति। काव्ये भावनाविशेषमहिम्ना लोकोत्तरापरपर्यायः रमणीयार्थः (चमत्कारः) जायते[1]।

ततश्च रससामग्रीघटितं वाक्यम्, चमत्कार्यर्थप्रतिपादकः शब्दः, सचमत्कारौ शब्दार्थौ वा काव्यमिति निष्कर्षः। प्रकृते प्रद्युम्नानन्दीयनाटके श्लेष-यमकादिचमत्काराणाम् अग्रे निरूपयिष्यमाणविधया अङ्गाङ्गिभावेन अवस्थितानां नवरसानां वा सद्भावात् काव्यलक्षण-समन्वयः।

३. काव्यप्रयोजनम् :-

लोकोत्तरवर्णननिपुणस्वरूपस्य काव्यस्य किं प्रयोजनम् इत्युक्तौ काव्यप्रकाशे मम्मटोक्तौ-

> **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
> **सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। २।।**[2] इति।

तत्र महाकविकालिदासादीनामिव **यशः** एकं प्रयोजनम्। धावकनामकः कविः श्रीहर्षनाम्ना रत्नावलीनाटकं विलिख्य बहुधनं प्राप्तवान्। अतः काव्यप्रणयनात् **धनं** द्वितीयं प्रयोजनम्। मयूरशर्मा च सूर्यशतकं विलिख्य कुष्ठुरोगात् विमुक्तः इति काव्यात् **शिवेतरक्षतिः** (अमङ्गलनाशः) तृतीयं प्रयोजनम्। एते च त्रयः काव्यप्रणेतुः कवेः प्रयोजनानि। एवं च काव्यपठितुः अपि यशः प्रसरति, द्रव्यं लभते स्तोत्रपठनेन अनर्थनाशः च भवति।

सहृदयस्तु काव्यश्रवणानन्तरं सकलप्रयोजनेषु उत्तमं स्थायिभावास्वादनसमुद्भूतं रसास्वादरूप-मानन्दम् अनुभवति। अपि च तस्य राजादिगतपृथिवीपालनादिसमुचिताचारपरिज्ञानं जायते। रामादिवत् वर्तितव्यम्, न तु रावणादिवत् इति उपदेशं च ददाति काव्यास्वादनकाले कविः अपि सहृदयो भूत्वा रसास्वादमनुभवति। अयि राजादिगतोचिताचारोपदेशाय नीतिशास्त्राणि सन्ति किल इति चेत् कान्तासम्मिततया सरसतामापाद्य उपदिशति इत्यत्र विशेषः।

एवं काव्यप्रयोजने ज्ञाते काव्यभेदाः प्रकृतनाटकस्थानं निरूपणायोच्यन्ते।

---

1. जगन्नाथसिद्धान्तपरिशीलनम् पृ. 68-69.
2. का.प्र. प्रथमोल्लासः पृ. ५

४. काव्यभेदाः :-

४.१. मम्मटोक्तकाव्यविभागः :-

मम्मटः काव्यप्रकाशे काव्यगतव्यङ्ग्यार्थमाधारीकृत्य उत्तम-मध्यम-अधमम् इति त्रिधा विभक्तवान्।

१. उत्तमम् :- तद्यथा- **इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिः बुधैः कथितः**[1] इति। यस्मिन् काव्ये वाच्यार्थात् व्यञ्जनाव्यापारगम्यः व्यङ्ग्यार्थः अधिकचमत्कारकारि तद्ध्वनिः इति तत् काव्यञ्च उत्तमम् इति पण्डितैः संज्ञा कृता इति।

२. मध्यमम् :- अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्[2] इति। यस्मिन् काव्ये वाच्यार्थात् व्यङ्ग्यार्थः (चमत्कारार्थः) अतिशायी न भवति तत् गुणीभूतव्यङ्ग्यम् इति, तत् काव्यं च मध्यमम् इति ज्ञायते।

३. अधमम् :- द्विविधम्। **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्**[3]**।** अवरं नाम अधमम् इति। चित्रं नाम गुणालङ्कारयुक्तम्। अव्यङ्ग्यञ्च स्फुटप्रतीयमानार्थरहितमिति ज्ञेयम्। गुणालङ्कारसहितं स्फुटप्रतीयमानार्थरहितं शब्दगतं काव्यं शब्दचित्रम् इति, अर्थगतं च अर्थचित्रम् इति तादृशं काव्यञ्च अवरम् इति व्यवह्रियते।

प्रायशः ध्वनिवादिनः अमुमेव विभागम् अभ्युपगच्छन्ति। पण्डितराजस्तु चमत्कारं काव्यविभाजकोपाधित्वेन स्वीकृत्य, काव्यचातुर्विध्यं मेने।

४.२. प्रकारान्तरेण काव्यद्वैविध्यम् :-

तच्च काव्यं स्वरूपस्वभावात् द्विधा विभज्यते - दृश्यं श्रव्यं च। श्रव्यं काव्यम् - काव्य-महाकाव्य-खण्डकाव्य-चम्पूकाव्य-गद्यकाव्य-स्तोत्रकाव्य-गीतिकाव्यादिभेदेन बहुविधम्।

५. दृश्यकाव्यम् :-

अभिनेयं भवति। तत्र च नटादौ रामादिस्वरूपारोपः भवति। अतः दृश्यं काव्यं **रूपकम्** इति उच्यते। उक्तं च साहित्यदर्पणे विश्वनाथेन-

---

1. का.प्र. प्रथमोल्लासः पृ. १५
2. का.प्र. प्रथमोल्लासः पृ. १८
3. का.प्र. प्रथमोल्लासः पृ. १९

दृश्य-श्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्।।[1] इति।

एवं दशरूपके च धनञ्जयेन - **अवस्थानुकृतिः नाट्यम्...। रूपकं तत्समारोपात्...।**[2] **वस्तु-नेता-रसस्तेषां भेदकः।**[3] इत्यादिना नाटकस्य स्वरूपम् उक्तम्। काव्योपनिबद्धधीरोदात्त-धीरोद्धत-धीरशान्त-धीरललितनायकानाम् तत्तन्नायिकानां तथान्येषां पात्राणां च अवस्थानुकारः आङ्गिक–वाचिक-आहार्य-सात्त्विकरूपचतुर्विधाभिनयेन तादात्म्यापत्तिः नाट्यम्। तदेव नाट्यं दृश्यमानतया रूपम् इति व्यवह्रियते, नीलादिरूपवत्। तत्तत्पात्रावस्थानुकरणेन नटेषु अनुकरणशीलेषु तादात्म्यापत्तिः सम्भवति।

यथा नटः दुष्यन्तपात्रम् अभिनयन् तस्य प्रत्येकप्रवृत्तिं (वेष-भूषादिभिः) लभते। सामाजिकः तं नटं दुष्यन्त एवायम् इति मन्यते। नाटे दुष्यन्ते च अभेदं पश्यति। अतः धनञ्जयेन सूक्तम् **अवस्थानुकृतिः नाट्यम्** इति। तादृशं नाट्यं न केवलं श्रव्यं भवति अपि तु रङ्गमञ्चे अभिनेयमानस्सन् चक्षुरिन्द्रियग्राह्यत्वात् रूपम् इति, दृश्यमानत्वात् दृश्यम् इति च व्यवह्रियते। नाट्यमेव रूपकम् इत्यपि अभिधीयते। यथा - रूपकालङ्कारे **मुखं चन्द्रः** इत्यत्र मुखे चन्द्रस्य आरोपः क्रियते तथा नाट्ये नटेषु तत्तद्रामादिपात्राणाम् अवस्थायाः आरोपः क्रियते इत्यतः रूपकम् इति।

एवं च इन्द्रः पुरन्दरः शक्रः इतिवत् नाट्यम्, रूपम्, रूपकम् इति शब्दत्रयस्य प्रयोगः।

धनञ्जयानुसारं रूपके तत्त्वत्रयं प्रमुखम् **वस्तु-नेता-रसः** इति। तदाश्रित्य च रूपकस्य विभाजनम्। अत्र रूपके रसस्य महत्त्वम्[4] उररीक्रियते। रसनिष्पत्त्यै आनन्दोपलब्ध्यै च नाट्यस्य रचना। रूपकं तत्त्वत्रितयमाधारीकृत्य च दशधा भवति। तद्यथा -

६. रूपकभेदाः :- **नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।। ८।।[5]

1. सा.द. ६.१
2. द.रू. प्रथमप्रकाशः श्लो. ७. पृ. ४.
3. द.रू. प्रथमप्रकाशः श्लो. ९. पृ. ६.
4. द.रू. प्रथमप्रकाशः पृ. ४. रसानाश्रित्य वर्तमानं दशप्रकारकम्।
5. द.रू. प्रथमप्रकाशः श्लो. ९. पृ. ६.

इति रूपकाणि दश। तत्र - **१. नाटकम्**[1] **:-** इतिवृत्तं प्रसिद्धम्। नायकः धीरोदात्तः। अङ्गिरसः शृङ्गारो वीरो वा। अङ्काः पञ्चतः (५) - दशपर्यन्तम् (१०) भवेयुः।

अथ नाटकस्य वेदसम्मतत्वप्रकाशनाय नाटकोत्पत्तिप्रकारो निरूप्यते।

७. नाटकोत्पत्तिः :-

भारतीयनाटकोत्पत्तिविषये नानावादाः भारतीयैः पाश्चात्त्यैश्च विमर्शकैः कृताः। तत्र भारतीयपरम्परा इत्थं वर्तते। तत्र भरतमुनिः स्वनाट्यशास्त्रे नाटकोत्पत्तिं वर्णयन् देवानां प्रार्थनामङ्गीकृत्य चतुर्वेदेभ्यः अर्थात् ऋग्वेदात् **पाठ्यम्**, समावेदात् गीतम्, यजुर्वेदात् अभिनयम्, अथर्ववेदात् च रससामग्रीञ्च आदाय पण्डितपामरजनरञ्जकं पञ्चमवेदं नाट्यवेदम् अजृसत् इत्यकथयत्। इदं वृत्तमेव भारतीयनाटकानां मूलमिति भारतीयैः मन्यते। तद्यथा -

तस्मात् सृजापरं पञ्चमं सार्ववर्णिकम्।[2]

एवं संकल्प्य भगवान् सर्ववेदाननुस्मरन्।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।।[3]

जग्राह वेदम् ऋग्वेदात्, सामभ्यो गीतम् एव च।
यजुर्वेदात् अभिनयान्, रसान् आथर्वणादपि।।[4] इति।

धनञ्जयोऽपि स्वदशरूपके नाट्योत्पत्तिः वेदमूला इति निगदति तद्यथा -

उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि-
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किञ्चित्प्रगुणरचनया लक्षणं संक्षिपामि।।४।।[5] इति।

---

1. एवं नाटकस्य लक्षणानां ज्ञानाय अनुबन्धः - ४ द्वितीयांशः "दशरूपकस्थनाटकलक्षणानि" द्रष्टव्यः। अन्येषां रूपकभेदविवरणज्ञानाय अनुबन्धः - ३ प्रथमपुटः द्रष्टव्यः।
2. नाट्य. प्रथमाध्यायः श्लो.१२ पृ. १०
3. नाट्य. प्रथमाध्यायः श्लो.१६ पृ. ११
4. नाट्य. प्रथमाध्यायः श्लो.१७ पृ. १३
5. द.रू. श्लो.४ पृ. २

अर्थात् ब्रह्मा नाट्यनाम्ना पञ्चमवेदं कृतवान्। तस्मिन् अभिनयप्रयोगं हस्त-पादादि-समायोगेन भरतमुनिः अकरोत्। परमेश्वरः उद्धतं ताण्डवं कृतवान्। सुकुमारं नृत्यं च पार्वती कृतवती। तादृशनाट्यवेदस्य सम्पूर्णं लक्षणं कर्तुं कः समर्थः। नाम अस्मादृशलौकिकप्राणिभिः देवता-महापुरुषादिभिः निबद्धस्य नाट्यशास्त्रस्य लक्षणकरणम् यद्यपि असम्भवग्रस्तमेव तथापि तस्य नाट्यैकदेशस्य दशरूपस्य संक्षेपेण लक्षणं क्रियते।

इत्थं भारतीयनाट्यशास्त्रं वेदमूलम्।

८. नाटकानां महत्त्वम् :-

नाट्ये न कोऽपि भावः विषयः वा अवशिष्यते। सर्वे अपि रसाः अत्र निबद्धाः। यथास्थानं पुरुषार्थचतुष्टयं चतुर्वर्गो वा अत्र संगृह्यते।

क्वचित् धर्मः, क्वचित् क्रीडा, क्वचित् अर्थः, क्वचित् शमः।
क्वचित् हास्यं, क्वचित् युद्धं, क्वचित् कामः, क्वचित् वधः।।[1]

अत्र लोकवृत्तम् अनुसृत्य नानाभावाः विषयाश्च उपस्थाप्यन्ते। तच्च अनेन भरतश्लोकेन ज्ञायते तद्यथा-

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतत् मया कृतम्।।[2] इति।

अत्र क्वचित् वैदिकी शिक्षा, क्वचित् ऐतिह्यम्, क्वचित् आख्यानम्, क्वचित् आचार-विचारशिक्षा, क्वचित् कर्तव्यबोधनं च समाविश्यते।

वेदविद्येतिहासानाम् आख्यानपरिकल्पनम्।
विनोदकरणं लोके नाट्यमेतत् भविष्यति।।[3]

श्रुति-स्मृति-सदाचार-परिशेषार्थ-कल्पनम्।
विनोदजननं लोके नाट्यमेतत् भविष्यति।।[4]

---

1. नाट्य. प्र. १०८. पृ. ३४.
2. नाट्य. प्र. ११२. पृ. ३८.
3. नाट्य. प्र. ११९ (अस्यानन्तरं वर्तते) पृ. ४२.
4. नाट्य. प्र. ११९ (अस्यानन्तरं वर्तते) पृ. ४२.

न केवलम् एतदेव, अपि तु नाट्यं सर्वेषाम् अपि अभीष्टं साधयति। यस्य यदेव अभीष्टं तस्य तदेव प्रापयति। यस्य यद्विषयकाभिरुचिः सः तत्र तद्विषयिणीं सामग्रीम् उपलभते। तद्यथा - धर्मनिष्ठानां कृते धर्मचर्चा, विषयिणां कृते विषयोपभोगः, अज्ञानां कृते ज्ञानोपदेशः, सुधियां ज्ञानवर्धनम्, धनिनां विलासः, अर्थार्थिनाम् अर्थोपार्जनसाधनम्। एतदेवोक्तं भरतेन-

धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्।
निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया।।[1]

क्लीबानां धाष्टर्यजननम् उत्साहः शूरमानिनाम्।
अबुधानां विबोधश्चा वैदुष्यं विदुषाम् अपि।।[2]

ईश्वराणां विलासश्चा स्थैर्यं दुःखार्दितस्य च।
अर्थोपजीविनाम् अर्थो धृतिः उद्विग्नचेतसाम्।।[3]

एतदेवाश्रित्य महाकविना कालिदासेन उच्यते मालविकाग्निमित्रे—

देवानाम् इदम् आमनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्।
रुद्रेणेदम् उमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।।[4]

त्रैगुण्योद्भवम् अत्र लोकचरितम् नानारसं दृश्यते।
नाट्यं भिन्नरुचेः जनस्य बहुधाऽप्येकं समाराधनम्।।[5]

सहृदयैरेव रत्यादिवासनाम् आश्रित्य रसास्वादः अनुभूयते। स्वचेतोगतवासनाश्रयेणैव प्रेक्षकैरपि रसास्वादनं क्रियते। न स्यात् चेत् वासना प्रेक्षकेषु तर्हि ते जीवन्तोऽपि मृतोपमाः काष्ठपाषाणादिसंकाशाश्चा। उच्यते विश्वनाथेन च-

न जायते तदास्वादः विना रत्यादिवासनाम्।
सवासनानां सभ्यानां रसस्य आस्वादनं भवेत्।।

निर्वासनास्तु रङ्गान्तः काष्ट-कुड्य-अश्मसन्निभाः।[6]

1. नाट्य. प्र. १०९. पृ. ३७.
2. नाट्य. प्र. ११०. पृ. ३७.
3. नाट्य. प्र. १११. पृ. ३८.
4. मालविकाग्निमित्रम्, १.४
5. नाट्य. प्र. १७. पृ. १३.
6. सा.द. विश्वनाथः

जीवितम् इदं सम-विषमम्, सुख-दुःखाद्यनुभूतिप्रधानम्। खिन्नचेतोविनोदाय नाट्यं प्रेष्टं साधनम्। नाट्यं विषण्णस्य विषादापहम्। खिन्नस्य खेदापनोदनम्, आर्तस्य आर्तिहरम्, आदिपीडितस्य मानसिकोपचारसदृशम्, उत्पीडितस्य मार्गप्रदर्शकम्, यथायथं सर्वेषाम् उपकारि च। श्रान्तचित्तविनोदनस्य नान्यसाधीयान् पन्थाः। कानिचित् नाटकानि उपदेशप्रदानि। कानिचित् शिक्षाप्रदानि। कानिचित् देशभक्ति-भगवद्भक्ति-समाजसेवा-परोपकारादिभावसमन्वितानि च प्राप्यन्ते।

एवं नाटकानि सर्वजनहृद्यानि सर्वविधज्ञानप्रदायकानि सर्वमनस्तोषकाणि इति उत्प्रेक्ष्य एव उपगीयते **काव्येषु नाटकं रम्यम्** इति।।

९. काव्येषु नाटकं रम्यम् :-

काव्येषु नाटकं रम्यम् इति प्रथिता सूक्तिः। नाटकानां रम्यत्वं जिज्ञासितं चेत् स्वानुभूत्यैव तेषां महत्त्वं स्फुटीभवति। काव्यं श्रव्यम्। तत्र अध्ययन-अध्यापनादिद्वारा तत्त्वार्थबोधः। नाटकेषु तु श्रवणदर्शनादिद्वारा रसानुभूतिः। वेष-भूषाद्यलङ्करणात्, प्राकृतिकदृश्यसंयोजनात्, आङ्गिक-वाचिकाद्य-भिनयसम्मिश्रणात्, नृत्यगीतलास्यविलासात् न केवलं सचेतसाम् एव रसास्वादः मनस्तोषष्टा, अपि तु आबालवृद्धं शिक्षितानाम्, अशिक्षितानाम्, नाराणां नारीणां च आनन्दावाप्तिः मनोरञ्जनं च भवति। सकलेऽपि भुवने नाट्यानां प्रसिद्धेः एतदेव मूलम्। उक्तं भरतेन-

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगः, न तत् कर्म, नाट्येऽस्मिन् यन्न दृश्यते।।[1]

नाट्यस्य महत्त्वं नाट्यशास्त्रे भरतेन सविस्तरं व्याख्यायते। तद्यथा-

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतत् भविष्यति।।[2]

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतत् भविष्यति।।[3]

1. नाट्य. प्रथमाध्यायः श्लो. ११६. पृ. ३९. 2. नाट्य. प्रथमाध्यायः श्लो. ११५. पृ. ३९.
3. नाट्य. प्रथमाध्यायः श्लो. ११४. पृ. ३८.

उत्तम-अधम-मध्यमानां सर्वेषाम् अपि नृणां हितोपदेशकारि धृतिदं विनोदजनकम् आनन्दप्रदं चैतत् भविष्यति। तद्यथा महर्षिभरतोक्तावेव—

उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।
हितोपदेशजननं धृति-क्रीडा-सुखादिकम्।।[1]

उदाहरणार्थम् अभिज्ञानशाकुन्तलं महाकवेः कालिदासस्य प्रतिभायाः परिपाकेन, रचनाकौशलेन, भावसौष्ठवेन, भाषामाधुर्येण, सरसाभिव्यक्त्या, सालंकृतपदावल्या प्रकृतिचित्रण-पाटवेन, रसपरिपाकेन[2]नीरसकथानके सरसतासम्पादनेन, मूलकथापरिवर्तने नैपुण्येन च काव्येषु नाटकस्य अभिज्ञानशाकुन्तलस्य सर्वोत्कृष्टत्वं सर्वैः साहित्यसहृदयतल्लजाः मन्वते। अत एव अभिज्ञैः कथ्यते - **काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला** इति।

एतादृशं संस्कृतरूपकसाहित्यं पुरातनम् अतिविस्तृतम्। संस्कृते बहवो रूपककर्तारः सन्ति। सन्दर्भेऽस्मिन् तादृशरूपकर्तॄणां रूपकाणां च केषाञ्चित् नामतःकीर्तनं विधास्यते।

१०. प्रसिद्धरूपककाराः तेषां रूपकाणि च :-

संस्कृतनाटकसाहित्ये भास-कालिदास-अश्वघोष-शूद्रक-विशाखदत्त-भट्टनारायण-भवभूति-मुरारि-राजशेखर-क्षेमेन्द्र-वामनभट्टबाण-जयदेव-रामचन्द्र-श्रीकृष्णदेवराय-अप्पय्यदीक्षित-वेङ्कटाध्वरिप्रमुखाः विलसन्ति प्रसिद्धनाटककाराः। तेषां दार्शनिकग्रन्थप्रणयने इव अत्रापि आदरः वरीवर्ति। महाकविकालिदासस्य अभिज्ञानशाकुन्तलम्, महाकविभवभूतेः मालतीमाधवम्, शूद्रकस्य मृच्छकटिकम् इत्यादिषु एतादृशरूपकेषु श्रीवेङ्कटाध्वरिविरचितं **प्रद्युम्नानन्दीयनाटकम्** अपि अन्यतमम्।

---

1. नाट्य. प्रथमाध्यायः श्लो. ११३. पृ. ३८.
2. अभिज्ञानशाकुन्तलम् प्रथमसर्गः।

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।
इयमधिकमनोज्ञा शैवलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। २०।।

११. प्रद्युम्नानन्दीयनाटकम् - तद्वैशिष्ट्यञ्च :-

षोडशशताब्दप्रभवीयेन श्रीमद्वेङ्कटाध्वरिणा शताधिकग्रन्थकर्त्रा रचितेषु ग्रन्थेषु **प्रद्युम्नानन्दीयनाटकम्** अन्यतमम् अस्ति। श्रीकृष्णपुत्रस्य प्रद्युम्नस्य रतेः च प्रणयवृत्तान्तः अत्र वर्णितः विषयः अस्ति। नाटकमिदम् उदारवीरशृङ्गारोपेतं नव्यं श्लेषयमकचमत्कारविचित्रितं, सुरुचिरं, सुमनोहरम् अनितरसाधारणरीत्या कविना निर्मितम्। अत्रत्य शैली गम्भीरा, उत्कृष्टा च।

नाटकमिदं धर्मार्थकाममोक्षाणां सरसशैल्या सन्धायकं विद्योतते। अत एव एतन्नाटकं भगवतः तिरुपतिवेङ्कटेशस्य उत्सवेषु प्रदर्शनायोग्यतां समपद्यत इति N.C.C[1] मध्ये मातृकासु[2] च उट्टङ्कितम्। सामान्यतः नाटकेषु शृङ्गाररसप्रधानेषु नायिका-नायकयोः प्रथमाङ्के समागमः अनन्तरं कारणान्तरवशात् द्वितीयाङ्के विरहवेदनानुभवः इत्यादिसरणिः प्रक्रियामाणा सन्दृश्यते। परं नाटकेऽस्मिन् प्रथमाङ्के सुन्दर्याः नायिकायाः न केवलं सन्दर्शनम्, किन्तु प्रथममेव तत्सखीभ्यां नायकस्य प्रत्यभिज्ञाने क्रियमाणेऽपि प्रत्यभिज्ञानाभावः परदारत्वेन तस्याः निराकरणम्, निराकरणेऽपि तस्यां नायकस्य सहजानुरागबन्धः इत्यादिमनस्तत्त्वगाम्भीर्यसम्बन्धिनः बहवो विषयाः कविना सहृदयहृदयनिखातं यथा भवन्ति तथा निरूपिताः। भारतीयात्युत्कृष्टव्यक्तिधर्माणां नाटकमिदं दर्पणायते। समाजेऽस्मिन् माता-पितृसम्बन्धः इदानीमत्यन्तदुर्बलः दरीदृश्यते, नाटकदर्शनेन सामाजिके तादृशीसत्सम्बन्धः जागरितो भवति।

किन्तु नाटकेऽस्मिन् न केवलं नायिकासमागमः कवेः अभिप्रेतः अपि तु भगवत्स्वरूपयोः रुक्मिणी-कृष्णयोः मातृ-पित्रोः समवधाने तत्सरूपयोः रति-मन्मथभावेन अवस्थितयोः मायावती-प्रद्युम्नयोः निष्प्रत्यूहं समागमः कवेः तात्पर्यविषयीभूतः, येन मानवजीवने मानवीयसफलजीवनप्रदात्रोः माता-पित्रोः महत्त्वं व्यक्तीभवति। तादृशस्यास्य भारतीयसंस्कृतिरीत्या आलंकारिकदृष्ट्या मनोवैज्ञानिकदृष्ट्या च विशिष्टस्यास्य नाटकस्य सम्पादनम् अध्ययनञ्च आत्मनः समाजस्य च जीवनसफलतायै हेतुः भवतीति तत्सम्पादने यत्नः क्रियते।

---

1. N.C.C. "Staged at the festival of lord Śrīnivāsa of Tirupati."
2. GOMIL Descriptive Catalogue P. 8422 MS. No. 12545

   The drama is said to have been staged on the occasion of the festival celebrated in honour of God Śrīnivāsa of Tirupati.

नाटकादौ नायकस्य प्रत्यभिज्ञानाभावेन प्रत्यभिज्ञानोपायसम्पादनं सर्वमपि नायिकया मायावत्या क्रियते। ततः लब्धप्रत्यभिज्ञेन नायकेन नायिकायाः विपन्निवारणे शम्बरवधद्वारेण महान् यत्नः क्रियते। येन नायिका-नायकयोः उभयोरपि विलक्षणं समप्राधान्यं नाटकेऽस्मिन् व्यक्तीभवति। एवं नायकयोः द्वयोरपि समुचितक्रियाशीलतानिरूपकमिदं नाटकं नाटकान्तरेभ्यः अत्यन्तविलक्षणम्। ततः स्वयं कामितेन निराकृतायाः अपि नायिकायाः प्रत्यभिज्ञानशून्ये नायके कोपाभावः नायिकायाः उदात्ततां प्रौढिमाणं च द्योतयति।

एवम् अत्यन्तसुन्दरस्य नाटकस्यास्य सम्पादनम् अवश्यकर्तव्यमिति तत्प्रयत्नो विधीयते। एवं महोत्कृष्टतमम् इदं नाटकं विद्वज्जनपरितोषाय समर्पणीयमिति धिया अनुसन्धात्रा स्वीकृतम्।

१२. काव्यवैशिष्ट्योपसंहारः :-

एवमत्र वेदवाङ्मयस्य पुराणवाङ्मयस्य च परिचयः कृतः। तयोः महत्त्वं च निरूपितम्। तयोः उत्तरोत्तरं पाक्षिकमादरणञ्च सूचितम्। तद्विलक्षणतया काव्यस्य सर्वपाठकजनग्राह्यत्वेन वैशिष्ट्यं निरूपितम्। काव्यस्य स्वरूपं वर्णितम्, काव्यप्रयोजनानि च प्ररूपितानि। काव्यस्य सामान्यभेदाः, रूपकस्य प्रकाराश्च प्रदर्शिताः। नाटकोत्पत्तिः, नाटकानां महत्त्वं, रमणीयता च प्रतिपादिता। अन्ते प्रद्युम्नानन्दीयनाटकस्य वैशिष्ट्यं च न्यरूपि।

अथ नाटककर्तुः परिचयः, तस्य कृतयः, मातृकासम्पादनम् इत्यादिविषयाः प्रतिपाद्यन्ते।।

नाटककर्तुः परिचयः

१. श्रीमद्वेङ्कटाध्वरिः

संस्कृतवाङ्मये रामानुजानुयायिसम्प्रदायीयः काञ्चीपुरवासी अरशाणफालैग्रामीयः शताधिकग्रन्थकर्ता महाकविः श्रीमद्वेङ्कटाध्वरिः श्रेष्ठतमः। अस्य मातुः नाम सीताम्बा। पिता च ख्यातः श्लेषयमकचक्रवर्ती श्रीरघुनाथदीक्षितः। **अप्पयाचार्यः, अप्पयगुरुः** इत्युपाह्वयस्य श्रीनिवासमखिनः पौत्रः आसीत्। एतत् सर्वं स्पष्टतया प्रद्युम्नानन्दनाटकपुष्पिकातः[1] किञ्चिज्ज्ञातुं शक्यते।

कवयः त्रिप्रकाराः - १. स्पर्धया महाकवित्वयशोलिप्सया विषयेषु विरक्तिं वहन्तः प्रथमश्रेण्यामायन्ति, स्तोत्रकाव्ये वेदान्तदेशिकादयः। यथा - **पादुकासहस्रम्**[2]।

२. ये च वैषयिकीं भोगतृष्णाम् अजहतः शब्दार्थयोरुपरि स्वाधिकारमिव प्रज्ञामपि नवनवोन्मेषां विचित्रार्थविष्फारणपटीयसीं प्रदर्शयन्तः, ते द्वितीयश्रेण्यामायान्ति मयूरादयः। यथा- **सूर्यशतकम्**।

---

1. अत्रैवानुसन्धानग्रन्थस्य तृतीयाध्याये प्रद्युम्नानन्दीयनाटकस्य प्रथमाङ्कस्य पुष्पिकायाम् - पृ. 82

।। इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवप्पयाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसम्भवेन काञ्चीनगरवास्तव्येन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके प्रथमोऽङ्कः।।

H.C.S.L. P. 513-514. **Veṅkaṭādhvarin** or **Veṅkaṭācārya** was the son of Raghunātha and Sītāmbā of the Ātreyagotra. His grand father Śrīnivāsa known as Appayaguru was the nephew of the great Tātācārya (Pañcamatabhañjana Tātācārya)

2. लक्ष्मी. रत्न. पृ. ३

३. ये तु मुग्धकवयः प्रभवन्तोऽपि सरसकाव्यनिर्माणे विविधराजसभासु प्रविष्टाः सम्माननाम् आकांक्षन्तः वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे इत्युक्तरीत्या नृप-तत्पत्नी-पुत्रादिमिथ्यास्तवेन अमलामपि स्ववाणीं कलुषयन्ति उदरम्भरयः - ते एते तृतीयायां श्रेण्याम् आतिष्ठन्ते, ईदृशास्तु विद्यानाथादयः। यथा - **प्रतापरुद्रयशोभूषणम्, प्रतापरुद्रकल्याणम्।**

तेषु तत्रभवान् सकल-कविकुलमूर्धन्यस्सर्वतन्त्रप्रतिभाविशेषश्श्रीमदात्रेयवेङ्कटाध्वरिकविः द्वितीयश्रेण्यां निवेशनमर्हति। एष हि महाकविः अधिगतशास्त्रसारोऽपि काव्यपथे -

१. विश्वगुणादर्शचम्पू-वरदाभ्युदयचम्प्वादि - प्रबन्धानाम्,
२. प्रद्युम्नानन्दीय-शृङ्गारदीपादि - रूपकाणाम्
३. सुभाषितकौस्तुभादि - चाटुकाव्यानां

इत्यादिप्रबन्धानां निर्माणेन लोके स्वकीर्तिं प्रतिष्ठापयामास।

शास्त्रेषु वैदुष्यम्, पटीयसी काव्यनिर्माणप्रतिभा च **वरदाभ्युदयचम्पूप्रबन्धे** कविरसौ स्वस्य चतुश्शास्त्रपारावारपारीणतां रसालङ्कारसरणिमादृत्य विविधकाव्यनिर्माणधुरीणतां च स्वयमित्थं प्रकटयामास।

व्यायामं गमिता त्वलङ्कृतिपथे व्यापारिता व्याकृतौ
तर्कारण्यगतागतैः श्रमवती तन्त्राङ्गणे नर्तिता।
त्रय्यद्रेरधिरोपिता च शिखरं तर्षादियं भारती
गम्भीरं गजभूधरेश्वरकथागङ्गाझरं गाहते।। इति।।

अनल्पकल्पनाभरिते काव्यपथे इव **व्याकरणे-** महाभाष्यस्फूर्तिं, **तर्कशास्त्रे-** मणिसारखण्डनं, **मीमांसायाम्-** विधित्रयपरित्राणं, **विशिष्टाद्वैतवेदान्ते-** नयद्युमणिदीपिकां च प्रणीतवानेषः स्वीयां चतुश्शास्त्रपारीणतां प्राचीकशत्। चम्पूग्रन्थानेकान्, नाटकानि च त्रि-चतुराणि, लक्ष्मीसहस्र-श्रवणानन्द-प्रभृतीनि च विविधस्तोत्राणि एतत्कर्तृकाणि पठतामस्य श्लेषयमकचक्रवर्तिबिरुदम् अन्वर्थमेवेति सहृदयानां चेतसि प्रतिभायात्। कल्पनाप्रवाहकरम्बितां विसृत्वरीं प्रतिभाम् अस्य साक्षात् अध्यक्षयद्भिः समकालिकैः पण्डितप्रवरैः अयमपि कविः सबहुमानम् उपश्लोकित इति कञ्चित् मुक्तकश्लोकं श्लेषचमत्कृतं रसिका उदाहरन्ति।

यथा - **वेङ्कटाध्वरिणाऽनेन जितौ गुरुफणीश्वरौ।**
धिषणाहीनतां प्राप्तौ जग्मतुर्जीवशेषताम्।।[1] इति।

प्रद्युम्नानन्दीयनाटके प्रस्तावनायां सूत्रधार-नटयोः सम्भाषणमुखेन नाटककर्त्रा वेङ्कटाध्वरिणैव स्ववंशावलीम्, जीवनगताः विशेषाश्च इत्थं व्यजिज्ञपत्।

सूत्रधारः :- ... मारिष! तदेतदवधार्यताम् —

आविर्भावमुपेयिवान् शुभयश*स्यत्रेः पवित्रे कुले*
***श्रीमानप्पयदेशिकाध्वरिमणि*-र्जागर्ति कीर्त्या भुवि।**
अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्षमाभृत्पतिः
तां वैतानवपाहविः कबळनक्रीडां पुनस्स्मारितः।। १.५।।

अपि च स एव संस्कृतनाम्ना—

अत्रेरत्रपवित्रयन्नभिजनं जागर्ति बोधाम्बुधिः
श्रीमानाश्रयतां भवार्णवतरिश्-*श्रीश्रीनिवासाभिधः*।
यूपो यत्कृतवाजपेयमखभूवेदिप्रतिष्ठो वह-
त्याशामण्डनकीर्तिपाण्डरजयच्छत्रैकदण्डश्रियम्।। १.६।।

किञ्च— **यतिपतिमतधुर्यो यस्य सिंहासनस्थ**
क्षितिपतिगुरुरुच्चैरद्भुतौदार्यधैर्यः।
अजनि विमलशीलो मातुलो भूतलोद्यत्
कुमततिमिरसूर्य-*स्तातयाचार्यवर्यः*।। १.७।।

तस्य किल तनूभवः -

आत्रेयान्वयजृम्भितस्सततमप्यन्तर्मुकुन्दं वहन्
सारज्ञै *रघुनाथदीक्षित*-कविक्षीराब्धिराराध्यते।
प्रौढालङ्करणा पवित्रपदविन्यासा गभीरध्वनिः
यस्यास्यादुदिता ददाति कवितास्वर्धेनुरर्थान् बहून्।। १.८।।

---

1. लक्ष्मी. रत्न. पृ. ३

किञ्च— **परमप्रभयाऽतुलो कलङ्कः कृतदानष्टा महाच्छविः प्रहस्ते।**
भुवि भाति विधूतदूषण-*श्रीरघुनाथार्यमखी* यथार्थनामा।। १.९।।

तस्यैतस्य तनूभवः कविरयं त्र्यञ्चलव्याक्रिया
तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।
तत्तादृक्कविता सरोजसविता दत्ताशयश्श्रीपतेः
शेषक्ष्माधरवासिनष्टारणयो-*श्श्रीवेङ्कटार्याध्वरी*।। १.१०।।

तेन किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवम् नाटकमभिनयद्भिरस्माभिरानन्दयितव्या परिषदेषा।

नटः :- हृदयङ्गमोऽयं परिषदभितोषणोपायः। सारग्राही खल्वसि। तथा हि—

कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-
स्वैरोदञ्चितशीधुपूरसुहृद-*श्श्रीवेङ्कटार्योक्तयः*।
श्रोत्रैर्या सुचिरं निपीय दधते शृङ्गारपारङ्गताः
***श्रीमत्तिर्मलरायपण्डितमुखा*-श्श्लाघाविलोलं शिरः।। १.११।।**

किं बहुना—***एकेनैव दिनेन काव्यरचनामीष्टे*** **विधातुं तथा**
शास्त्राणामपि शक्नुयात् कलयितुं टीकामनायासतः।
शक्तो युक्तिमहोर्मिभिश्शमयितुं दुर्वादिगर्वानलं
दासश्श्रीसखसेविनां स जयति *श्रीवेङ्कटार्याध्वरी*।। १.१२।।

अपि च— **अच्छलवादरणेच्छो रक्षोपायक्षमात् स *रघुनाथात्*।**
अतिथिजनकोमलमना जातश्श्रयते पराङ्कुशस्य स्मृतिम्।। १.१३।।

सूत्रधारः :- साधु मारिष! सर्वमपि दैवानुग्रहात् साम्प्रतमुपपन्नमिति नाट्यसामग्रीः पश्य।

***आत्रेयस्य कवेरुदारफणिति*-श्श्रोत्रेषु हर्षं सतां**
दुग्धे मुग्धवधूजनाधरसुधाऽहङ्कारहुङ्कारिणी।
सारङ्गाष्टा सभासदो वयममी सर्वोत्तरानर्तने
प्रायः किं बहुना चिरात्फलति नः प्राचीनभाग्यागमः।। १.१४।। —इति।

अथ अत्रिमहर्षि-गोत्रापत्यानां पट्टिका अनन्तरपुटे दीयते, तदनन्तरं तद्वंशावलिः कथ्यते।

२. वंशावलिः :-

२.१. अत्रिमहर्षि-गोत्रापत्यानि

↓

प्रणतार्तिहराचार्यः

(भाष्यकारैः - वेदान्तोदयन इति बिरुदम्, किडाम्बि आच्चान्- इति सम्प्रदायनाम, मडप्पलनि आच्चान् इति महानसिकतया द्राविडभाषास्थ नाम।)

↓

रामानुजाचार्यः

↓

श्रीरङ्गाचार्यः (पद्मनाभाचार्यः)

↓

रामानुजाचार्यः (कीर्तिचन्द्रिकां व्यतनोत्)

(वादिहंसाम्बुदाचार्य इति बिरुदं, किडाम्बि अप्पुल्लार् - इति सम्प्रदाय नाम, कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य वेदान्तदेशिकस्य मातुलः आचार्यष्ठा - न्यायकुलिशादिप्रबन्धकर्ता, अस्य गुरुः - **वात्स्य वरदाचार्यः** "नडादूर अम्माळ्" इति तमिळग्रन्थं व्यरचयत् अयं गुरुः।)

↓

→ **वरदाचार्यः** → **वेङ्कटाचार्यः** → **रामानुजाचार्यः** → **रङ्गनाथाचार्यः** → **रामचन्द्राचार्यः** → **प्रणतार्तिहराचार्यः** → **लक्ष्मणाचार्यः** → **वेङ्कटाचार्यः** → **श्रीरङ्गाचार्यः** → **नरसिंहाचार्यः** →

↓

पद्मनाभाचार्यः

↓ ↓ ↓

सुन्दराचार्यः
(पेरम्बै ग्रामवासी)

वरदाचार्यः
↓
श्रीनिवासाध्वरिः
(महादेशिकन् कूटस्थर्)
(बहवोऽग्रहाराः बहवः क्रतवष्ठानुष्ठिताः। **अप्पयगुरु** इति प्रसिद्धः। अस्य तिस्रः पत्न्यः आसन्।)

इष्टिगोपालाचार्यः
(कावेरीरङ्ग इति नामान्तरेण प्रसिद्धेन भगवता श्रीरङ्गनाथेन विराजमानम् उत्तरनेल्लूरु नगरं स्ववासमकरोत्)

↓ ↓ ↓

1. प्रथमपत्न्याम्
१. सुन्दराचार्यः

2. द्वितीयपत्न्याम्
१. अन्नावरदाचार्यः
२. श्रीनिवासाचार्यः
३. वेदान्ताचार्यः (ताम्रपर्णीवासी)
४. निर्मङ्गलं ताताचार्यः

3. तृतीयपत्न्याम्
१. रघुनाथदीक्षितः
(वेङ्कटाध्वरिणः पिता)
२. ताताचार्यः (सन्तानरहितः)
३. वेङ्कटनाथाचार्यः (,,)

---

१. **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी-तत्कृतीनाम् अध्ययनम्** इति ग्रन्थे **जीवनवृत्तम् तत्कृतयः** इति शीर्षके वंशवलीव्यासमधारीकृत्य निर्मिता इयं पट्टिका। पृ. 4-6.

श्रीनिवासाध्वरिणः तृतीयपत्न्याम् उत्पन्नस्य रघुनाथदीक्षितस्य पुत्रः

↓

वेङ्कटाध्वरिः ***(आत्रेयवंशतिलकः)***

↓

आत्रेयश्रीनिवासाचार्यः
(अरशाणिफालै ग्रामवासी)

↓

१. कृष्णमाचार्यः
२. गोपालाचार्य (आदिकाः)

२.२. स्वरचितेतरग्रन्थेषु वंशावलिक्रमः :-

विश्वगुणादर्शचम्प्वाम् अयं महाकविः स्वपरिचयम् इत्थं वक्ति-

काञ्चीमण्डलमण्डनस्य मखिनः कर्नाटभूभृद्गुरोः
तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः।
अस्तोकाध्वरकर्तुरप्ययगुरोरस्यैव विद्वन्मणेः
पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते।। २।।[1]

काञ्चीमण्डलभूषणस्य प्रशस्तयागकर्तुः कर्नाटभूभृतः श्रीकृष्णदेवरायस्य गुरोः पञ्चसंस्कारकर्तुः दिगन्तेषु कान्तयशसः **ताताचार्यस्य,** भागिनेयः श्रीनिवासः **अप्पयगुरुः** इति ख्यातः। वाजपेय-पौण्डरीकादीनां कर्तुः विद्वन्मणेः अस्य अप्पयगुरोः पुत्रः **श्रीरघुनाथदीक्षितो** नाम कविः गुणैः वर्धते - इति श्लोकसारः।

तत्सुतस्तर्क-वेदान्त-तन्त्र-व्याकृतिचिन्तकः।
व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी।। ३।।[2]

तस्य रघुनाथदीक्षितस्य सुतः तर्क-वेदान्त-मीमांसा-व्याकरणेषु पण्डितः वेङ्कटाध्वरिनामा कविः विश्वस्य गुणानाम् आदर्शमिव (प्रतिपादकमिव) चम्पूप्रबन्धं करोति इति अस्य श्लोकस्य भावः।

1. वि.गु. श्लोकः - २.

2. वि.गु. श्लोकः -३.

विश्वगुणादर्शे विद्यमानयोः द्वितीय-तृतीयश्लोकयोः संक्षेपेण स्वकीयवृत्तं निवेदितं कविना। तस्मादयं श्रीमदप्पयगुरोः नप्ता, श्रीरघुनाथदीक्षितस्य च पुत्र इति ज्ञायते। अयम् ***अप्पयगुरुः,*** "**कुवलयानन्द-चित्रमीमांसा**दिग्रन्थकर्तुः तत्रभवतः **अप्पयदीक्षितेन्द्रात्** भिन्नः"[1] - इत्यवगम्यते।

अत्रत्योऽयम् अप्पयगुरुस्तु ताताचार्यस्य भागिनेयः परोपकाररतश्चासीत् इति निश्चीयते। अनेन ताताचार्येण **सात्त्विकब्रह्मविद्याविलासः** इति प्रसिद्धो वेदान्तशास्त्रग्रन्थो व्यरचि इत्यपि श्रूयते। अयमेवाभिप्रायः विश्वगुणादर्शचम्प्वाः प्रकाशकः श्यामरायविट्ठलमहोदयः विस्तृताङ्ग्ल-भूमिकायाम् इत्थमभाणीत् -

The name of its author is *Veṅkaṭādhvari*, or, as some of our copies read it, *Veṅkaṭācārya.* In the short account of his origin contained in the second and third verses of the work, the author gives his father's name as *Rāghunāthadīkṣita* : the son of *Appaya Guru.* It is also mentioned therein that this Appaya Guru was the nephew (sister's son) of *Tātārya*, the spiritual preceptor of *Kṛṣṇarāya*, king of the *Karnāṭak.*[2]

अयं प्रलयकावेरी नाम्नः कस्यचिद्राज्ञः सभायां प्रमुखः पण्डित आसीत्। अन्याप्येतत्स-म्बन्धिनी लोकवार्ता श्रूयते यत् - अनेन विश्वगुणादर्शकाव्यं स्तुतिनिन्दात्मकं विरचितमिति तस्य देवताप्रकोपात् काणत्वं प्राप्तं, ततष्टा स लक्ष्मीसहस्रं विरचय्य जगज्जननीं महालक्ष्मीमस्तौषीत्। तदनु तत्प्रसादात् पुनः पूर्ववद्दृष्टिः सम्प्राप्ता इति।[3]

---

1. वि.गु. बालकृष्णशर्मा, भूमिका, पृ. ९
यतः स अप्पयदीक्षितो द्रविडजातीयः, भगवतः श्रीशिवस्य परमो भक्तः, अद्वैतमतपक्षपाती, वैष्णवमत-खण्डकश्चासीत् इति तु तद्वृत्ततः ज्ञायते। किञ्च - "वेङ्कटपतिनामधेयस्य कस्यचिद्राज्ञः सभायां वेदान्त-धर्मशास्त्रादिविषये ताताचार्यमतमनेन अप्पयदीक्षितेन खण्डितम्। ततः प्रभृति ताताचार्यः अप्पयदीक्षितेन दृढतरबद्धवैर आसीत्। नैतावदेव, केनापि प्रकारेणायं हन्तव्यः इत्यपि निश्चिकाय। ततश्चैकस्मिन् समये ताताचार्येण तत्रभवन्तं दीक्षितं विपिनमार्गेण गच्छन्तं ज्ञात्वा तद्वधाय चण्डालाः प्रेषिताः। परन्तु शिवभक्तिपरायणः दीक्षितेन्द्रः तस्मिन्नरण्ये सहसाऽऽविर्भूतेन केनचिद्वीरपुरुषेण रक्षितः" - इति तयोः वैरवृत्तान्तः।
2. वि.गु. आङ्ग्लभूमिका (Introduction), श्यामरायशर्मा विठ्ठलः। पृ. १
3. वि.गु. बालकृष्णशर्मा, भूमिका, पृ. ९

३. वेङ्कटाध्वरिः - तस्य कालः

काञ्चीमण्डले अरशाणिफालाग्रहारे लब्धजनुषोऽस्य तत्रैव विद्या ग्रहणादिना बाल्य-कौमारवयसी यापितवतः प्रौढां दशामारभ्य आदेहपातं काञ्च्यामेव अस्य अवस्थानमिति विमर्शकजनवचनादवगम्यते। अस्य आवासकालश्च प्रायः **क्री.श. 1550-1650** मध्ये भवतीति विमर्शकाः अभ्यूहन्ते।

१. वेङ्कटाध्वरिः नीलकण्ठदीक्षितस्य सहपाठी आसीत्। नीलकण्ठदीक्षितः अप्पय्य-दीक्षितसहोदरस्य पौत्रः आसीत्। अतः एतस्य कालः क्रीस्तोः परं १६३७ वत्सरः इति वक्तुं शक्यते।[1]एषः रामानुजस्य विशिष्टाद्वैतमतानुयायी वर्तते। वडगलै सम्प्रदायसम्बद्धः। ततश्चैवं प्रतीयते - **नीलकण्ठदीक्षितः,** अप्पयदीक्षितस्य पौत्रः, नारायणदीक्षितस्य च पुत्रः आसीदिति **काव्यमाला**ख्यमासिकपुस्तकस्य प्रथमगुच्छान्तर्गतश्रीमदप्पयदीक्षितप्रणीत**वैराग्यशतका**ख्यग्रन्थस्य प्रथमश्लोकटिप्पण्यां दृश्यते। अनेन नीलकण्ठचम्पूरचयिता, तत्प्रारम्भे स्वकीयग्रन्थनिर्माण-कालश्चापि निर्दिष्टः -

अष्टात्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु। (४७३८)
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम्।। इति।

तस्मादेवं निश्चीयते ४७३८ तमे वर्षे नाम ख्रिस्ताब्दं १६३७ तमं तस्मिन्नेव वर्षे नीलकण्ठचम्पूः विरचिता, तत्समकालीनश्चायं वेङ्कटाध्वरिनामा कविरासीत्, ततश्च २६२ वत्सरेभ्यः प्राक् अयं विश्वगुणादर्शकर्ता कविः सुप्रसिद्धः आसीत् इति। परं च तेनायं ग्रन्थः कस्मिन् वर्षे निर्मित इति तु न याथार्थ्येन निश्चेतुं शक्यते, केवलं २६२ वर्षेभ्यः प्राक्तनकालीनोऽयं ग्रन्थ इत्यनुमीयते[2]।

1. सं.सा.च. पृ. ४८४. एषः क्रीस्तोः परं १६३७ वत्सरसम्बद्धः।
2. वि.गु. आङ्ग्लभूमिका (Introduction), श्यामरायशर्मा विठ्ठलः।
"The author of the work in question ***(Viśvaguṇādarśa)*** was a contemporary and school-mate of ***Nīlakaṇṭhadīkṣita,*** who wrote a work called ***Nīlakaṇṭhacampū*** in 4738 of the ***Kali*** era and therefore flourished 251 years ago. The exact date when the ***Viśvaguṇādarśa*** was written cannot be given. We can only say that the author lived about 250 years ago. He lived at an ***Agrahāra*** called ***Arśanaphāl*** in the town of ***Kāñcīpura*** and was a descendant of the renowned family of ***Tātācāri,*** a ***Vaḍaghalai Vaiṣṇava,*** whose family has borne the title of ***Tātācāri*** considered to be a corruption of ***Dāsa,*** the ancestor being a great devotee of ***Tirupati Veṅkaṭaramaṇa.*** But tradition says that the name ***Tātācāri*** was given, because the Tirupati God being pleased with the devotion of the man called him ***Tātā*** (Grandfather) when he addressed him."

अन्यदप्यत्रत्यमुद्रितपुस्तकप्रस्तावनायां किञ्चिद्वृत्तमुपलभ्यते - अयं वेङ्कटाध्वरी काञ्चीपुरसमीपे अर्शनफलनाम्नि अग्रहारे प्रतिवसति स्म। **वडघले** इत्याख्यवैष्णवसम्प्रदाय-पक्षपातितातााचार्यन्वयोत्पन्नश्चासीत् इति।

२. अथास्य विश्वगुणादर्शग्रन्थस्य कालनिर्णायकं लिङ्गम् तस्मिन्नेव ग्रन्थे दृश्यते तत्-

हूणाः करुणाहीनास्तृणवत् ब्राह्मणगणं न गणयन्ति।
तेषां दोषाः पारेवाचां ये नाचरन्ति शौचमपि।।

इत्यादि यत् हूणानां (गौरकायाङ्ग्लदेशीयानां) वर्णनम्। तस्मादनुमीयते- ख्रिस्तशकस्य १६४० तमे वर्षेऽयं ग्रन्थो विरचित इति।

३.१. प्रद्युम्नानन्दीयनाटकरचनाकालः :-

१. सर्वासु मातृकासु उपलभ्यमानः ग्रन्थगतश्लोकः :-

नवसन्दर्भमात्रेयो नाटकं *वेङ्कटाध्वरी*।
प्रजोत्पत्तौ प्रौष्ठपद्यां पूर्णिमायामपूरयत्।। ६.३५।। इति।

अयं भावः। आत्रेयगोत्रोत्पन्नः श्रीमद्वेङ्कटाध्वरी प्रजोत्पत्तिवर्षायाः प्रौष्ठपदी(भाद्रपद)-मासस्य पूर्णिमातिथौ प्रद्युम्नानन्दीयाभिधानं नव्यं नाटकम् अपूरयत् - इति स्वयं कविः वदति। अमुमेव विषयं प्रतिपादयति G.O.M.L. **(No. 12545)** Descriptive Catalogue —

"The work is said to have been completed by the author on the full moon day of the Prauṣṭhapada month in the year Prajotpatti." इति।

२. मद्रास्मातृकायां राघवनामकः लेखकः :-

अपि च तत्रैव मातृकालेखकः स्वपरिचयादिभिः सह मातृकारचनाकालं ख्यापयति। तद्यथा–

वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकपुत्रः।
राघव एष इहाण्णयसुरेर्दास इमं व्यलिखत् स्वयमेव।।

अयं भावः। इमं मातृकाग्रन्थं वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकस्य पुत्रः अण्णयसूरेः दासः **राघवः** स्वयमेव व्यलिखत् - इति। तत्रैव मद्रासमातृकायां —

पराभवसंवत्सरम् आपुणिमासं २२ ०उउंते दिशति।
ककष्टिामै पौर्णमि यिन्द दिनत्तिर्व प्रद्युम्नानन्दीयं मुहिजुदु। इति।

एतदेव स्पष्टयति G.O.M.L. **(No. 12545)** Descriptive Catalogue —

"Date of transcription - Saturday, the full moon day and the 22nd of the Āvaṇi month in the year Parābhava" इति।

३. तिरुपतिमातृकायां यज्ञवराहाभिधः लेखकः :-

अथ तिरुपतिमातृकायां लेखकः स्वमातृकालेखनसमयम् इत्थं व्यजिज्ञपत् —

मुनिनिधिविध्यब्धिमिते मन्मथवर्षे कुलीरगे भानौ।
अलिखद्यज्ञवराहो नाटकमेतद्धि कृष्णसप्तम्याम्।।

मन्मथवर्षे कर्कटराशौ कृष्णसप्तम्याम् भानुवासरे अर्थात् क्रीस्तोः परं 1571 संवत्सरे यज्ञवराहनामकः लेखकः नाटकं प्रद्युम्नानन्दीयाभिधम् अलिखत्।

इत्थं ग्रन्थरचनाकालः निश्चयेन ज्ञातुं प्रभवामः। किन्तु कवेः कालविषयेऽपि इतोऽपि विचारः प्रवर्तनीयः अस्ति इति विज्ञाप्यते।

४. वेङ्कटाध्वरिः - तस्य कृतयः

तत्रभवतो अष्टभाषाचक्रवर्तिनो वेङ्कटाध्वरिणो ग्रन्थाः अष्टोत्तरशताधिका सन्ति। एतच्च तद्वंशीयैरुक्तम् इति **श्लेष-यमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनामध्ययनम्** इति ग्रन्थात् ज्ञायते।

४.१. मुद्रितग्रन्थाः

१. **आचार्यपञ्चाशत्** :- वेदान्तदेशिकविषयकः स्तोत्रग्रन्थः।

२. **प्रद्युम्नानन्दीयम्** :- प्रद्युम्नरत्योः परिणयप्रतिपादकम् षडङ्कसहितम्। प्रस्तुतानुसन्धात्रा परिशोधनाय स्वीकृतः ग्रन्थः[1]। वेङ्कटाध्विरिणा तु प्रद्युम्नानन्दम् विरचितम् अज्ञात-कर्तृकविरचितम् - अर्थपञ्चकम् इत्यभिधानम् इमामेव कथामाश्रित्य प्रणीतम् अपरं नाटकम् साहित्यचरित्रे दष्टिपथमायाति[2]।

३. **राघवयादवीयम्** :- इदं त्रिंशच्छ्लोकात्मकं काव्यम्। ग्रन्थेऽस्मिन् आनुलोम्येन वाचने रामचरितं प्रातिलोम्येन कृष्णचरितञ्च उपवर्ण्यते[3]।

---

1. सं.सा.च. पृ. 484. एषः क्रीस्तोः परं १३५०वत्सरसम्बद्धः। **प्रद्युम्नानन्दनाटकम्** अस्य कृतिः अस्ति। एतच्च नाटकं षडङ्कोपेतमस्ति। प्रद्युम्नः वज्रनाभं हत्वा, रतिं विवाहयति। इति आन्ध्रभाषायां सूचितम्।
2. **H.C.S.L.** Dṛsya kāvya, P. 665.
   Arthapañcaka nāṭaka :- In five acts of unknown authorship describes how Manmatha was reborn as the son of Śaurirājā, the deity that is worshipped at Kṛṣṇapuram (Tirukkannapuram), Tanjore District, how as an infant he was cast into the sea by Śambarāsura, how the servants of Śambara found the infant in the belly of a fish and how Rati, the daughter of Śambara, enamoured of him, had him tended well, and in the end he married her after killing Śambara.
3. "कञ्चीनिवासिना वेङ्कटाध्वरिणा रामानुजमतानुयायिना १७०७ मितवैक्रमाब्दमभितः स्थितिमता यादवराघवीयसंज्ञकं द्विसन्धानकाव्यं प्रणीतम्। यस्य सम्प्रति त्रिंशदेव श्लोका लभ्यन्ते। तस्य ह्यनुप्रासच्छटा निभालनीया।" इति **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी तत्कृतीनाम् अध्ययनम्** इति ग्रन्थात् अवगम्यते।

४. **लक्ष्मीसहस्रम् :-** क्री.प. १६५० (१७०७ मितवैक्रमाब्दः) वत्सरीयः वेङ्कटाध्वरिः **लक्ष्मीसहस्रम्** इति नाम्ना (१०००) सहस्रश्लोकमितकृतिमरचयत्। अस्यां कृतौ लक्ष्मी-विष्ण्वोः स्तुतिर्वर्णिता। कवेः कल्पना अत्यन्तोत्कृष्टा भक्तिभावपूर्णा च। अतीव कठिनमिदं काव्यम्, प्रयत्नसाध्यमपि सरसमेव। लक्ष्मीस्तुतिपरं सहस्रशलोकात्मकं बृहत्काव्यम्। साक्षाल्लक्ष्म्याः रक्षितृत्वमोक्षप्रदातृत्वादिधर्माः तत्तत्स्तबकेषु निरूपिताः।

५. **विश्वगुणादर्शचम्पूः :-** चम्पूकाव्यजगति वेङ्कटाध्वरिणः स्थानमतीव मत्त्वपूर्णं वर्तते। अस्य कवेः काव्येषु प्रसिद्धं काव्यम् **विश्वगुणादर्शचम्पूः** इति। तत्र चम्पूप्रबन्धस्य लक्षणं वक्ति -

पद्यं यद्यपि विद्यते बहु सतां हृद्यं विगद्यं न तत्
गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।
आधत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयम्
सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः।। ४।।

यद्यपि लोके बहु पद्यकाव्यानि विद्यन्ते। तथापि विगद्यं (चूर्णिकारहितं) तत्पद्यं सतां न मनोहरम्। विजहत् पद्यकाव्यम् अर्थात् केवलगद्यकाव्यं साहितीकुशलानाम् आस्वाद्यतां न प्रतिपद्यते, नापि केवलं पद्यम्। सतां चम्पूप्रबन्धे गद्यं पद्यं च प्रकर्षेण प्रयुक्तं सन्तोषातिशयं जनयति। माक्षिका-द्राक्षयोः सङ्गः कस्य मनसे न रुच्यते ? सर्वस्मै अपि रुच्यत एवेति भावः। आलङ्कारिकाः इदमेव लक्षणं चम्प्वाः लक्षणत्वेन अभिप्रयन्ति।

ग्रन्थस्य कथावस्तु पृष्ठभूमिश्चेत्थम् -

विश्वावलोकस्पृहया कदाचिद्विमानमारुह्य समानवेषम्।
कृशानु-विश्वावसुनामधेयं गन्धर्वयुग्मं गगने चचार।। ५।। इति।

कृशानु-विश्वावसू गन्धर्वौ विश्वभ्रमणाय प्रस्थितौ। तयोः संवादाः अस्मिन् काव्ये सन्ति। अपि च सामाजिकदुराचाराः, तीर्थक्षेत्रमाहात्म्यञ्च कविना वर्णिताः। शैली अनुप्रासमयतया धारालतया अस्ति। समीचीनाः प्रकृतिवर्णना अपि विद्यन्ते। कृशानुविश्वासुनामकयोर्गन्धर्वयोः विमानमधिरुह्य बहुप्रदेशसञ्चारः क्रमशः— सूर्यलोक-भूलोके, भूलोके - अयोध्या-गङ्गानदी-काशी-समुद्र-जगन्नाथक्षेत्र-गुर्जरदेश-यमुनानदी-महाराष्ट्र-आन्ध्रप्रदेश-कर्णाटकदेश-वेङ्कटगिरि-वन-घटिकाचल-दीक्षारण्य-रामानुज-चन्नपट्टण-काञ्ची-श्रीमद्वेदान्तदेशिकाचार्य-कामासिका-

नगरवासिनृसिह-त्रिविक्रम-कामाक्षीदेवी-एकाम्रेश्वर-क्षीरनदी-वाहानदी-तुण्डीरमण्डल-चञ्जीपुरी-यज्ञवाराह-कावेरी-रङ्गनगरी-जम्बूकेश्वर-चोलदेश-शाङ्र्गपाणि-राजगोपाल-सेतु-ताम्रपर्णी-शठकोपमुनि-वेदान्त-ज्यौतिषिक-भिषक्कवि-तार्किक-मीमांसक-वैयाकरण-वैदिक-राजसेवक-दिव्यक्षेत्रप्रभृतीनां वर्णनं सुनिपुणं कृतमस्ति। कविवर्णनं यथा -

माघश्चौरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः।
श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति।।[1]

संवादरूपेण प्रणीतोऽयं ग्रन्थः गुणदोषविवेचनपरः।

अस्मिन् रसालङ्कारादीनि काव्यलक्षणानि सर्वत्र परिपूर्णतया दृश्यन्ते, तथापि अर्थालङ्कारापेक्षया शब्दालंकारेष्वेव (अनुप्रास-यमकादिषु) कवेरतीवादरो दृश्यते, तदनुसन्धानादेव क्वचित् क्लिष्टत्वाप्रसिद्ध-शब्दप्रयोगादयो दोषाः प्रादुर्भवन्ति। एवमपि काव्यस्य सहजमाधुर्य-प्रौढत्वादयो गुणा न विलीयन्ते, तत एवास्य वश्यवचस्त्वं स्फुटीभवति। तथा चास्मिन् विश्वगुणादर्शे तदभिधानानुरूपाः सर्वेऽपि विषया न विद्यन्ते, सतामपि विषयाणाम् आमूलात् समाप्तिपर्यन्तम् एकैव पद्धतिर्नावलोक्यते। अस्य हि प्रथमत एवंरीतिः विश्वावलोककुतूहलौ कृशानु-विश्वावसू द्वौ गन्धर्वौ कल्पितौ। तन्मध्ये एकः (कृशानुः) दोषैकदृक्, अपरो (विश्वावसुः) दृश्यवस्तुनो गुणग्रहणकौतुकी चासीत्।

ततः दृष्टिपथं प्राप्तस्य वस्तुनः प्रथमं विश्वावसुः सानन्दं करोति, ततस्तस्मिन्नेव कृशानुर्दोषारोपं करोति, पुनष्टा तदारोपितं दूषणं विश्वावसुर्निराकरोति। परन्तु इयं पद्धतिः स्पर्धाधीनचित्तत्वात् स्वाङ्गीकृतमतसमर्थननिघ्नत्वाद्वा भिन्ना। एतत् सर्वमपि मार्मिकवाचक-जनैर्वाचनसमयेऽवगन्तुं शक्यमिति न तत्राधिकं लिख्यते। अयं कविर्यद्यपि श्रीरामानुजप्रवर्तित-वैष्णवपथानुगस्तथाप्यन्यसम्प्रदायानामपि याथार्थ्यवेत्ता आसीदिति तु निर्बाधमेव। किञ्चास्य काव्यस्य व्युत्पत्तावतीवोपयुक्ततया काव्यरसिकेषु बहुषु पण्डितेषु महाकवेरस्य ग्रन्थानां च प्रख्यातिर्विद्यते।

1. सं.सा.च. पृ. ५४९ इति ग्रन्थगतविषयस्य अनुवादात्मको भागः अत्र उपस्थापितः।

६. **वरदाभ्युदयचम्पूः :-** वेङ्कटाध्वरिः **चत्वारि चम्पूकाव्यानि** व्यरचयत्। **वरदाभ्युदय**चम्प्वाम् अनेन काञ्चीस्थदेवतानां महत्त्वं वर्णितम्। ब्रह्मकृतहयमेधाग्नौ प्रादुर्भूतस्य वरदराजस्य वैभव-प्रतिपादकपरं काव्यम्। पञ्चमविलासेनैव काव्यं समाप्यते।

६. **श्रीनिवासविलासचम्पूः :-** ग्रन्थेऽस्मिन् दशाध्यायाः सन्ति। अत्र च तिरुमलस्थितदेवतानां वर्णनं दृश्यते। ***पद्मावतीपरिणयचम्पूः*** इति द्वितीयं नामस्या इति कविसम्प्रदायवर्ती कष्टान स्वामी वक्ति। (चेट्लूर् श्रीवत्साङ्काचार्यः) **श्रीनिवासचम्पूः** इत्यपि अस्य नामान्तरम्। अस्मिन् वेङ्कटेश्वरप्रशस्तिः वर्तते।

७. **उत्तरचम्पूः :-** ग्रन्थेऽस्मिन् गद्यपद्ययोः समप्राधान्यं दत्वा रामायण-उत्तरकाण्डकथां स्वीकृत्य स्वतन्त्रतया भोजरामायणमपूरयत्। भोजरामायणे युद्धकाण्डं लक्ष्मणसूरिः वाल्मीकिमनुकुर्वन् अरचयत् (अपूरयत्)।

८. **विधित्रयपरित्राणम् :-** मीमांसाग्रन्थः। प्रसिद्धाप्पयदीक्षितकृतविधिरसायनाभिधस्य मीमांसा-ग्रन्थस्य खण्डनरूपं पुस्तकम्।

९. **श्रवणानन्दः :-** श्रीनिवास-वरदराज-सुन्दरबाह्वादीनां श्रीमन्नारायणमूर्तीनां स्तोत्रकाव्यम्। अत्र प्रपत्तिरूपापन्ना भक्तिः समर्पिता कविना। सहस्रशलोकात्मकमिदं काव्यमिति कवेर्वंशीयस्य सत्सम्प्रदाये निष्णातस्य कस्यचन विदुषष्टोक्तिः[1]। शतकद्वयमेवाधुना लभ्यते।

१०. **सुभाषितकौस्तुभः :-** विवेकपद्धतिः, सज्जनपद्धतिः, दुर्जनपद्धतिः, वदान्यपद्धतिः पिशुन-पद्धतिष्टोति पद्धतिपञ्चकेन विलसतीदं लघुनीतिकाव्यम्।

४.२. अमुद्रितग्रन्थाः

१. **न्यायपद्मम् :-** मीमांसाशास्त्रम् शबरस्वामिनां भाष्यं यथा स्वतन्त्रव्याख्यानम्। सोमेन यजेतेति विधिवाक्स्वरूपविवेचनेन प्रारब्धो ग्रन्थः। हस्तलिखितप्रतिर्लभ्यतेऽसम्पूर्णा।

२. **मीमांसामकरन्दः :-** अयमपिमीमांसाशास्त्रग्रन्थः। न्यायसूत्राणां भाट्टदीपिकावत् स्वतन्त्र-व्याख्यारूपो विस्तृतग्रन्थः। हस्तलिखितप्रतिरूपेण लभ्यते। तत्र तत्र भाट्टदीपिकाऽपि खण्डिता दृश्यते।

1. आत्रेयश्रीनिवासराघवाचार्यः। सेवास्वामी मणिमण्टपः विल्लिवांक, मद्रपुरी ४९.

३. **यतिप्रतिवन्दनखण्डनम् :-** धर्मशास्त्रग्रन्थः। वेदविद्गृहस्थस्यापि यतिना प्रतिवन्दनीयत्वं न शास्त्रसम्मतमित्यत्र निषिध्यते।

४. **शृङ्गारदीपभाणः :-** दशरूपकेषु भाणग्रन्थोऽयमन्यतमः। नागरलिप्यां लिखितप्रतिर्लभ्यते।

४.३. अनुपलभ्यमानग्रन्थाः

१. **आचार्यचम्पूः :-** वेदान्तदेशिकविजयसूचिकाचम्पूः।

२. **रामायणव्याख्या वाल्मीकिहृदयम् :-** इतिहासः।

३. **श्रीकामाशिकानरसिंहस्तोत्रम् :-** विश्वगुणादर्शस्थं कामाशिकानृसिंहवर्णनमेव पार्थक्येनैतन्नाम्ना व्यवह्रियत इति आत्रेयवंशलब्धजन्मा कट्टान श्रीवैष्णवोऽभिप्रैति।

४. **नयद्युमणिदीपिका :-** नयद्युमणेः मेघनादारिसूरिकृतस्य सिद्धान्तसमर्थनरूपो व्याख्यानग्रन्थः। अयं वेदान्तग्रन्थः।

५. **महाभाष्यस्फूर्तिः :-** पतञ्जलिकर्तृकमहाभाष्यस्य कैयटव्याख्यानवत् स्वतन्त्रं स्फूर्तिरिति देशिक-सम्प्रदायवर्तिन एकत्र लेखनम्।

६. **मणिसारखण्डनम् :-** अयं तर्कग्रन्थः। गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थस्य तार्किक-गोष्ठ्यां मणिसार इति टिप्पणी लिखितेति तस्य मणिसारस्येदं खण्डनरूपमिति तत्त्वचिन्तामणिं गौतमस्य न्यायशास्त्रं, कणादस्य वैशेषिकंच परिशील्य कृतमिति वडकलै स्वामी।

७. **मुकुन्दविलासः :-** भाणग्रन्थः।

८. **यथोक्तकारिभाणः :-** अस्यैव काञ्चीभाण इत्यपरं नाम। यथोक्तकारिस्वामिनमुद्दिश्य रचितो भाण इति एतद्वंशीयाः प्रणतार्तिहरादयोऽत्र सन्निधौ कैङ्कर्यं कुर्वन्त आसन्निति श्रीवत्साङ्काचार्याभिधः स्वामी लिखितवानेकत्र निबन्धे।

९. **यङ्लुक् प्रकाशिका :-** व्याकरणम्। यङ्लुगन्तप्रयोगः वेदे एव क्रियते इति केचन वैयाकरणाः। अपरे केचन लौकिकेऽपि वाङ्मये कर्तुं शक्यते इति मन्वते। मतद्वयमाश्रित्य रचितं क्रोडपत्रमित्येकत्र दृष्टम्।

१०. व्युत्पित्सुबाधः :- व्याकरणग्रन्थः। गदाधरभट्टाचार्यस्य व्युत्पत्तिवादं जगदीशशब्दालङ्कार-शब्दशक्तिप्रकाशिकां, वेदान्तिनां मतं, स्वामिदेशिकस्य (वेदान्तदेशिकस्य) न्यायपरिशुद्धिम्, अपरांश्चा बहून् ग्रन्थान् परिशील्य रचितः स्वतन्त्रग्रन्थः। शाब्दबोधप्रकारपरः।

११. श्रीनिवाससहस्रम् :- स्तोत्रग्रन्थः।

१२. श्रीविभुत्वसमर्थनम् :- लक्ष्मीसहस्रे श्रीविभुत्वादिधर्माः लक्ष्म्याः प्रतिपादिताः। तदुपरि आक्षेपाणां खण्डनरूपमिदमिति वेङ्कटाध्वरिविषयनिबन्धे तत्सम्प्रदायस्थः प्रसिद्धविद्वान् लिखति। एतन्नाम्नाऽधुनोपलभ्यमानहस्तलिखितग्रन्थः श्लोकस्थपरिचयेन शैल्या च भिन्नकर्तृकत्वं सूचयति। अपरो ग्रन्थः कष्टानैतदीयो लुप्तः स्यात्।

१३. सुभद्रापरिणयः :- अङ्कद्वमुपलभ्यते इति के. शठकोपाचार्यः। कुत्र लभ्यत इति न तत्र सूचितम्। परन्तु नल्लाकविकर्तृनाम्ना मद्रपुर्यां नाटकमिदमधुना दृष्टिगोचरो वर्तते।

एवमत्र वेङ्कटाध्वरिः तस्य कृतयः उपलभ्यमानाधारैः निरूपिताः। अथ मातृका-सम्पादनविधानं वर्ण्यते।।

प्रद्युम्नानन्दीयनाटकसमीक्षा

१. प्रद्युम्नानन्दीयनाटकाङ्ककथाः

प्रथमाङ्ककथा :–

नारदः दर्भकमुन्याश्रमे वर्धमानस्य प्रद्युम्नस्य यौवनप्रादुर्भावं मायावत्यै निवेदयति इति वृत्तान्तं सूचयन् सूत्रधारः नेपथ्ये श्रूयमाणगीतिमनुसृत्य इदानीं नारदः प्रविशति इति कथयित्वा नटेन सह रङ्गमञ्चात् निष्क्रामति।

विरहिजनकृते वनप्रियो विषमशरोपचयैकसूचकः।
श्रुतिसुखशुभगानदक्षिणः प्रविशति पर्वतकाननान्तरम्।। १.१९।।

इत्येवं गीतिरूपेण नेपथ्यात् रङ्गमञ्चे प्रविष्टः नारदः मायावत्यै प्रद्युम्नवृत्तं निवेद्य, अमरावतीं गच्छन्, महतीस्वरैः इमां गीतिमालपन् मध्ये स्थितं पर्वमुन्याश्रमप्रान्तम् अवतरति – इत्येतावत् प्रस्तावनासारः।

भयङ्करारण्यानि अतीत्य नारदः श्रान्तिहरं पर्वतमहर्षेः तपोवनप्रान्तं प्रविशति। सः बहुधा आश्रमवातावरणं वर्णयति। अपि च नारदः पर्वतेन सम्भाष्य एव अमरावतीं गन्तुं भावयति। अत्रान्तरे योगदृष्ट्यैव पर्वतः नारदम् अवधार्य प्रद्युद्गच्छति। उभयोः परस्पराभिनन्दनानन्तरं पर्वतेन सकुतूहलं पृष्टः नारदः मायावती–प्रद्युम्नयोः वृत्तान्तं एवं श्रावयति–

पूर्वं मन्मथः ध्याने वर्तमानस्य परमेश्वरस्य तपसः भङ्गं करोति। तेन क्रुद्धः शिवः फलनेत्राग्निना तं दहति। अनेन खिन्ना रतिः पुनः स्वभर्तारं लब्धुकामा तपः आचरति। तपसा तुष्टः परमेश्वरः **'ऋक्षवन्तनगराधीशस्य मायाविनः शम्बरासुरस्य निग्रहार्थं श्रीकृष्णात् रुक्मिण्यां प्रद्युम्ननाम्ना जन्मान्तरं प्राप्नोति। तादृशेन तव प्रियेण पुनः समागमिष्यसि तावत्पर्यन्तं शम्बरगृहे मायावतीरूपेण पाकशालाधिकारिणी भूत्वा, मदुपदिष्टया मयाविद्यया निजपातिव्रत्यस्य रक्षणं कुर्वन्ती वस'** इति रतिम् आश्वासयति।

ततः शम्बरः प्रद्युम्नेन आत्मनः वधं विज्ञाय जननात् षष्ठे दिने तम् अपहृत्य समुद्रे पातयति। तत्र तं शिशुं मीनः गिलति। सः मीनः अन्यैः मीनैः सह धीवरेण गृहीतः दैत्यराजगृहम् उपहारतया नीतः। ततः मायावत्याः सन्निधिम् आनीतानां मत्स्यानां कस्यचित् जठरात् कुमारः अवतरति। सः सकलहृदयानि आकर्षति। अयं कः कुतो वा शफरीजठरमनुप्रविष्टः इति चिन्तयन्त्याः मायावत्याः सन्निधौ इन्द्रादेशेन अहमेव (नारदः) आविर्भूय मायावतीम् –

प्रद्युम्न एष यदुवंशपतेः कुमारो
मारो भवत्प्रियतमो भुवि तन्वि! जातः।
गोप्तुं त्वमर्हसि मनस्विनि ! गूढमेनं
दैत्यं निहत्य दयितोऽयमुपेष्यति त्वाम्।। १.३९।।

इत्युपादिशम्। मायावती च तमर्भकं सखीहस्ते निधाय, **सर्वथाऽयं संरक्षणीयः** इति वदति। सखी च दर्भकमहर्षेः आश्रमं गत्वा, तस्मै **एनं मुकुन्दनन्दनं प्रद्युम्नं परित्रायस्व** इति समर्पयति।

अथ तत्र आश्रमे दर्भकमुनिः देहश्रिया कृष्णेन स्पर्धमानं तमर्भकं वर्धयामास। अस्मादेव महर्षेः प्रद्युम्नः धनुर्विद्यामधिगच्छति। क्रमशः यौवनमारूढं प्रद्युम्नं ज्ञात्वा शम्बरवधकाङ्क्षी इन्द्रः पुनः विषयमिमं मायावत्यै निवेदयितुं मामेव (नारदं) नियमयति। मायावती मम(नारद)वचनं शिरसि धृत्वा सखीभ्यां सह मज्जदुज्जीवनसरः प्राप्नोति। प्रद्युम्नोऽपि भृगुमदचलोपकण्ठशिखरिणः वनसौभाग्यावलोकनाय विदूषकसहायः तत्र आगच्छति। इत्थं नारदः पर्वतमुनये प्रद्युम्नवृत्तान्तं श्रावितवान्। ततः पर्वतमुन्याश्रम-गतैः तदुभयसमागमहर्षिभिः महर्षिभिः **कीदृग् इतःपरं दैवसङ्कल्पः इति न विद्मः** इत्यभिहितम्।

एवं नायकप्रवेशम् अतर्कितोपनतं नायिकासन्दर्शनं च रङ्गमञ्चे कारयति कविः।

एतावत्पर्यन्तगाथां श्रावयित्वा पर्वत-नारदौ निष्क्रामतः। अनेन च शुद्धविष्कम्भेण रति-प्रद्युम्नयोः पूर्ववृत्तान्तः ज्ञापितः। अनन्तरं च तत्र मज्जदुज्जीवनसरसि स्नातानां मायावत्यादीनां दर्शनेन प्रद्युम्नः सानुरागो भवति। अनन्तरं वसन्तोत्सवः प्रचलति। तत्र विचक्षणा-मनोरमयोः सहकारेण कामदेवपूजां मायावती निवर्तयति।

तत्र विचक्षणा–मनोरमा–प्रद्युम्न–विदूषकाणां परस्परसल्लापे –

कस्मात् कञ्जविशाललोचन! भवान् ? ***श्रीदर्भकस्याश्रमात्,***
किं जन्मना कुलं त्वया सफलितम् ? ***ख्यातं यदूनां कुलम्।***
कस्यापत्यमुदारभाग्यनिधेः ? ***कृष्णस्य विश्वप्रभोः,***
किं नामास्य? ***महर्षिभिरसौ प्रद्युम्ननामोच्यते।।*** **१.७९।।**

इत्यादिपद्यैः स्वकुलस्थानादिकं विचक्षणायै प्रद्यम्नः निवेदयति। मायावत्याः सौन्दर्येण च मुग्धः भवति। सखीभ्यां मनोरमा–विचक्षणाभ्यां **'रमण एष प्रसूनायुधः। दिष्ट्या सम्पन्ना तव मनोरथसिद्धिः। तस्मात् त्वरस्व त्वं देव्याः अस्याः पाणिग्रहणमङ्गले'** इत्यादिवचनैः प्रद्युम्नस्य रतेश्च दाम्पत्यम् प्रद्युम्नाय ख्यपितम्। तदा प्रद्युम्नः **'मां हि एषा शैशवदशायां मायाविनः शम्बरात् रक्षितवती इत्येतत् जानाम्यहम्। किन्तु जन्मान्तरदाम्पत्योपन्यासेन प्रलोभनं कुर्वन्ति यूयम्'** इति मायावतीं पत्नीत्वेन नाङ्गीकरोति। अपि च **लक्ष्मीमिव स्वयमागतां रमणीयां वनितां कोऽपि अभिज्ञः न निराकरोति** इत्युक्तवन्तम् आत्मनः मित्रं विदूषकमपि इत्थं खण्डयति –

सौन्दर्यसारनिलया इति चापलेन
प्राज्ञः कथं परिरभेत परस्य दारान् ?।
उद्दामदीपकलिकां परमुज्ज्वलेति
कौतूहलात् क इह चुम्बितुमुत्सहेत।। १.८५।।

इत्येवञ्च विदूषकाय निवेदयन् प्रद्युम्नः रतिं भार्यात्वेन स्वीकर्तुं निराकरोति। ततः खिन्ना मायावती तस्माद्देशात् अपसरति। प्रद्युम्नोऽपि पश्चात्तापी सन् विदूषकेन सह दर्भकमुन्याश्रमं गच्छति – इत्येतावत्पर्यन्तकथा प्रथमाङ्के उपनिबद्धा।।

द्वितीयाङ्ककथा :–

द्वितीयाङ्ककथा भवान्तरीयसंस्कारोद्बोधनाय सोमश्रवसा कथ्यमानमुपायं ज्ञापयति। मायावती–प्रद्युम्नयोः उदन्तमवगन्तुम् इन्द्रः लब्धवर्णनामकं कञ्चन चारं शम्बरनगरम् ऋक्षवन्तं प्रति प्रेषयति। सः ऋक्षवन्तं प्रविश्य तस्य अतीवेलविभवं समवलोक्य वर्णयति। अनन्तरं कलकण्ठ्या लब्धवर्णस्य सम्भाषणव्याजेन मायावत्याः हितोपदेशदेशिकं योगीन्द्रं

सोमश्रवसनामानम् आकारयति इति, प्रद्युम्नेन परदाराबुद्ध्या निराकृता मायावती खिन्ना सती तद्विरहबाधामनुभवन्ती सखीभ्याम् आश्वास्यमाना क्रीडावने गूढमास्ते इति, तत्कृते प्रद्युम्नस्य पूर्वजन्मसंस्कोद्बोधनाय उपायं प्रष्टुकामा महायोगिनं सोमश्रवसमानेतुं कलकण्ठीं विचक्षणा नियुक्तवती इति च ज्ञायते। एवं लब्धवर्णः महेन्द्राय निवेदयितुं निष्क्रामति। अयमपि शुद्धविष्कम्भः।

ततः मायावत्याः विरहबाधा तस्याः मनोरमा–विचक्षणाभ्यां विहिता सपर्या च वर्णिता। ततः कलकण्ठ्या सह महायोगी सोमश्रवाः प्रविशति। स च मायावतीं बहुधा समाश्वसिति। सोमश्रवाः **'वत्स! विचक्षणया अपि एतदर्थमेव वयमाकारिताः तत् मया तत्रैव उपायश्चिन्तनीयः तदेतत् खलु निशयितव्यम् अव्यासक्तेन चित्तेन'** इति –

सालग्रामाचलपरिसरे सिद्धसाद्ध्यानुभाव्यं
पुण्यारण्यं विलसति फलैः पुष्कलं पुष्कराख्यम्।
तस्मिन्नस्ति त्रिदशमहितं *तीर्थमुष्टोधनाख्यं*
यस्यालोकादपि च मनुजो याति जातिस्मरत्वम्।। २.३१।।

ततश्च - **माहेश्वरीभिर्मायाभिर्महातीर्थसमागमः।**
यथास्य सिद्ध्यति तथा यतस्व सुमुखि! स्वयम्।। २.३२।।

इति सोमश्रवाः प्रद्युम्नस्य भवान्तरीयसंस्कारोद्बोधने मायावत्यै उपायं कथयति। उपायं श्रुत्वा मायावती सुचिरम् आनन्दमनुभवति। सोमश्रवाः शिष्येण सह कपित्थारण्यं साधयति। मायावती च अनन्तरकरणीयकार्यानुगुणं प्रयत्नं कर्तुं सिद्धा भवति। सखीभ्यां सह निष्क्रामति। एतावत्पर्यन्तवर्णिता कथा द्वितीयाङ्ककथा।

तृतीयाङ्ककथा :–

तृतीयाङ्के आदौ मायावतीप्रयुक्ता माया प्रविशति। सा स्ववल्लभं प्रद्युम्नम् उद्बोधनसरसः परिसरम् आनेतुं मायावत्या प्रहिता। मायावती अपि विरहतापापनोदनाय तदन्तिकस्थं मकरन्दशीतलं कपित्थारण्यं गमिष्यति। माया च दारुणशार्दूलरूपं धृत्वा दर्भकमहर्षेः आश्रमं गत्वा तत्र आश्रमजन्तूनां, मुनीनां च क्षोभं जनयति।

अथ दारुणशार्दूलकृतः आश्रमक्षोभः वर्णितः –

जवात्पश्चाद्धावज्जनचरणघातध्वनिभिरप्यमी
जाता शङ्का दशसु च दिशास्वर्पितदृशः।
करभ्रश्यत्पूजाकुसुमतुलसीवासितपथाः
पलायन्ते हन्त! प्रसभमृषयश्शुष्यदधराः।। ३.२।।

ततः आश्रमक्षोभभीताः मुनीन्द्राः दारुणशार्दूलस्य वधकृते – भो भो यदुवंशमुक्तामणे महावीर परित्रायस्व इत्येवं प्रद्युम्नं प्रार्थयन्ति। प्रद्युम्नः सधैर्यं भो भो तत्रभवद्भिः मा भेतव्यम् –

जाग्रत्यहो! यदुकुलप्रभवे जनेऽस्मिन्
जायेत चेद्भयमिहाश्रममाश्रितानाम्।
धिङ्मेदिनीतलभरं मम देहमेतद्-
भारायितं भुजममुष्य भरं च चापम्।। ३.४।।

इति मुनिभ्यः स्वदेहतृणीकरणप्रतिज्ञया अभयं दत्वा व्याघ्रमनुसरति। शरं धनुषि सन्धाय द्रुतमुपसृत्य प्राणपातभिया बाणपातानुगुणं प्रदेशम् अतीत्य पलायते शार्दूलः इति चिन्तयति प्रद्युम्नः। एवं बहुदूरं गत्वा पुरोऽवलोक्य –

प्रच्छन्नस्तु लतावितानकुहरे भूयोऽपि दृग्गोचरो
विद्राति स्वयमाशु हन्त! हरिणान् विद्रावयन्नध्वनि।
दृप्तोऽयं सविधे चरन्निव पुनर्दूरे दरीदृश्यते
भ्रान्तिं नस्तनुते तदेतदधुना शार्दूलविक्रीडितम्।। ३.९।।

इत्येवं शार्दूलविक्रीडनं (विन्यासं) पश्यन् कस्यचित् तरोः छायाम् समासीदति। बहोः आरण्यदेशस्य आक्रमणात् परिश्रान्तः शार्दूलः सरःप्रान्तम् उपसरति इव दृश्यते। तदस्माकं तदनुसरणश्रान्तानां उचितमेव – इति सरःपरिसरमुपसृत्य अग्रतः अवलोक्य सविस्मयं कथमन्तर्हितमेव, अस्तु तावत् अस्य दारणदूरोत्सारणयोः अन्यतरदेव महर्षिभिः अपि अभिलषितम् इति विचिन्तयति। अनन्तरं पुण्डरीक–मनुधावता कञ्चनपुण्डरीकपरिमण्डितम् इदमत्यद्भुतं तीर्थं प्राप्तम् इति अवतीर्य तत्सरस्तीर्थम् –

प्रचलितकलहंसीपक्षविक्षेपवेग-
प्रभवपवनचञ्चत्काञ्चनाम्भोजवातैः।
मधुरमधुरसौघैर्मांसळस्वादुतोयं
दिशति सर इदं मे चक्षुषोर्दीर्घमायुः।। ३.११।।

इति प्रशंसन् तस्यैव उदकेन अरण्यभ्रमणतापमपनेष्यामि इति च चिन्तयन् विमल–कमल–परिमल–सुरभिलमुदकम् आस्वादयति। मुहूर्तमिव ध्यायन् सानुस्मरणरोमाञ्चम् – **भवान्तरीयवृत्तान्तानुस्मरण–महौषधं तदिदम् उदकम्** इति निश्चिनोति।

ततः सम्प्राप्तजन्मान्तरसंस्कारः प्रद्युम्नः रतिवियोगमसहमानः बहुधा विलपति। वसन्तं दूषयति। कोकिलं निन्दति। सहकारमाक्षिपति। एवं विरहमत्तः माधवीमण्टपस्य उपकण्ठम् आसीदति। तत्र मायावती तापातुरा सती सखीभ्याम् आश्वास्यमाना वर्तते। प्रद्युम्नः मायावत्याः विरहव्यधां स्वयं पश्यति। सानुरागानन्दम् –

पुरस्तनतटस्थेमभासुरा पाण्डराकृतिः।
विनेष्यति रसैस्तापमसौ सुरतरङ्गिणी।। ३.५३।।

इति रम्भास्तम्भावरणादुत्थाय माधवीमण्डपं प्रविशति। ततः मायावती–प्रद्युम्नयोः परस्परसंलापः प्रचलति। अत्रान्तरे नेपथ्ये शम्बरकृतमौद्धत्यं श्रूयते। सखीभ्यां सह मायावती भयभ्रान्ता भवति प्रद्युम्नः सधैर्यावष्टम्भं मानिनि मा भैषीः इति समाश्वसिति। औद्धत्यं शम्बरकृतमिति उपद्रवापनोदनाय ततः निर्गच्छति। इति कथा तृतीयाङ्के वर्णिता।

चतुर्थाङ्ककथा :–

शम्बर–प्रद्युम्नयोः युद्धं प्रधानतया अत्र वर्णितम्। तथा हि जराभारालसः कञ्चुकी कृच्छ्रेण वेत्रयष्टिसहायेन प्रभोः भवनद्वारि अन्वहं जनवारणाय या प्रागासीत्, सा एव निर्यातेषु वयस्सु अस्मादृशेषु कतिपयेषु आलम्बनाय अभवत्। इत्येवं निर्विण्णः वेदिकां प्रविशति। सः कञ्चुकी महाराजेन शम्बरेण यदुकुलशशिना धानुष्कमानिना प्रद्युम्ननाम्ना अस्मद्रथस्य केतनापहरणं कृतम्। तस्य वधोपायपर्यालोचनकृते दुर्धर–केतुमालि–प्रमर्दनप्रभृतीन् सचिवान् समानेतुम् आदिष्टः। स च तान् समानेतुं निर्गच्छति।

अत्रान्तरे कञ्चुकी पुरोऽवलोक्य शम्बरसेवकं कश्चन राक्षसं पश्यति। ससम्भ्रान्तस्सन् कञ्चुकिनम् अभ्युपेत्य **'न केवलं रथकेतनापहरणे प्रद्युम्नेन विश्रान्तम् अपि तु राक्षसाः अपि अनेके यमसदनं प्रापिताः। तत्स्वामिने निवेदयितुं गच्छामि कुत्रेदानीं महाराजशम्बरः तिष्ठति?'** इति पृच्छति। ततः राक्षसः **'अदृष्टपूर्वः खलु प्रद्युम्नस्य आहवे तादृशः पराक्रमः'** तथा हि–

सुरजनश्रवणानां शाश्वतक्षेमकारी
घनदनुजकुलानां कर्णयुग्मदुःखकारी च।
अपि स्मृतमात्र आर्यप्रद्युम्नसृष्टः
करोति हृदयकम्पं चापटङ्कारघोषः।। ४.६।।

इत्येवं प्रद्युम्नस्य अप्रतिहतं युद्धे विजृम्भणम् प्रकटयति। ततः भद्रासनमध्यमाध्यासीनः शम्बरः यथोचितासनेषु च दुर्धर–केतुमालि–प्रमर्दनाख्याः मन्त्रिणश्च युद्धतन्त्रं विचारयन्ति। तत्र शम्बरः –

हित्वा साध्वसमेष रोषपरुषः कृत्वा च धैर्यं परं
मुक्त्वा तीव्रशिखान् जवेन विशिखान् हत्वा च दोषाचरान्।
भित्वा सालमनुप्रविश्य नगरं हृत्वा ततस्स्यन्दनं
भूयो हन्तुमथाप्यमर्षमधिकं पुष्णाति कृष्णात्मजः।। ४.७।।

रोषपरुषः अयं प्रद्युम्नः भयं त्यक्त्वा, धैर्यं कृत्वा, तीव्रशिखान् बाणान् च जवेन मुक्त्वा राक्षसान् हत्वा नगरं प्रविश्य रथकेतनं च हृत्वा पुनः च अस्मान् हन्तुम् अधिककोपं करोति इति प्रद्युम्नस्य शौर्यं धैर्यं च मन्त्रिभ्यः निवेदयति। केतुमाली च – **'उदन्वति पुरःपातितोऽपि किमपि तेजः वहन् कृष्णगतिः स्वयं यः विजृम्भते स एषः दैत्यवनं दग्धुं क्षमः, तत् स्वल्पेन शाम्यतु ननु शम्बरेण कथम्'** इति आत्मनि सम्भाव्य, शम्बरेण प्रकाशं **'महाराज! न किञ्चिदेतत् यतः भवानपि दुर्मनायते'** इति केतुमाली शम्बरं शान्तयति। केतुमालिनः वचांसि निशम्य, क्रोधोद्रिक्तोऽपि शम्बरः पुनरुत्साहं मनसि आवाहयन् –

समित्सम्पन्नसत्वेन प्रकृष्टेन शराग्निना।
परकीलालसद्भासा धक्ष्यामि तृणवद्रिपुम्।। ४.१२।।

सुरजितः सदा विश्वस्य जेतुः मम अयं प्रद्युम्नः कियान् ? इमं हन्तुं त्रपा हृदि बाधते इति स्वीयं विकत्थनत्वम् आविष्करोति। दुर्धरः **'युवराजे चित्रसेने जाग्रति सति एतादृशानि कार्याणि भवत्पर्यन्तमागन्तुं न प्रभवन्ति खलु'** इति यावत् दृशौ परुषे रुषा न कुरुषे तावदेषः तव सूनुः रिपून् विदलयेत् इति साटोपं चित्रसेनस्य धैर्यसाहसं प्रशंसति।

ततश्शम्बरः – कञ्चुकिद्वारा चित्रसेनादीन् शतमपि पुत्रान् आह्वयति। सहोदरैस्सह चित्रसेनः प्रविशति। पितरं प्रणमति। अयशसः स्वस्थान् भवितुं शम्बरः पुत्रान् काङ्क्षति। स्वस्थादिपदानामुच्चारणेन केतुमाली उद्विग्नः भवति। चित्रसेनादयः आह्वानकारणं पितरं पृच्छन्ति। शम्बरः **'कस्य चित् गोपालकस्य शिशुः प्रद्युम्नः किञ्चित् दुश्चेष्टित-मनुतिष्ठति। स तावत् भवता यमसदनं नेतव्यः'** इति चित्रसेनम् आदिशति। कियदेतत् भवद्गर्भोद्भवानाम् आज्ञापय तावत् साधयामः इति चित्रसेनादिपुत्रवचांसि निशम्य सप्रेमातिरेकं सानन्दं च परिष्वज्य –

महानिष्टार्थलाभो नः स्यान्नः परममङ्गलम्।
तनुध्वंसं प्रतिक्षिप्रं प्रयात समराङ्गणम्।। ४. १५।।

इति युद्धभूमिं प्रेषयति।

तत्र प्रद्युम्न-चित्रसेनयोः युद्धम्, चित्रसेनस्य पराक्रमणम्, तस्य अपर्याप्तताञ्च दुर्धर-केतुमालिप्रभृतयः शम्बराय निवेदयन्ति। शम्बरः चित्रसेनस्य अनुचितविजृम्भणात् खिन्नो भवति। शम्बरः प्रत्युत दुर्मित्तानि पश्यति। अत्रान्तरे नेपथ्ये –

गृह्णाति मुञ्चति निकृन्तति मस्तकानि
भो! भो! भटा ! हितमितस्तु पलायनं नः।
हा तात! हा जननि! हा सुत! हा! हतोऽस्मि
हा! ताडिताय विशिखेन पयः पयो मे।। ५.२१।।

इत्येवं प्रद्युम्नस्य विक्रमणेन शम्बरपुत्राणां चित्रसेनादीनां हाहाकाराः श्रूयन्ते। मृतावशिष्टाः व्रणिताश्च युद्धक्षेत्रतः पलायनं कुर्वन्ति। शम्बरः तस्य मन्त्रिणश्च चिन्ताक्रान्तमानसाः भवन्ति। ततः सम्भ्रान्तं प्रद्युम्नस्य शरप्रहारैः सम्भ्रान्तः राक्षसः परिरक्षितुं शम्बरं शरणमेति। सधैर्यावष्टम्भं शम्बरः राक्षस मा भैषीः इत्यभयं ददाति।

ततः दुर्धर्षः राक्षसद्वारा युद्धभूमौ चित्रसेनस्य पराक्रमवृत्तान्तं ज्ञातुमिच्छति। – **'कुमारे चित्रसेने समरे तिष्ठति सति प्रद्युम्नेन घोराः शराः विसृष्टाः'** इति भयाकुलःसन् राक्षसः आश्वासं प्राप्य वदति। तदसहमानः शम्बरः सक्रोधम् **'अरे गोपालशिशो! कथमतिवीर्यस्य वत्सस्याप्युपरि तथा प्रागल्भथाः'** इति प्रद्युम्नमधिक्षिपति। प्रद्युम्नस्य बाणान् प्रसह्य योद्धुं सिद्धस्सन् चित्रसेनः अभिमुखो भवति – इत्येतं श्रुत्वा शम्बरः सश्लाघं तनयं **'साधु वत्स! साधु'** इति पुत्रम् अभिनन्दति। ततः प्रद्युम्नेन विमुक्ताः शराः एनं चित्रसेनं प्राप्ताः अहो कष्टम् इति राक्षसस्य वचः श्रुत्वा शम्बरः मन्त्रिणश्च भयमाप्नुवन्ति। ततः चित्रसेनस्य मरणमेव सम्भावयन्ति मन्त्रिणस्सर्वे।

ततः शम्बरः पुत्रं हतं ज्ञात्वा भद्रासनात् पतति। सचिवाः शम्बरं समाश्वसन्ति। केतुमालिप्रभृतयः सचिवाः पुत्रैर्वियुक्तं शम्बरं तस्य दुरवस्थाञ्च दृष्ट्वा सशोकं विस्मयमुपयान्ति। शम्बरः क्रमेण ईषल्लब्धसंज्ञः पुनः **'हा वत्स! चित्रसेन मद्वदनराजीवमित्र क्व गतोऽसि?'** इति पुनःपुनः मोहमुपगच्छति। शम्बरः कथमपि लब्धसंज्ञस्सन् सनिर्वेदम् –

पुत्रान् शतमपि प्राप्य पुत्रीणां सदृशं हि यत्।
नैवांसहारि नैवापं तदन्तर्दहतीति माम्।। ४.२६ ।। इति बाष्पं मुञ्चति।

सचिवाः शम्बरं पुनःपुनः मोहमुपगतं भूयो भूयः समाश्वसन्ति। शम्बरः क्रोधोद्विग्नस्सन् **'असौ शोकानलो धिङ् माम् अदग्ध्वा न प्रशाम्यति।'** इति तापमनुभवन् अधरोष्ठं दन्तैस्सन्दश्य –

अहमहह करिष्ये भूतलं प्रेतलक्ष-
प्रचितमथ दिनं वा ख्यातये पातयेयम्।
क्षुभितमसुरयूथं वर्धयेयं[1] धयेयं
रिपुवपुरनुषक्तां रक्तधारामुदाराम्।। ४.२९।।

इति प्रतिज्ञां करोति। प्रमर्दनः सावष्टम्भं शम्बरमवलोक्य दनुजकुलभागधेय! तनिष्यामः कामं तव तनय शोकापनयनम् इति तेऽपि प्रतिज्ञां कुर्वन्ति। तेन उत्साहितः शम्बरः नेपथ्याभिमुखमवलोक्य कञ्चुकिनमाहूय जयप्रस्थानाय रथमुपस्थापयितुम् आदिशति।

ततः रथमुपस्थापयन् सूतःप्रविशति। शम्बरः रथमधिरोहति। यथास्वं रथमारुह्य सचिवाः अग्रे प्रस्थातुम् अनुमतिं स्वीकुर्वन्ति। शम्बरः –

अभियात समराङ्गणमुद्भासितमरणरीतयो भवत।
अर्पयत शिरश्शत्रोः अचिरेण मया भज्यतां खेदः।। ४.३३।।

इत्येवमुक्त्वा स्वीयखेदापनोदनाय **'युद्धभूमिं गच्छत'** इति सादरं प्रेषयति। युद्धाय प्रस्थितानां सचिवानां, शम्बरस्य च अमङ्गलालिङ्गितानि किञ्चिदिव उद्वेगं निरुत्साहं च जनयन्ति। सकलमपि सैन्यं समवधाने द्रष्टुं रथं मन्दं मन्दं चोदयितुं सूतमादिशति। तथा कुर्वन् सूतः सैन्यमहार्णवं बहुधा वर्णयति। शम्बरः समन्तादवलोक्य सविस्मयं न कदापि दृष्टचराणि नापि श्रुतचराणि एतादृशोत्पातवातोज्जृम्भणानि इति वदन् स्वमनसः शैथिल्यं सूचयति। सूतः सैन्यमहार्णवं दृष्ट्वा साशङ्कम् अपशकुनानि भाविनमर्थं सूचयन्ति इति चिन्तयन् – **'अयं प्रतिपक्षानिलः अश्वमण्डलीनां मार्गं निरुणद्धि। सपदि भूमौ ध्वजं निपातयति। मनोरथं रथं च शिथिलयति।'** इत्येवं बहुधा दुर्मित्तानि स्वयं पश्यति, वर्णयति च।

शम्बरस्तु सगर्वक्रोधं **किमित्थं प्रलपसि! किं नाम पामर! मह्यमपि द्रुह्यन्ति दुर्निमित्तानि! शृणु रे भीरो! –**

चेतश्चलति धीराणां न निमित्तैरभावुकैः।
ज्वाला हि मणिदीपस्य चण्डवातैर्न कम्पते।। ४.४३।।

इति आत्मानः दर्पं विकत्थनत्वं च प्रदर्शयति। प्रद्युम्न–शम्बरयोः मध्ये महान् संग्रामः प्रचलति। महान् कोलाहलः प्रद्युम्नसेनायाः गर्जनानि तर्जनानि च नेपथ्ये श्रूयन्ते–

भो भो! रात्रिचराः! पलायनपरा धिक्तान् भवद्यूधगां-
स्तूर्णं येहि मया तृणीकृतशरा दग्धा मदीयेषुभिः।
शक्तिं वस्तु ननु स्तुवे निजमुखासक्तैस्तृणैरेव यद्
बाणान् मे प्रतिरुध्य युद्धकृपणान् प्राणान् स्वयं रक्षथ।। ४.४४।। इति।

इत्येवं नेपथ्ये श्रूयन्ते। एतत् सोढुमसहमानाः सचिवाः पलायन्ते। पलायनपराणाम् अतद्बलानाम् अभयं प्रदातुं सूतः शम्बरं पृच्छति – **'दैत्यभटाः! माभैष्ट अहमेव साक्षात् समराङ्गण–**

मलङ्करोमि' इति दैत्यभटान् प्रोत्साहयति। युद्धोन्मुखो भूत्वा शम्बरः प्रद्युम्नम् **'अरे दुरात्मन् गोपार्भक! त्वां हत्वा असुरहितोऽयं भवेयम् अचिरेण'** इति तर्जयति। प्रद्युम्नशम्बरयोः मध्ये वाग्युद्धं प्रचलति। परस्परम् आरोपणप्रत्यारोपणानि कुरुतः। तयोर्मध्ये क्रोधोद्रेकतया सोपहास–सरोष–सानुताप–सामर्ष–सम्भाषणानि प्रचलन्ति। प्रद्युम्नः शम्बरं साक्षात् अधिक्षिपति। शम्बरोऽपि प्रद्युम्नं सामर्षमुपालम्भते। एवं परस्परशस्त्रास्त्रप्रयोगात्मकं महद्युद्धं प्रचलति।

तदा सूतः स्वगतम् **'प्रद्युम्नः व्यापारान्तरव्यासङ्गविस्मृतमपि शम्बरं पुत्रविपत्तिं पुनःपुनःस्मारयति'** इति भावयति। शम्बरः सबाष्पं निर्वर्ण्य मोहमुपगच्छति। तदा प्रद्युम्नः सूतमुद्दिश्य **यावदयं पापः पुनरपि संज्ञामासादयिष्यति, तावद्वयमपि समरश्रमापनयनं करवाम** इति वदति। शम्बरसूतः शम्बराधिरूढं रथम् विश्रान्तिस्थानं गमयति। अत्रान्तरे प्रद्युम्नस्य योगक्षेमं ज्ञातुं मायावत्या प्रेषिता कलकण्ठी आगच्छति। प्रद्युम्नः, मायावत्याः आत्मनः दर्शनाभिलाषं पूरयितुं रथादवतरति। धुर्याणां हरीणां च स्नपनादिभिः श्रमापनोदनाय सूतमादिश्य मायावतीं द्रष्टुं कलकण्ठ्या सह क्रीडारामं प्रयाति।

तत्र मायावती आर्यपुत्रस्य जयसिद्धिकृते निखिलभुवनजननीं नलिनीवासिनीं भक्त्या निध्यायन्ती वकुलतरुमूलवेदिकाम् अलङ्करोति। कलकण्ठ्या सह तत्रागतः प्रद्युम्नः मायावत्याः सौन्दर्यं वर्णयति। तत्र मायावती–प्रद्युम्नयोः प्रणयसम्भाषणं परस्परानुरागप्रदर्शनम्, परस्परश्रेयोऽभिलाषित्वं च सम्भाषणे प्रचलति। अत्रान्तरे नेपथ्ये दुन्दुभिध्वनिः श्रूयते। मायावती भयेन कम्पिता प्रद्युम्नमालिङ्गति। मनोरमा शम्बरात् मायावतीं त्रातुं प्रद्युम्नं प्रार्थयते।

प्रद्युम्नः **'मनोरमे माभैषीः कियदेतस्य हरिकिशोरस्य?'** इति सावज्ञमुक्त्वा मायावतीं परिष्वज्य विचक्षणां समाश्वास्य शम्बरं लब्धसंज्ञ इति जानाति। ससम्भ्रमम् उत्थाय **'आस्यतां भवतीभिः'** इत्यभिधाय असुरहतकस्य भिन्नेन शिरसा भवतीः आसादयिष्यामि इति सकोपाटोपं गृहीतकार्मुकः सन् परिक्रमति। आदृष्टिगोचरं भर्तारं प्रद्युम्नम् अवलोकयमाना सचिन्तमास्ते मायावती। विचक्षणा **'महावीरमहिष्यास्तव माभूत् अत्र शङ्का'** इत्येवमुक्त्वा मायावतीं समाश्वासयति। प्रद्युम्न–शम्बरयोः मध्ये प्रवर्तमानं युद्धमतिप्रमादकरमिति मत्वा, मायावती प्रद्युम्नस्य प्राणापायशङ्कया क्षणकालं बिभेति। तदैव तस्याः वामलोचनस्पन्दनं शुभं सूचयति।

युद्धाङ्गणे शम्बरः मृत्युञ्जयेन दत्तां गदामादाय प्रद्युम्नस्य च्छेदाय प्रहिणोति। प्रद्युम्नः रणभुवि नारायणीयास्त्रं विसृजन् आपतन्तीं गदां, तदनु दैत्यस्य शीर्षं च भिनत्ति। प्रद्युम्नकृतं शम्बरवधं दृष्ट्वा युद्धभूमौ –

कबन्धं देवारेर्नटति निचयश्च द्युसुदृशां
निहन्यन्ते भेर्यो दिवि निहतशेषाश्च रिपवः।
प्रसन्नात् स्वर्लोकात् पतति सुमनोवृष्टिरभितः
प्रकीर्णाश्च क्रन्दद्दनुजवनिताकुन्तलभरात्।। ४.१००।।

इति च जय–जय–ध्वानः श्रूयते। मायावती सादरं जय–जयध्वानम् आकर्ण्य परमानन्दभरिता भवति। मनोरमा राजपुत्रस्य जयलक्ष्मीपाणिग्रहणमहोत्सवे मङ्गलाचरणाय मायावतीं नयति – इत्येतावत्पर्यन्तकथा चतुर्थाङ्के वर्णिता।

पञ्चमाङ्ककथा :–

शम्बरासुरवधानन्तरं मायावती–प्रद्युम्नाभ्याम् आचारिता विमानयात्रा अत्र प्रधानेन वर्णिता। तथा हि – पञ्चमाङ्कप्रारम्भे नारदः तदीयशिष्यश्च प्रविशतः। तौ द्वावपि चन्द्रस्य अस्तमयम् उषःकालं सूर्योदयं च वर्णयतः। प्रथमं नारदः प्रविश्य सूर्योदयात् पूर्वं विद्यमानं प्रभातकालं निर्वर्णयति। तदीयशिष्यः सूर्योदयकालिकं रक्तिमानं प्रशंसति। ततः नारदः प्रणष्टलाभस्य पुनः आविष्कारनिवेदनेन विज्ञापनेन भगवन्तं वासुदेवं सन्तोषिणं कर्तुं शिष्यं त्वरयति। नारदः – **क इतरः कालसदृशा शम्बरेण गृहीतस्य प्रद्युम्नस्य पुनस्समागमात्। पुत्रस्य खलु चिरादद्दष्टस्य पुनरागमनं पुमर्थेभ्यश्चतुर्भ्योऽपि प्रकृष्यते।।**

इत्यनेन गद्येन भगवतः प्रणष्टलाभवृत्तान्तं प्रेक्षकाणां सूचयति। ततः इन्द्रः आत्मनः विरोधिनं लोककण्टकं शम्बरासुरं हत्वा लोकोपकारं कृतवन्तं प्रद्युम्नं मायावत्या सह द्वारकाप्रापणाय स्वसारथिं मातलिम् आदिशति। तत्र सखीभ्यां सह मायावती, विदूषकेण सह प्रद्युम्नश्च पुष्पकविमानमारुह्य मातलिसहायेन आकाशमार्गे प्रस्थास्यन्ति – इत्येतावत्पर्यन्तस्थिता कथा शुद्धविष्कम्भे निरूपिता। नारद–तच्छिष्य–सम्भाषणमाध्यमेन अयं विष्कम्भः प्रवृत्त इति **शुद्धविष्कम्भः** भवति।

विमाने आकाशमार्गद्वारा, प्रद्युम्नः शम्बरं हन्तुं यत्र युद्धं कृतवान् तं प्रदेशं मायावत्याः प्रदर्शयति। सख्यौ विदूषकश्च तं प्रदेशं दृष्ट्वा भयमाप्नुतः। विदूषकश्च परिहासजल्पनपूर्वकं तस्मात् प्रदेशात् शीघ्रं गन्तुं मातलिनं त्वरयति।

प्रद्युम्नः अनन्तरं मायावत्यै विमानवेगं वर्णयति। ततः मायावती क्षोणीधरस्य कस्यचित् तटे आकर्षणीयं सरःपश्यति। स्वरूपादिकं ज्ञापयितुं प्रद्युम्नं पृच्छति। प्रद्युम्नः भृगुमतः शैलस्य तटोपकण्ठमण्डनं **मज्जदुज्जीवनं (उद्बोधनं) तीर्थम्** इति विज्ञाप्य सानुस्मरणरोमाञ्चं तेन सरसा स्वयं प्राप्तं मधुरानुभूतिञ्च –

उद्दामहेममय-तामरसाभिराम-
***मुष्टोधनं* जगति तीर्थमिदं वदन्ति।**
आस्वादयं यदमृताचमनावबुद्ध-
प्राग्जन्मवृत्तिरचिरादधरामृतं ते।। ५.२०।। इत्यनेन वर्णयति।

मायावती च तत्सरः सादरमवलोकते। एतस्मिन् सन्दर्भेऽपि विदूषकस्य परिहासजल्पनं प्रचलति।

ततः दक्षिणतः दत्तचक्षुः उद्ग्रीवं पश्यति। तत्र च सेतुबन्धप्रमुखाः पुण्यप्रदेशाः सन्ति। तान् द्रष्टुं मायावती सोत्कण्ठा भवति। तदा मातलिः –

तत्तादृग्ग्रामभद्रप्रभुपदकमलन्यासतो धन्यजन्मा
त्रैलोक्यातङ्कलङ्कापुरपतिकुलविध्वंसने कालदण्डः।
जानक्याः प्राणनाडी जलनिधिवपुषश्चारुयज्ञोपवीतं
जीवातुर्जीवलोके गुरुतरदुरितैरातुरे सेतुरेषः।। ५.२२।।

इत्यनेन प्रद्युम्नाय **रामसेतुमाहात्म्यं** वर्णयति। तत्र मातलिप्रद्युम्नयोः सम्भाषणमध्ये श्रीरामस्य मानवीयतायाः आदर्शनीयतायाश्च प्रख्यापकाः कथाः बह्व्यः वर्णिताः।

ततः मातलिः विमानम् अन्यतस्सञ्चारयन्,

असौ तटतरुव्रातैरनभिज्ञा रवित्विषाम्।
तनोति दृष्ट्योः कल्याणं *ताम्रपर्णी* तरङ्गिणी।। ५.२८।।

इत्यनेन पद्येन ताम्रपर्णीनदीपरीवाहकप्रदेशं परिचाययति। प्रद्युम्नः ताम्रपर्णीप्रविष्टानां जलानां मौक्तिकत्वसम्पादनम् अभिवर्ण्य तत्प्रभावं प्रशंसति।

ततः मायावती ताम्रपर्ण्याः तटे दृश्यमानं सुन्दरं कञ्चित् तपोवनमुद्दिश्य जिज्ञासमाना पृच्छति। मातलिः तं तपोवनम् **अगस्त्याश्रमम्** इति संसूच्य तत्प्रभावातिशयं वर्णयति। स्वयञ्च प्रद्युम्नः अगस्त्यस्य च प्राभवम् –

तत्तादृक्करपद्मसम्पुटनटत्सिन्धूनि सन्धूनित-
प्रेङ्खद्विन्ध्यवसुन्धराधरघनाहङ्कारशङ्कानि च।
क्रुध्यत्कुक्षिपुटाशुशुक्षणिकणीभूताङ्गवातापिका-
न्याश्चर्यञ्जनयन्त्यगस्त्ययमिनस्स्तुत्यानि कृत्यानि नः।। ५.३२।। इति।

ततः मलयभूधरं प्राप्नुवन्ति। तत्र च चन्दनस्पन्दनाः तरुणमरुतः दिशः चारुतां दिशन्ति। ततः प्रद्युम्नः मलयमारुतप्रभावात् अपसरणाय वेगेन विमानं प्रस्थापयितुं मातलिं पृच्छति। प्रद्युम्नः दूरतः दृष्टिं दत्वा **श्रीरङ्गपट्टणस्य वैभवं** वर्णयति। एवं मध्ये **पिनाकिन्याः कावेर्याश्च** परिवाहक–प्रदेशान् पश्यन्ति। तयोः नद्योः प्रामुख्यं प्राभवं च वर्णयन्ति।

ततः काञ्चीं समागच्छन्ति। तत्र एवं **काञ्चीनगरवैभवं** वर्णितम् –

श्रुतिमञ्जुनादनिचयैरभिरामा सवलग्नाभिजघनद्युतिहेतुः।
सतताभिरूपवरदारमणीभिः परिभूषिता विजयते शुभकाञ्ची।।५.४७।।

अत्र च काञ्चीनगरवर्णनेन सदा वेदानां मन्त्रोच्चारणैः मनोज्ञा विराजते। सर्वदा चिन्तितमनोरथ–सिद्धिदायिनी विलसति। यज्ञब्रह्मरूपघनद्युतेः हेतुभूता इयं शुभकरी सती शुभकाञ्ची इति नाम्ना प्रसिद्धिमाप्ता इति श्लोकभावः।

ततः जवेन विमानमुत्तरतः प्रस्थापयति। तदा मायावती **क इव दक्षिणसुमेरुरिव कोऽपि धराधरः दृष्टिगोचरो भवति** इति मातलिनं चोदयति। स च देवीं मायावतीम् उद्दिश्य –

***शेषगिरिरेष* किल भूषयति पृथ्वी-मानमतमेनमतिमानमहिमानम्।**
धाम रमते तदिह पामरमतेर्य-द्दूरगमुदारगुणनीरनिधिमाहुः।। ५.५३।।

इत्येवं **शेषाचलस्य वैशिष्ट्यं** ख्यापयति। प्रद्युम्नोऽपि दक्षिणतः दृश्यमानं **पनसवनं** निर्वर्ण्य शेषाचलस्य धन्यतां कीर्तयति। मायावती अपि शेषाचलं सादरम् अवलोक्य, सर्वर्तुनर्तनरङ्ग-स्थलेषु अञ्जशिखरिणः तटोद्देशेषु तामरसवासिनी देवी स्वीकृतबहुविग्रहा स्वयमष्टाभिरपि नायिकावस्थाभिः अभङ्गुरशृङ्गारधौरेयारविन्दनाभम् आनन्दयति। परञ्च विस्मयम् एति। मातलिः अञ्जलिं बध्वा –

असुरगणराजयक्ष्मा क्षेमं कौमोदकीलक्ष्मा।
जगतामपहतपाप्मा फणिगिरिसद्मा करोतु परमात्मा।। ५. ६७।।

इति शेषाचलाधीशं प्रार्थयति। प्रद्युम्नः – 'वृषाद्रिपतिना वक्षस्थले धृतः कौस्तुभः भद्राय अस्तु। ब्रह्मा सेवाक्षणे आत्मनःप्रतिबिम्बं च लक्षयन् प्रतिसृष्टिशङ्किहृदयस्सन् शोकोदयात् उत्थितैः आसारैः नयनाम्भसाम् आनन्दबाष्पोद्गमम् अभिनयति' – इति शेषाचलपतेः भगवतः वेङ्कटेश्वरस्य माहात्म्यं प्रशंसति। मायावती अपि शेषशैलेन्द्रस्य महिमानम् **'क्षेमं प्रददातु श्रीनाथधृतः मणीन्द्रः वक्षस्यस्य सहभुवं किल प्रेक्षणसाधुकारिणी[कारी]'** इति बहुधा श्लाघते। तदनन्तरं मातलिः त्वरया विमानमन्यतः प्रस्थापयति। अग्रतोह्मअवलोक्य गोदावरीपरिवाहकप्रान्तस्य रामणीयकतां गोदावर्याः महिमातिशयं च –

वैदेही सखपाद[2]पङ्कजरजोविन्यासधन्या पुर-
स्सेयं साम्प्रतमाविरस्ति नयनामोदाय *गोदावरी*।
आनीतेन यदम्भसैव शुचिना सङ्गेन गाङ्गे जनै-
रुद्धृत्याति चिरं धृतेऽपि सलिले सौरभ्यमारभ्यते।। ५.७१।।

इत्यनेन पद्येन बहुधा स्मरन्ति।

ततः **गङ्गानदीप्रदेशान् तत्तीरेषु विद्यमानानि क्षेत्राणि** च पश्यन्ति। तेषु काशीपुरम् अन्यतमम्। प्रद्युम्नः मायावत्यै तस्याः अक्ष्णोः पुरतः काशीपुररामणीयकतां विशदयति –

क्रीडासङ्गरसम्भ्रमेषु दयितैः क्लेशं भृशं प्रापिताः
विस्रब्धं तदुरस्सु केळिविरतौ सुप्ता विदग्धाङ्गनाः।
बुध्यन्ते नु निशान्तमन्तिकगतस्वर्लोककल्लोलिनी
नाळीकोदरबन्धनिर्यदळिनी झङ्कार[5]शङ्खारवैः।। ५.७४।।

विदूषकः काशीं वीक्ष्य भावपूर्णस्सन् संस्कृतमाश्रित्य वाराणस्याः प्राशस्त्यं वर्णयति। सर्वे च स्मयन्ते। ततः प्रद्युम्नः गाङ्गां सादरम् अवलोक्य –

प्रथितसगरापत्यप्राणप्रतिप्रसवस्सतां
सुकृतपदवीमुक्ताहारः क्षितेस्सुरनिम्नगा।
दुरितविततेर्लोपस्तापत्रयस्य महौषधं
हृदयतमसामित्संज्ञेयं पुनाति धिनोति च।। ५.७८।।

इत्येवं गङ्गायाः प्राभवं कीर्तयति। अन्ततः मातलिः विमानं वेगेन उत्थाप्य यमुनानदीतीरं प्रापयति।

पुनाति यमुना सेयमधुना मधुनाशिनः।
पल्लवीभावसाक्षिणी पयसाक्षिणी।। ५.८५।।

इति यमुनायाः पवित्रतां श्लाघते।

ततश्च कालिन्दीतटे राधाकृष्णयोः विहरणं यमुनानदीतीरे कृष्णस्य पर्यटनानि च मातलिः श्रावयति –

गोपीः क्वापि घने कदम्बकवने केनापि च छद्मना
हित्वा हन्त! कळिन्दजा तटवनं गत्वा समं राधया।
छन्नेषु स्वपदेषु मारुतचलत्सूनच्छटारेणुभिः
मार्गन्तीभिरमूभिरप्यविदितश्चिक्रीड चक्री चिरम्।। ५.८७।।

किं बहुना - **निस्त्रुट्यच्छकटासुराणि कुहना निष्पीतदुष्पूतना**
भूतप्राणमरुन्ति भञ्जिततृणावर्तप्रवृत्तीनि च[1]।
केळीक्षाळितदर्पकाळियफणक्ष्वेळ[2]व्यपायोल्लसत्
काळिन्दीनि च खेलितानि कुशलं कृष्णस्य पुष्णन्तु वः।। ५.८८।।

एवं विदूषकमायावतीतत्सखीजनैस्सह द्वारकासमीपमेत्य प्रद्युम्नः श्रीकृष्णप्रहितदूतवचनेन अतीव माता-पितृदर्शनसमुत्सुकः भवति। इति एवं पञ्चमाङ्ककथा।।

षष्ठाङ्ककथा :–

रुक्मिणी–श्रीकृष्णाभ्यां रति–प्रद्युम्नयोः मेलनं षष्ठाङ्के प्रधानतया अभिवर्णितम्। तथा हि – अङ्कादौ रुक्मिणी–श्रीकृष्णौ नारदप्रभृतयः मुनीन्द्राश्च उचितासनेषु उपविष्टास्सन्तः दृश्यन्ते। तत्र प्रथमं नारद–श्रीकृष्णयोः परस्परप्रभावप्रकटनपरं प्रशंसात्मकं सम्भाषणं प्रचलति। तत्र **भगवन् ! भवदीयचरणोदकपरिपालनकृतार्थात्मनाम् अस्मादृशाम् इमानि खलु सुलभानि शुभानि** इति श्रीकृष्णः नारदं प्रशंसति। नारदश्च अथवा निसर्ग एवायमुन्नतानाम्–

मन्दानप्याश्रितान् उच्चैः महान्तो बहु मन्वते।
शृङ्गिणः तृणगुल्मादीन् शिरसा न वहन्ति किम् ? ।।

इति नारदः महात्मनः श्रीकृष्णस्य औन्नत्यं प्रकटयति। ततः मध्ये अलीकतया रुक्मिणी सुतविरहशोक–दग्धायाः मम मुखपूर्णचन्द्रः पुत्रः न मे मुखं लोचनमलङ्करोति इति स्वबाधामावेदयति । वत्सले न मिथ्या ऋषिभाषितमिति न किं शृणोषि? मानिनीमणि निपुणमनालोच्य मास्म तावदेनं विदूदुषः – इति श्रीकृष्णः रुक्मिणीमाश्वसिति।

ततः कञ्चुकी, द्वारि प्रद्युम्नस्य निरीक्षणं श्रीकृष्णाय निवेदयति। तस्य आदेशं शिरसा धृत्वा, हर्षोत्फुल्ललोचनं सपरिवारं मायावत्या प्रद्युम्नं प्रवेशयति। प्रद्युम्नः श्रीकृष्णं सानन्दं दृष्ट्वा –

पुण्यानि सम्प्रति फलन्ति पुराकृतानि
मन्ये ग्रहाः युगपदेव मयि प्रसन्नाः।
लुब्धश्चिरादिह हतो मम लोचनालीः
मोदेन विन्दति मुकुन्दपदारविन्दम्।। ६.९।।

इति आत्मनः धन्यतां भावयति। ततः प्रद्युम्नः स्वपित्रे श्रीकृष्णाय मायावत्याः परिचयं वितरति। उपसृत्य नमस्कर्तुं पादपद्मयोः ग्रहणाय उद्युक्तं प्रद्युम्नं श्रीकृष्णः प्रतिषिध्य नारदादीनां मुनीन्द्राणां वन्दनाय सूचयति। प्रद्युम्नः –

भगवन् ! नारदमुने ! प्रचार्यं पद्मसम्भविम्।
कार्ष्णिः प्रद्युम्नवर्माहं भवन्तमभिवादये।।

इति नारदचरणौ उपसंगृह्णाति। नारदः सादरं समालिङ्ग्य **'वत्स! प्रद्युम्न! भूयासीः शरदो भूयाः पूर्वपक्षहिमांशुवत्'** इति आशीः विदधाति। इतरांश्च मुनीन्द्रान् प्रद्युम्नः एवमेव नमस्करोति। ततः नारदवचसा प्रद्युम्नः स्वमातापित्रोः रुक्मिणी-श्रीकृष्णयोः पादारविन्दं वन्दते। मायावती च प्रद्युम्नमनुसरति। वात्सल्यानन्दसान्द्राभ्यां नयनाभ्यां रुक्मिणी तनयं निर्वर्ण्य स्वगतम् - अहो अत्यर्थसादृश्यमेतयोः पितृपुत्रयोः इति भावयति। श्रीकृष्णः - पूर्णमनोरथौ भूयास्ताम् - इति अभिकांक्ष्य, प्रणमन्तं पुत्रम् उत्थाप्य गाढं परिष्वज्य, मूर्ध्नि उपजिघ्रन् अङ्कमारोप्य -

न सुखयति शरीरं सान्द्रचन्द्रातपो मे
न खलु भवति चित्तानन्दनं चन्दनं च।
अवरलमिह सूनोः अङ्गसंश्लेष एषः
प्रशमयति हि तापं बाह्यमाभ्यन्तरञ्च ।।

इति गात्रपरिष्वङ्गसुखम् अनुभवति। नमस्कृतं तनयं रुक्मिणी सर्वत्र सर्वदा स्वपितरम् अनुसर्तुम् अभिकाङ्क्षति। रुक्मिण्याः तनयवात्सल्यं दृष्ट्वा नारदः पर्वतं प्रति जनन्याः वात्सल्यस्य पुरतः पितुः वात्सल्यम् अल्पीय एव। तथा हि -

घनायासा मासान् दश वहति गर्भं पुनरसा-
वहो सूतौ दुःखान्यनितरविषह्याणि सहते।
विधत्ते शिश्वर्थे विविधमयकर्मव्यसनिनी
निवर्तन्ते वाचः स्वयमतिशयात् मातुरतुलात् ।।

इति पुत्रेषु मातुः वात्सल्यं वर्णयति।

रुक्मिणी प्रद्युम्नसन्दर्शनेन अतिशयितमानन्दम् अनुभवन्ती, तद्विच्छेदाय असहमाना पुनरपि आपदः शङ्कमाना सती आन्दोलिता भवति। श्रीकृष्णः तस्याः शङ्कामपनुद्य धैर्येण स्थातुं समाश्वसिति। रुक्मिणी मायावतीं मात्यावत्याः परिचयादिकं ज्ञातुमिच्छति। नारदः मायावत्याः वृत्तान्तं रुक्मिण्यै निवेद्य, मायावती-प्रद्युम्नयोः परिणयम्, प्रद्युम्नकृतं शम्बरासुरवधं च कथयित्वा अनन्तरं भवत्योः मातापित्रोः सन्दर्शनाय रति-प्रद्युम्नयोः इदमागमनं प्रवृत्तम् - इति मायावत्याः प्रद्युम्नस्य भार्यात्वं वर्णयति।

अथ सभ्याः मुनयश्च प्रद्युम्नस्य कीर्तिप्रतिष्ठाकरं शम्बरस्य वधम् –

गीर्वाणस्त्रैणपीनस्तनकनकघटानल्पकर्पूरपूराः
श्रीमद्द्वैधात्रसौधाङ्कणतुहिननगोत्सङ्गगङ्गातरङ्गाः ।
भारश्रान्ता हि भूभृद्वदनदशशतीपारणश्रीरधाराः
जाग्रत्यस्योग्रतेजः किसलय सुमनस्फूर्तयः कीर्तयस्ताः ।।

इति बहुधा प्रशंसन्ति । बहुधा पुत्रवियोगमनुभूतापि रुक्मिणी पुत्रस्य पुनस्समागमेन कथायाः सुखावसानाय चिरं सन्तुष्टा भवति । इतःपरम् आपद्भ्यः सुतसंरक्षणाय श्रीकृष्णः रुक्मिण्यै जागरूकतां बोधयति । अत्रान्तरे नेपथ्ये दुन्दुभिध्वनिः श्रूयते । रुक्मिणी सहर्षमुत्थाय वधूवरौ संयोज्य कनकासने निवेशयति । मायावती व्रीडया अधोमुखी भवति । लज्जितां मायावतीं दृष्ट्वा प्रद्युम्नः आत्मनि तस्याः शृङ्गारसौन्दर्यम्–

प्रथमानमपि प्रियानुरागं गुरुभीत्या हृदि गोपितं प्रयत्नात् ।
विशदं पुलकाविवृण्वतेऽमी पिशुनत्वं सहजं हि कण्टकानाम् ।।

इति बहुधा प्रशंसन् आनन्दति । मायावती प्रद्युम्नयोः परस्परानुरागित्वं श्रीकृष्णः रुक्मिण्यै सूचयति । नूतनवधूवरयोः मायावती–प्रद्युम्नयोः आशिषः प्रदातुं सभ्यान् श्रीकृष्णः प्राञ्चलिः पृच्छति । ते च **सुधर्माभिरतावेतौ सुरसेन कृतादरौ भूयास्तां प्राप्तसन्तानौ शचीशत–मखाविव** – इति अक्षतान् समर्पयन्ति ।

श्रीकृष्णः सानन्दं सभ्यान् **किं वो भूयः प्रियमुपहरामि ?** इति पृच्छति । सभ्याश्च **देवकीनन्दन! न ह्यतःपरं नः प्रियमस्ति** इत्युक्त्वा – **''वृष्टिः भूयात्, नरपतिः नित्यं नीत्या धरित्रीमवतु, सर्वदा स्वाहाकाराः प्रथन्तां , वदान्यमणयः मान्यगुणाः धन्याः सन्तः दीर्घायुषः भवन्तु, विदुषां मन्दिरेषु स्थैर्यं विन्दतु, एतन्नाटककर्तुः सन्ततिः गुरोः प्रेयसी भूयात्, निगमान्तज्यं विज्ञानम् अल्पश्रुतैः विप्लावि मा भवतु । चक्री च शेषाद्रिशिखरे रमया चिरं क्रीडतु''** इत्येवं भरतवाक्येन सकलजनसुखम् अभिकांक्ष्य सर्वे निष्क्रामन्ति – इति षष्ठाङ्ककथा ।

नाटकस्य वस्तु–नेता–रसाः प्रधानाः विषयाः भवन्ति । तत्र प्रथमे अंशे मूलकथारूपेण भागवतकथा, द्वितीयांशे च नाटकस्य कथावस्तुत्वेन प्रद्युम्नानन्दीयनाटकाङ्ककथाः समुपस्थापिताः । अतःपरं प्रद्युम्नानन्दीयनाटकस्य अध्ययनम् क्रियते ।।

२. प्रद्युम्नानन्दीयनाटककथासमीक्षणम्

१. नामौचित्यम्

अस्य नाटकस्य नाम मद्रास्मातृकासु **प्रद्युम्नानन्दीयम्** इति, अपरासु मातृकासु **प्रद्युम्नानन्दम्** इति, मुद्रितपुस्तके **प्रद्युम्नानन्दनाटकम्** इति च दृश्यते। परं सर्वासु मातृकासु अनुगततया पुष्पिकायां **प्रद्युम्नानन्दनाम्नि नाटके** इत्येव दृश्यते। तस्य व्युत्पत्तिः औचित्यं च एवं प्रदर्श्यते –

१. प्रद्युम्नस्य आनन्दः – प्रद्युम्नानन्दः। रत्या पुनस्समागमेन, शम्बरस्य वधेन च प्रद्युम्नेन प्राप्तः यः आनन्दः सः **प्रद्युम्नानन्दः**। तम् अधिकृत्य कृतं नाटकं **प्रद्युम्नानन्दनाटकम्** इत्येका व्युत्पत्तिः।

२. जन्मनः सप्तमे अहनि अपहृतस्य प्रद्युम्नस्य समागमनेन माता–पितृभ्यां रुक्मिणी–श्रीकृष्णाभ्यां प्राप्तः यः आनन्दः सः **प्रद्युम्नानन्दः**। एवञ्च प्रद्युम्नेन प्राप्तः जननी–जनकाभ्यां प्रद्युम्नस्य समागमेन प्राप्तो वा यः आनन्दः सः **प्रद्युम्नानन्दः**। तस्य इदं नाटकम् – **प्रद्युम्नानन्दीयनाटकम्** भवति – इति द्वितीया व्युत्पत्तिः।

एवं प्रदर्शिते व्युत्पत्तिद्वये द्वितीयैव उचितेत्याभाति। यतः यदि रत्यास्समागमेन शम्बरस्य वधेन च प्रद्युम्नस्य जातो यः आनन्दः तमधिकृत्यैव अस्य नाटकस्य **प्रद्युम्नानन्दम्** इति नाम दत्तमिति सम्भाव्येत तर्हि एतद्विषयकम् इतिवृत्तम् चतुर्थाङ्कान्तेनैव सिद्ध्यतीति, तदनन्तरम् अङ्कद्वयस्य योजनं निष्प्रयोजनं भवेत्। तदङ्कद्वयगतकथाभागस्यापि उपयोगितायाः प्रतिपादनाय द्वितीया एव व्युत्पत्तिः उचिता भवति इति एतदेव कवेरभिमतम् इति च अनुसन्धात्रा मन्यते।

प्रद्युम्नानन्दे वस्तुतः शम्बरवधद्वारा निष्प्रत्यूहं नायकयोः मायावती–प्रद्युम्नयोः परस्परं रति–मन्मथत्वेन प्रत्यभिज्ञानपुरस्सरं निष्प्रत्यूहतया तयोः समागमफलकः कथाभागः यद्यपि चतुर्थाङ्कान्तेनैव अवसितः, तथापि कवेः न केवलमत्र शुद्धरति–मन्मथशृङ्गारगाधावर्णनमात्रं तात्पर्यविषयीभूतम्। किन्तु नाटकेऽस्मिन् **'मातृदेवो भव। पितृदेवो भव'** इति औपनिषदसंस्कृतिमाधारीकृत्य मातापित्रोः सन्निधौ प्रद्युम्न–मायावत्योः आनन्दः कवेः समुद्दिष्टोऽस्ति। अन्यच्च भगवान् वासुदेवः परिपूर्णानन्दस्वरूपः तदंशभूता लक्ष्मीस्वरूपा

रुक्मिणी अपि आनन्दस्वरूपा। प्रद्युम्ने पितुः श्रीकृष्णस्य अत्यन्तसादृश्यं रुक्मिणीवचनैः पर्वत–नारदादिवचनैश्च आविष्कृतम्। आत्मा वै पुत्रनामासि इति श्रुत्या, रूपँ रूपं प्रतिरूपो बभूव इति श्रुत्या च पुत्रः पितुः आकृत्यन्तरमेव। अत एव पितुः श्रीकृष्णस्य मातुः लक्ष्म्याश्च सन्निधौ प्रद्युम्नमायावत्योः समागमः कवेः तात्पर्यविषयीभूतोंऽशः। वस्तुतोऽपि –

विज्ञातोऽसि मया चिह्नैर्विना चक्रं जनार्दनः।
मुखं नारायणस्येव केशाः केशान्त एव च।। १०८. १८ ।।[1]

इति रुक्मिणीवचनाविष्कृतहरिवंशपुराणवचनभावनयाऽपि प्रद्युम्नः साक्षादानन्दस्वरूपः वासुदेव एव। **प्रख्यातः कृतिनायकस्तु भगवान् प्रद्युम्न एव स्वयम्** (१.१५) इति सूत्रधारवचनेनापि प्रद्युम्नः वासुदेवत्वेनैव नाटकेऽस्मिन् आविष्कृतः। तत्प्राप्तिरेव परमश्चरमश्च पुरुषार्थः। तदाविष्कारेच्छया इव नाटककर्ता वेङ्कटाध्वरिः चतुर्थाङ्कपरिसमाप्तियोग्यमपि नाटकं पुनरङ्कद्वयेन दीर्घीकृतवान्। तत्रापि भगवत्सन्निधौ भगवत्स्वरूपयोः रति–मन्मथयोः समागमविशेषा–विष्काराय भगवत्स्वरूपप्राप्त्युपायतया आत्मनः चित्तस्य शोधकतया इव पञ्चमाङ्के तीर्थयात्राः अपि प्रान्ततः शृङ्गारप्रधाने अन्ततः च महाध्वनिरूपेण शान्तरसप्रधान इव अवस्थितेऽस्मिन्नाटके वर्णिताः। ततश्च परमपुरुषार्थः आनन्दवासुदेवाभिन्नप्रद्युम्नानन्द एव अत्र प्रधानतया कवेरुद्दिष्ट इति **प्रद्युम्नानन्दीयम्** इति नाटकस्यास्य अत्यन्तं सुश्लिष्टं नाम।।

२. पञ्चसन्धीनां समन्वयः

एवम् अर्थप्रकृतीनां पञ्चानां पञ्च अवस्थाभिः यथासङ्ख्येन समन्वयात् 'मुख–प्रतिमुख–गर्भ–अवमर्श(विमर्श)–उपसंहृति(निर्वहण)सन्धयः पञ्च जायन्ते। तत्र **अर्थप्रकृतयः** पञ्च १. बीज–२.बिन्दु–३.पताका–४.प्रकरी–५.कार्यम् चेति। **अवस्थाः** पञ्च १.आरम्भ–२.यत्न–३.प्राप्त्याशा–४.नियताप्ति–५.फलागमाः चेति। तत्र –

सन्धिः :–

एकेन प्रयोजनेनान्वितानां कथांशानाम्, अवान्तरैकप्रयोजनसम्बन्धः सन्धिः। अर्थात् यत्र एकस्य अवान्तरप्रयोजनस्य सम्पूर्तिः तथा मुख्यप्रयोजनेन अन्वितःसन् कथांशस्य

1. हरिवंशपुराणे विष्णुपर्वणि अष्टाधिकशततमोऽध्यायः श्लोकः १८

अग्रिमप्रयोजनेन सह सम्बन्धः, तत्र तादृशसन्धेः व्यवहारः। यथा– अर्थप्रकृतिरूपेण एकेन प्रयोजनेन अन्वितेन **कार्येण** सह, अन्यत्र अवस्थारूपस्य अन्यप्रयोजने अन्वितस्य **फलागमस्य** च सम्बन्धः **निर्वहणसन्धिः** इति व्यवह्रियते।

२.१. मुखसन्धिः :–

मुखं बीजसमुत्पत्तिः नानार्थरससम्भवा।। १.२४।।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्।[1]

मुखसन्धौ नानारसान् उत्पाद्यमाना बीजोत्पत्तिः दृश्यते। अत्रैव रूपकस्य बीजभूतसूचना भवति।

बीजम् :– स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा । १.१७।।[2]

रूपकस्यारम्भे वृक्षस्य बीजवत् अल्परूपेण सङ्केतितं सत् कार्यसाधकं, पुरस्तात् अनेकप्रकारं विविधशाखाभिः वृक्षवत् विवृद्धं भवति तत् पारिभाषिकतया बीजम् इति व्यवह्रियते। इन्द्रनिर्देशात् प्रेरितः अहं (नारदः) शफरीजठरानुप्रविष्टं प्रद्युम्नम्, **'अयं भवत्प्रियतमः इति मायावतीं व्यज्ञापयम्'** इति पर्वतं प्रति नारदोक्तेषु अधो निर्दिष्टेषु **बीजं** दृश्यते –

प्रद्युम्न एष यदुवंशपतेः कुमारो
मारो भवत्प्रियतमो भुवि तन्वि जातः।
गोप्तुं त्वमर्हसि मनस्विनि गूढमेनं
दैत्यं निहत्य दयितोऽयमुपेष्यति त्वाम्।। १.३९।। इति।

आरम्भः :– औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।। १.२०।।[3]

अर्थात् इदमहं सम्पादयामि इत्येतादृशनिश्चयबुद्धिः आरम्भः इत्युच्यते।

एवं नारदोपदेशानन्तरं तत्रैव मायावती तमर्भकं प्रद्युम्नम् आप्तसखीहस्ते निक्षिप्य **संरक्षणीयः अयम्** इति दानेन, तयाऽपि आप्तसख्या तत्क्षणे एव दर्भकमुनिहस्तप्रापणेन भूयसे फललाभाय औत्सुक्यमात्रस्य प्रदर्शनात् इदम् **आरम्भस्य** उदाहरणं भवति।

1. द.रू.प्रथमप्रकाशः पृ. १७
2. द.रू.प्रथमप्रकाशः पृ. १३
3. द.रू.प्रथमप्रकाशः पृ. १४

एवं **बीज+आरम्भयोः** सम्बन्धे **मुखसन्धिः** अस्यापि आरम्भस्य **'अहो मायावत्याः लोकोत्तरं कार्यकौशलम्'** इति वचनेन प्रशंसायाः करणात् 'आरम्भः कथानायिकया कृतः' इत्यपि मन्तुं शक्यते, नायकस्य जन्मान्तरीयस्मृतिरहितत्वात्।

२.२. प्रतिमुखसन्धिः :–

बिन्दु–यत्नयोः योगे **प्रतिमुखसन्धिः।**

बिन्दुः :– अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।। १.१७।।[1] बीजस्य किञ्चित् लक्ष्य इव किञ्चिदलक्ष्य इव स्थितः प्रकाशः **बिन्दुः** इति अर्थप्रकृतिः भवति।

यत्नः :– प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः।। २०।।[2] फलस्य अप्राप्तौ उपाययोजनादिरूपः चेष्टाविशेषः **प्रयत्नः** नामकावस्था भवति।

यथा अस्मिन् नाटके प्रथमाङ्के विचक्षणा–मनोरमा–विदूषक–प्रद्युम्नानां सम्भाषणक्रमेण दर्भकमुन्याश्रमात् आगतः **कृष्णस्य विश्वप्रभोः पुत्रः यदुकुलख्यातः प्रद्युम्नः अयम्** इति मायावत्याः ज्ञाने सति मायावती तं दृष्ट्वा सलज्जम् अवनतमुखी तिष्ठति सन्दर्भेऽस्मिन् मायावत्याः प्रद्युम्ने अनुरागबीजं लक्ष्यम्, एवं प्रद्युम्नस्यापि **'मयि नूनम् अस्याः कन्दळितप्रेमानुबन्धमन्तःकरणम्, अहो ममाप्यस्याम् अतिवेलं कुसुमचापचापलम्, सान्द्रोन्मीलत्पुलकमुकुलैः मेदुरं गात्रमस्याः प्रादुर्भावं कथयति मयि प्रेमधाराङ्कुरस्य'** इत्यादिना नायिकाचेष्टासन्दर्शन–जनितमायावती–अनुरागः प्रद्युम्नाश्रितः अपि लक्ष्यः।

एवम् उभयनिष्ठतया परस्परालम्बनतया अवस्थितमिदम् अनुरागबीजम्। ततः –

कल्याणी योषिदियं कामं रतिरस्तु वामा वा।
असकृद्विमृशन्नप्यहमात्मानं न स्मरामि कन्दर्पम्।। प्रद्यु. १.८३।।

सौन्दर्यसारनिलया इति चापलेन
प्राज्ञः कथं परिरभेत परस्य दारान्।
उद्दामदीपकलिकां परमुज्ज्वलेति
कौतूहलात् क इह चुम्बितुमुत्सहेत।। प्रद्यु. १.८५।।

1. द.रू.प्रथमप्रकाशः पृ. १३ 2. द.रू.प्रथमप्रकाशः पृ. १५

इत्येवं मायावत्याः विषये स्वयं मन्मथत्वेन, मायावत्यां रतित्वेन वा प्रत्यभिज्ञाभावात् अनुरागबीजस्य अलक्ष्यत्वम्। एवं प्रथमाङ्के तदवसाने च लक्ष्यस्य अलक्ष्यस्य अनुरागबीजस्य द्वितीयाङ्के सोमश्रववृत्तान्तेन पुनः प्रकाशनात् प्रतिमुखसन्धिः।

बिन्दुः :– यथा– प्रद्युम्नस्य मायावत्यां साधारणसुन्दरीमणित्वेन अनुरागे सत्यपि प्रत्यभिज्ञानाभावात् मायावत्याः निराकरणे सति अनुरागस्य विच्छेदः पुनः मायावतीं निराकृत्य दर्भकमुन्याश्रमप्रत्यावर्तनसमये –

क्वेयं नाम रतिः, मुकुन्दतनुजः क्वाहं मनोजः क्व वा।
भूयस्सङ्गकतेति यद्यपि परं डोलायितं शङ्कया।
तामुद्दामघनस्तनस्तबकिनीं तन्वीं तथाप्यद्भुतां
स्मारं स्मारमिह स्थिता मम तनुस्तत्रैव लग्नं मनः।। प्रद्यु. १.९१।।

इति पद्ये प्रद्युम्नगतसन्देहेन निश्चयान्वेषिणा मायावत्यां स्वानुरागस्य विदूषकं प्रति प्रकाशनात् अयं बिन्दुः भवति। अत्र संशयः एव अच्छेदकारणं बिन्दुः भवति।

यत्नः :– प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः फलस्य अप्राप्तौ तदुपयोगि उपाययोजनारूपः चेष्टाविशेषः प्रयत्नः यद्यपि प्रयत्न–उदाहरणतया आलिख्य चित्रे नायकसन्दर्शनादिकम् अन्यत्र नाटकेषु उदाह्रियते। परम् अस्मिन् नाटके जन्मान्तरीयोदन्त–स्मृतिशून्यस्य नायकस्य चित्रे दर्शनापेक्षया तस्य जन्मान्तरस्मृतिसम्पादनोपयोगि सोमश्रववृत्तान्तः अत्र प्रयत्नकक्ष्याम् अर्हति।

२.३. गर्भसन्धिः :–

पताका–प्राप्त्याशयोः योगे **गर्भः।** गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः इति तल्लक्षणम्।

पताका :– **सानुबन्धं पताकाख्यम् ।। १.१३।।**[1] अर्थप्रकृतिः भवति। सानुबन्ध–वृत्तान्तलक्षणः पताकावृत्तान्तः यथा रामायणे सुग्रीवादिवृत्तान्तवत्। अत्र तादृशः कश्चन वृत्तान्तः नास्ति। वस्तुतः पताकायाः सर्वत्र आवश्यकता अपि नास्तीति केचिद्विमर्शकाः अभिप्रयन्ति।

1. द.रू. प्रथमप्रकाशः पृ. ८.

प्राप्त्याशा :– उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः।। १.२१।।[1] उपायस्य अपायशङ्कायाश्च सत्त्वात् अनिर्धारितैकपक्षः **प्राप्त्याशाख्यः** अवस्थाविशेषः भवति। उद्बोधनसरोजलपानेन प्रद्युम्नः पूर्वजन्मस्मृतिं प्राप्स्यतीति सोमश्रवोपदेशानन्तरं सानन्दं संस्कृतमाश्रित्य उक्तेन –

अन्तर्मग्नं विरहजलधेर्हन्त मन्देतरस्य
प्रौढैर्दुःखव्यतिकरमयैः पन्नगैर्यन्त्रिताङ्गम् .
भक्तश्रेयः प्रकटकमठस्साधु वोढा क्षमाया
मादृक्षं त्वं जनमुदहरो मन्दरागं क्षणेन।। २.३३।।

इति मायावतीवचनेन तद्गता प्राप्त्याशा व्यज्यते। एवं प्रद्युम्नस्य उद्बोधनसरोजलपानानन्तरम् **'हन्त! रतेः अधरसुधारसास्वादमहोत्सवम् अनुस्मारयति एतदीयं पयः** (प्रद्यु.३.१२) इति नायकगतायाः प्राप्त्याशायाः वर्णनात् अयं गर्भसन्धिः।

अत्र उद्बोधनसरोजलपानात्मकेन उपायेन मायावतीसमागमविषयिण्याः आशायाः शम्बरसैन्यध्वनिश्रवणेन भीतायाः मायावत्याः अपायशङ्कया च अनिर्धारितफलप्राप्तिरूपा प्राप्त्याशा अत्र वर्णिता।

२.४. अवमर्शसन्धिः :–

प्रकरी–नियताप्त्योः योगे **अवमर्शसन्धिः**।

प्रकरी :– प्रकरी च प्रदेशभाक्।। १.१३।।[2] रामायणे शबरीवृत्तान्तवत् अल्पवृत्तान्तः।

नियताप्तिः :– अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता।। १.२१।।[3] यत्र विघ्नस्य अभावेन फलप्राप्तिः सुनिश्चितः भवति तत्र नियताप्तिः नाम अवस्था सिद्ध्यति।

क्रोधेन व्यसनेन विलोचनेन वा गर्भनिर्भिन्नबीजार्थः यत्र पर्यालोच्यते स **अवमर्शसन्धिः**। यथा – नाटकेऽस्मिन् चतुर्थाङ्के मायावती प्रणयविघातुकस्य शम्बरस्य विषये क्रोधेन प्रद्युम्नेन पर्यालोचनात् अवमर्शः शम्बरवधानन्तरम् अपायाभावतः नायिका–समागमस्य सुनिश्चितस्य सूचनात् नियताप्तिः। अत्र प्रकरीवृत्तान्तः अपि नास्ति।

1. द.रू. प्रथमप्रकाशः पृ. १५
2. द.रू.प्रथमप्रकाशः पृ. ८
3. द.रू.प्रथमप्रकाशः पृ. १५

२.५. निर्वहणसन्धिः :–

कार्य–फलागमयोः योगे **निर्वहणसन्धिः**।

कार्यम् :– कार्यं त्रिवर्गः तच्छुद्धमेकानेकानुबन्धि च।। १.१६।।[1] रूपके धर्मार्थकामाः फलम्। तच्च शुद्धत्वेन केवलं धर्मः फलं भवति, एवमर्थः कामश्च भवति। ते एव यदि मिश्रिताः तर्हि धर्मार्थौ, धर्मकामौ, अर्थकामौ, धर्मार्थकामाः वा अनुबन्धित्वेन विद्यन्ते।

इह दुष्टस्य शम्बरासुरस्य वधरूपस्य **धर्मस्य,** प्रद्युम्नस्य मायावत्यां रतित्वप्रत्यभि–ज्ञानरूपस्य **कामस्य,** मायावती–प्रद्युम्नयोः समागमरूपस्य **अर्थस्य** च सद्भावात् मिश्ररूपं कार्यं दृश्यते।

फलागमः :– समग्रफलसम्पत्तिः फलयोगो यथोदितः।। १.२२।।[2]

समस्तफलप्राप्तिः एव फलागम इत्युच्यते।

बीजवतां मुखाद्यर्थानां यत्र ऐकार्थ्योपनयः प्रचलति तत्र निर्वहणं निष्प्रत्यूहं आत्मनि मन्मथत्वप्रत्यभिज्ञानपुरस्सरं मायावती–प्रद्युम्नयोः समागमस्य षष्ठे अङ्के माता–पितृसन्निधौ निर्वाहात् अयं निर्वहणसन्धिः। सामान्यतः शास्त्रार्थे प्रसङ्गे प्रबन्धे वा उपक्रम–उपसंहारयोः चैककण्ठ्यम् अपेक्ष्यत इति शास्त्रविदां समयः।

मुखसन्धौ उपक्रमः निर्वहणसन्धौ उपसंहारश्च भवति। मध्ये मध्ये परामर्शोऽपि अपेक्ष्यते। एतादृशदृष्टिकोणं विचिन्त्य कृता रचना चिरकालस्थायिनी भवति। अन्यथा तु कृताः रचनाः मखे उत्पन्नाः ओषधयः पूर्व–फल्गुन्यामिव विनश्यन्ति। अतः नाटकस्यापि कथाभागसान्द्रतायै पञ्चसन्धीनामपेक्षा अस्ति।

एवं सम्यक् अस्मिन् नाटके पञ्चसन्धिनिर्वहणः कृतः इति ग्रन्थपरिशीलनया ज्ञायते।

1. द.रू.प्रथमप्रकाशः पृ. १२

2. द.रू.प्रथमप्रकाशः पृ. १६

३. नाटके काल्पनिकता

प्रद्युम्नानन्दीयम् दशरूपकप्रभेदेषु नाटकं भवति। नाटके च इतिवृत्तम् (वस्तु) **तत् प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम्**[1] – इति कारिकोक्तप्रकारेण अवश्यं प्रख्यातं भवेत्। प्रख्यातं नाम इतिहास–पुराणेषु प्रचलितम् इतिवृत्तम् इत्यर्थः। एवं पुराणानि इतिहासो वा प्रचलितम् इतिवृत्तं यथातथं पाठकानां पुरतः स्थापयन्ति। तत्र पात्रचित्रणस्य वा काल्पनिकथायाः वा अवकाशः एव न भवति। एवं पुराणेषु इतिहासे वा कथानायकः क्वचित् उदात्ततया क्वचिच्च अनुदात्ततया व्यवहरति। तत्र नायकः क्वचित् सत्यं क्वचिदसत्यमपि वदति। तदा अनुदात्तत्वम् असत्यकथनम् इत्यादिकं कथानायकम् अनुदात्ततया अनौचित्यपूर्णं करोति। एवम् अनुदात्तः अप्रसिद्धो वा पुरुषः नाटकस्य कथानायकः भवितुं नार्हति। अतः नाटककर्ता मूलकथातः इतिवृत्तं स्वीकृत्य तत्र कथानायकस्य उदात्तायाः आदर्शनीयतायाः वा यथा भङ्गः न आपतति तथा कथानायकम् उत्तमपुरुषत्वेन चित्रीकृत्य प्रेक्षकाणाम् आदर्शभूतस्य नायकस्य जीवनं प्रदर्शयति।

यत् तत्रानुचितं किञ्चित् नायकस्य रसस्य वा।। २४।।
विरुद्धं तत्परित्याज्यम् अन्यथा वा प्रकल्पयेत्।। २५.अ।।[2]

इत्यादिना लक्षणकाराः अपि नाटके नायक–रसाद्यौचित्यसंरक्षणार्थं मूलकथापरिवर्तनाय इत्थमवकाशं कल्पितवन्तः।

तस्यायं भावः। नाटकं हि कस्यचित् महनीयस्य आदर्श–प्रायजीवनं चित्रयति। आदर्शजीवनस्य भङ्गकराः अंशाः ये केचन मूलकथायां भवन्ति, विरुद्धान् तान् अंशान् अवश्यं परित्यजेत् अथवा यद्यवकाशः भवति अन्यथा मूलकथायाः भिन्नतया कथानायकस्य औचित्यपोषकतया वा प्रकल्पयेत् – इति।

एष विरुद्धांशत्यागः वा अन्यथाप्रकल्पनं वा कथानायकस्य व्यक्तित्वम् आदर्शप्रायं करोति। प्रेक्षकाणां मनांसि आवर्जयति। एतत् दृष्ट्या अस्य नाटकस्य विमर्शने नायकस्य आदर्शनीयता सम्पादने मूलकथायाः विरुद्धतया कल्पिताः विषयाः अत्र उपस्थाप्यन्ते।

इदम् **श्रीमद्भागवतमहापुराण–विष्णुमहापुराण–हरिवंशपुराणेषु महाभारतेति–हासाश्रितं** प्रसिद्धम् इतिवृत्तम्। पुराणेषु विद्यमानः प्रद्युम्नोत्पत्तिः, रतिप्रद्युम्नयोः समागमः,

1. द.रू. तृ.प्र. पृ. १६३. 2. द.रू. तृ.प्र. पृ. १६३, १६४

शम्बरासुरवधः इत्येवमात्मकः विषयः मूलकथानाम्ना व्यवह्रियते। तत्र तत्र पुराणेषु विद्यमानानां विषयाणां, तद्विरुद्धतया प्रद्युम्नानन्दीयनाटके नायकौचित्यरक्षणाय कल्पिताः केचन विषयाः अत्र प्रस्तूयन्ते।

३.१. अन्यथा कल्पनम् (मूलकथायां मायावत्याः मातृत्वम् – नाटके परदारत्वम्):–

तामह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा।
मातृभावमतिक्रम्य वर्तसे कामिनी यथा।। ११।।[1]

प्रसज्जन्तीं तु तां प्राह स कार्ष्णिः कमलेक्षणाम्।
मातृत्वमपहायाद्य किमेवं वर्तसेऽन्यथा।। १५।।

सा तस्मै कथयामास न पुत्रस्त्वं ममेति वै। १६।।[2]

प्रद्युम्न उवाच :– **मातृभावं व्यतिक्रम्य किमेवं वर्तसेऽन्यथा।**
अहो दुष्टस्वभावाऽसि स्त्रीत्वे चपलमानसा।। १८।।

या पुत्रभावमुत्सृज्य मयि लोभात् प्रवर्तसे।
न तु तेऽहं सुतः सौम्ये! कोऽयं शीलविपर्ययः।। १९।।[3]

इत्येवं पुराणेषु प्रद्युम्नः मायावतीं मातृभावेन पश्यति। मातृभावात् भिन्नतया पुत्रं प्रति अनुरागदृष्ट्या प्रवर्तनम् आश्चर्यं जनयतीति प्रद्युम्नः मायावतीं पृच्छति। इदं पौराणिकं भाषणं नाटककथानायकस्य प्रद्युम्नस्य उदात्ततामपहरति। तथा हि प्रद्युम्नः प्रथमतः मायावत्यां मातृभावेन प्रवर्त्य, पुनः मयावत्याः एव वचनानुसारं तां भार्यात्वेन स्वीकरणं तस्य मानसिक–चपलतामेव सूचयति। एवं प्रद्युम्नस्य चपलत्वेन प्रदर्शनं सहृदयम् उद्वेजयति।

एवम् अनुचितत्वेन विद्यमानां मातृत्वभावनां परित्यज्य नाटककर्ता दर्भकमुन्याश्रमं कल्पयित्वा तत्र प्रद्युम्नं वर्धयति। प्रथमाङ्कावसाने विचक्षणासहितायाः मायावत्याः समवधाने विदूषकेन चोदितः प्रद्युम्नः –

सौन्दर्यसारनिलया इति चापलेन
प्राज्ञः कथं परिरभेत परस्य दारान्।
उद्दामदीपकलिकां परमुज्ज्वलेति
कौतूहलात् क इह चुम्बितुमुत्सहेत।। १.८५।।

1. भाग. द.स्क., अ.५५, श्लो.११
2. विष्णु. अ.२७, श्लो.१५–१६
3. हरि. अ. १०४, श्लो. १८–१९

इति श्लोकेन मायावतीं परदारात्वेन निराकरोति। पुनः द्वितीयाङ्कप्रारम्भे **लब्धवर्ण**द्वारा– **प्रद्युम्नेन खलु अनात्मज्ञेन परदारा बुद्ध्या प्रत्यादिष्टा मायावती ...** इत्येवमात्मना आकाशभाषणं कारयति। एवं भाषणाद्वयेन, मूलकथायां मातृभावेन आदौ प्रवर्तितस्य प्रद्युम्नस्य मायावत्याम् अनुरागित्वेन वर्णनात् आपतितम् अनौचित्यं, नाटके परदाराभावेन दूरतः प्रवर्तमानस्य प्रद्युम्नस्य उद्बोधनसरः प्रवेशेन स्वयं वृत्तान्तज्ञानानन्तरम् अनुरागित्वेन वर्णनं कथानायकस्य उदात्ततां द्विगुणीकरोति। एवं परदारात्वकल्पनं मातृत्वेन भावितायां मायावत्याम् अनुरागप्रदर्शनपरम् अनौचित्यम् अपहरति, परदारानभिगमत्वेन प्रद्युम्नस्य धार्मिकतां प्रकटयति च। एवम् अनौचित्यपरिहारपूर्वकम् एतत् कल्पनं नाटकस्यास्य रमणीयतां पुष्णाति।

३.२. उद्बोधनसरसःवृत्तान्तकल्पनाभूमिका :–

प्रद्युम्नानन्दीयनाटके रति-प्रद्युम्नयोः परिणयवृत्तान्तः वर्णितः। अत्र प्रधानतया नायिका-नायकौ दिव्यपुरुषौ। मायावती च तपसा तुष्टस्य शिवस्य वचनानुसारं मायारूपं धृत्वा शम्बरासुरगृहे स्वपातिव्रत्यं रक्षन्ती पाकशालाधिकारं प्राप्य रुक्मिणी श्रीकृष्णभ्यां जनितं जन्मान्तरप्राप्तम् आत्मपतये निरीक्षते। नायकः प्रद्युम्नस्तु जन्मान्तरस्मृतिहीनः अस्ति।

अतः कविना वेङ्कटाध्विरिणा नाटकीकरणाय कल्पनानि अनेकानि कृतानि। तत्र शिशोः विद्याभ्यासादिशिक्षणाय यौवनारूढतापर्यन्तं प्रवर्धनाय च **दर्भकमुन्याश्रमकल्पनम्**, रतिप्रद्युम्नयोः मेलनाय **वसन्तोत्सवकल्पनम्**, तत्र प्रद्युम्नेन परभार्यात्वेन निराकृतायाः मायावत्याः विरहवेदनापनोदनाय **सोमश्रवसः वृत्तान्तकल्पनम्**, शिवोपदिष्टमायाविद्यया उद्बोधनसरः प्रति प्रद्युम्नागमनोपायतया मायाशक्तिकल्पनं, मायाशक्त्याश्च मायावतीनिष्ठायाः **शार्दूलात्मना परिणामकल्पनम्,** तस्य प्रद्युम्नस्य जन्मान्तरसंस्कारोद्बोधनाय सार्थकनामौचित्ययुक्तम् **उद्बोधनसरःकल्पनम्** च मुख्यानि। पूर्वोक्तकल्पनासु उद्बोधनसरःकल्पना अत्यन्तप्रधानभूता। सैवात्र विव्रीयते —

प्रद्युम्नानन्दीयनाटके तृतीयाङ्के उद्बोधनसरसः वृत्तान्तम् हृदयमिव प्रमुखस्थानमाक्रमति। तथा हि – प्रद्युम्नान्दीयनाटकं प्रख्यातम्, दिव्यमितिवृत्तम् आधारीकृत्य निर्मितम्। भागवत–विष्णुपुराण–हरिवंशादिषु विद्यमानम् इदं पौराणिकमितिवृत्तम् असहजम् इदानीमनुचितम् असुन्दरञ्च वर्तते।

३.२.१. मूलकथा :-

देवेन्द्रस्य प्रार्थनया परमेश्वरं तपसः भ्रष्टं कर्तुं, रत्या सह मन्मथः हिमालयं गच्छति। मदनबाणप्रहारेण ताडितः शिवः क्रुद्धस्सन् स्वफालनेत्राग्निना मन्मथं दहति। भर्तुः मदनस्य दहनेन विलपिता रतिः पुनः भर्तारं प्राप्तुं परमेश्वरमुद्दिश्य तपः करोति। तस्याः तपसा तृप्तः शिवः - **'शम्बरं हन्तुं रुक्मिणी-श्रीकृष्णयोः प्रद्युम्नः पुत्रत्वेन उदेति। तावत्पर्यन्तं त्वं मदुपदिष्टमायाविद्यया निजपातिव्रत्यं रक्षन्ती शम्बरगृहे भर्तृसमागमाय प्रतीक्षस्व'** इति रतिं सान्त्वयित्वा अन्तर्हितो भवति। कालान्तरे रुक्मिणी-कृष्णयोः प्रद्युम्नः उदेति। तज्ज्ञात्वा शम्बरः तं शिशुम् अनिर्दिशे /षष्ठे /सप्तमे (सप्तरात्रे) दिने समुद्रे पातयति। तत्र तं शिशुं कश्चन मीनः गिलति। स च मीनः धीवरेण गृहीतस्सन् उपहारत्वेन शम्बराय समर्पितः भवति। शम्बरः तं मीनम् इतरमीनैः सह पाकशालां प्रापयति। पचनाय च्छेदने तदन्तः सुन्दरशिशुः दृश्यते। मायावतीनाम्ना विद्यमाना रतिः तं दृष्ट्वा आश्चर्यचकिता भवति। नारदः समुपेत्य शिशोः पूर्वजन्मवृत्तान्तं मायावत्यै निवेदयति। तं च शिशुं सद्यः एव युवानं करोति। तद्यथा-

नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः।
जनयामास नारीणां वीक्षन्तीनां च विभ्रमम्।। ९।।[1] इति।

रतिः तं भर्तृभावेन वर्धयति पोषयति। किन्तु स च युवा मायावतीं मातरं मनुते। कदाचित् मायावत्याः अनुरागं दृष्टिमवगत्य कदाचित् प्रद्युम्नः -

तामह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा।
मातृभावमतिक्रम्य वर्तसे कामिनी यथा।। ११।।[2]

इत्यादिभिः किमिदमनुचितम् इति पुराणे पृच्छति। रतिः वस्तुतः स्थितं वृत्तान्तं कथयति। विदितसर्ववृत्तान्तः प्रद्युम्नः मायावत्याम् अनुरागं प्राप्य, शम्बरासुरं शत्रुं विज्ञाय संहरति। अस्यां मूलकथायां नाटकस्य दिव्यनायकस्य च अनौचित्यापादकाः विषयाः वर्तन्ते। तेषामत्र निर्देशः परिहारप्रकारश्च द्वित्रा निरूप्यते -

३.२.२. मूलकथायाम् अनौचित्यम् :-

---

1. भाग.१०. स्कन्धः ५५ अध्यायः ९ श्लो. 2. भाग.१०. स्कन्धः ५५ अध्यायः ११ श्लो.

१. मायावती प्रद्युम्नम् अनुरागदृष्ट्या पोषयति। प्रद्युम्नस्तु मातृभावेन प्रवर्तते। ततः तयैव विदितवृत्तान्तः तस्यां मायावत्यामेव अनुरागी भवति। अत्र प्रथमं मायावती–प्रद्युम्नयोर्मध्ये विद्यमानभावनाविरोधः रसभङ्गहेतुः भवति। न केवलं रसभङ्गहेतुरेव, अपि तु **एकत्रैवानुरागश्चेत्** ... इति आलङ्कारिकलक्षितरसरसाभासत्वस्यापि प्रसक्त्या इयं कथा रससिद्ध्यै नालं भवति।

२. प्रथमं मातृत्वेन भावितायां मायावत्यां तयैव बोधितः पुनस्तस्यामेव अनुरागितया, दयितात्वेन प्रवर्तत इति पुण्यसंस्कारवतः दिव्यकथानायकस्य प्रद्युम्नस्य औचित्यदायकं न भवति।

३. मीनस्य खण्डने दृश्यमानः सुन्दरशिशुः प्रद्युम्नः **रसायनैः अनुपदमेव युवा भवति** – इत्ययं मूलकथागतः अंशः आधुनिकानामूहापथातीतः वरीवर्ति – इति।

३.२.३. मूलकथायाम् अनौचित्यस्य परिहारः अथवा नाटकीकरणम् :–

यत् तत्रानुचितम् ... इति नाटकलक्षणकारैः कल्पितमवकाशं विनियुज्य अनौचित्यम् असहजं असुन्दरञ्च पौराणिकमितिवृत्तं वेङ्कटाध्वरिः स्वीयनाटककलावैदुष्येण औचित्यपूर्णं सहजसुन्दरं च कृतवान्। तथा हि –

१. प्रथमतः प्रद्युम्नः मायावत्यां मातृभावेन प्रवर्त्य, पुनः नाहं तव माता अपि तु ते दयिता रतिः, भवानपि मन्मथ एव इति मायावत्याः एव वचनेन, तस्यां प्रद्युम्नस्य दयितात्व–निर्धारणं नायकस्य सहृदयस्य वा न तथा विश्वासास्पदम्। कदाचित् स्त्रीस्वभावगतचापलेन एतत् मायावत्या विश्वासयितुम् एव उक्तं स्यात् इति भावविशेषोऽपि जायेत। एतादृशभावान्तर–प्रतिबन्धकस्थितौ पुराणकथायां सत्यां हठात् तस्याः वचनमात्रविश्वासेन प्रद्युम्नदयितात्वं दुस्सम्पादम्। अत एव अदृश्यां मायावतीगतां पौराणिकीं मायाशक्तिमपि अनादृत्य समान्यजन–सुग्रहशैलीमादृत्य कथाविपर्यासं नाटककविः कृतवान्। तत्र पुराणे आदौ मायावत्यां विद्यमाना मातृत्वभावना, तदनु दयितात्वभावना च केवलमायावत्याः उपदेशमात्रेण दुग्रहा इति भावेन माायावत्यां मातृत्वभावनां विहाय, प्रद्युम्नस्य दर्भकमुन्याश्रमे संवर्धनेन मायावत्यां सामान्य–वनितात्वम् अथवा परदारात्वमेव नाटककविना कल्पितम्। शम्बरगृहे मायावतीपाकशालाधि–कारिणीरूपेणैव नाटककविना कल्पिता, न शम्बरस्य भार्यात्वेन तस्याः कल्पनं कृतम्।

सप्ताहाभ्यन्तरकाले एव समुद्रक्षिप्तः प्रद्युम्नः **दर्भकमुन्याश्रमे वर्धितः** इति, मायावत्याः प्रद्युम्नस्य पूर्वपरिचयाभावात् तस्य मातृत्वभावना प्रसक्तिरेव नास्ति। अतः अनन्तरं तस्याः दयितात्वेन भाविस्वीकारे नास्ति दोषः। न वा तत्र सहृदयस्य कथायामुद्वेगः।

२. सम्भाव्यमानस्त्रीस्वभावसुलभचापलदोषया मायावत्या निवेदनमात्रेण **प्रद्युम्नः पूर्वजन्मविषयकज्ञानवान् भवति** इति मूलकथागतस्यानौचित्यस्य वारणाय **उद्बोधनसरसः वृत्तान्तः** कल्पितः।

३.३. उद्बोधनसरोवृत्तान्तः :–

दर्भकमुन्याश्रमे वर्धितः युवा प्रद्युम्नः वनसौभाग्यावलोकनकुतूहली सन् विदूषकेन सह उद्यानवनं प्रविशति। नारदोपदेशेन मायावती च सखीभ्यां कामदेवार्चनाय **मज्जदुज्जीवना–**भिधानं सरः आगच्छति। तत्र मायावती–प्रद्युम्नौ मिलित्वा परस्परमनुरागिणौ भवतः। अस्मिन्नेव सन्दर्भे मायावती सखीभ्यां प्रद्युम्नस्य पूर्वजन्मवृत्तान्तम् इयं रतिः इति, भवान् कामः इति ख्यापयति। परं **प्रद्युम्नः परदाराभिया सखीवचः निराकरोति।** तस्य निराकरणाय खिन्ना मायावती प्रद्युम्नस्य जन्मान्तरीयसंस्कारोद्बोधनाय उपायचिन्तनार्थं सोमश्रवसम् आकारयति। स च आगत्य ध्यात्वा, उद्बोधनसरसः जलपानेन प्रद्युम्नः जन्मान्तरीयसंस्कारं प्राप्नोति – इति उपायं कथयति । तं प्रद्युम्नम् उद्बोधनसरसि जलस्य पानाय, मायावती मायां सृष्ट्वा भयङ्करशार्दूलरूपं धृत्वा दर्भकमुन्याश्रमप्रान्तीय जनान् भाययति। आश्रमजनरक्षणाय प्रद्युम्नः शार्दूलम् अनुसरति। अन्ततः मायाशार्दूलः उद्बोधनसरस्तीरं गत्वा अन्तर्हितो भवति। आश्रमवासिनां रक्षणाय शार्दूलमनुधावन्नागतः प्रद्युम्नोऽपि श्रमापनोदनाय उद्बोधनसरसि जलं पिबति। तस्य महिमा पञ्चमाङ्के एवं वर्णिता –

उद्दामहेममयतामरसाभिराम-*मुद्बोधनं* जगति तीर्थमिदं वदन्ति।
आस्वादयं यदमृताचमनावबुद्ध-प्राग्जन्मवृत्तिरचिरादधरामृतं ते।। ५.२०।।

तृतीयाङ्के च उद्बोधनसरः समीपमागत्य प्रद्युम्नः – "यन्मया कञ्चन पुण्डरीकमनुधावता काञ्चनपुण्डरीक-परिमण्डितं महदिदमत्यद्भुतं तीर्थमासादितमित्यवतीर्य सरस्तीर्थं नाटितकेन।

पद्यम् - **प्रचलितकलहंसीपक्षविक्षेपवेग-प्रभवपवनचञ्चत्काञ्चनाम्भोजवान्तैः।**
मधुरमधुरसौघैर्मांसळस्वादुतोयं, दिशति सर इदं मे चक्षुषोर्दीर्घमायुः।। ३.११।।

तदस्यैवोदकेन कान्तारभ्रमणतापमपनेष्यामि (इति तदीयं विमलकमलपरिमळसुरभिळ-मुदकमास्वाद्य मुहूर्तमिव ध्यायन्नुत्थाय, सानुस्मरणरोमाञ्चम्।)

"हन्त! रतेरधरसुधारसास्वादमहोत्सवमनुस्मारयत्येतदीयं पयः। ततश्च नूनं भवान्तरीयवृत्तान्ता-नुस्मरणमहौषधं तदिदमुदकमिति तर्कयामि। यदिदानीम्।

पद्यम्- **रोमाञ्चकर्कशरतिस्तनशातकुम्भ-कुम्भोपमर्दिपरिरम्भणसम्भ्रमाणि।**
तानि प्रसूनधनुषो मम ताण्डवानि चेतस्स्वयं स्मरति हन्त! चिराय भूयः।।३.१२।।

(पुनर्निध्याय सविषादनिर्वेदम्) सविप्रतिसारं च - हा हतोऽस्मि महता प्रमादेन।

इत्यादिवर्णयति। तेन प्रद्युम्नस्य जन्मान्तरीयसंस्कारः उद्बुध्यते। मायावत्या कथितं स्मृत्वा प्रद्युम्नः विरहदुःखमनुभवति।

अ. एतेन वृत्तान्तेन मायावत्या निवेदनमात्रेणैव जन्मसंस्कारलाभः इति मूलकथागतम् असामञ्जस्यम् अपगतं भवति।

आ. दिव्यकथानायकस्य प्रद्युम्नस्य उदात्तता रक्षिता भवति।

३. मीनच्छेदने दृश्यमानं शिशुं मायावती सखीभ्यां दर्भकमुन्याश्रमं प्रापयित्वा तत्र पोषणाय वर्धनाय च सौकर्याणि करोति। तस्य योगक्षेमादिकं मध्ये मध्ये सखीभ्यां जनाति च। एतेन प्रद्युम्ने क्रमिकाभिवृद्धेः अवकाशस्य कल्पनात्, मूले हठात् रसायनैः सम्पादितं युवकत्वं निवारितम्।

एवं दिव्यकथानायकस्य प्रद्युम्नस्य उदात्ततापरिरक्षकं कथायाः सहजता सम्पादकम् इदम् उद्बोधनसरोवृत्तान्तम् अभिज्ञानशाकुन्तलगतं दूर्वासशापवृत्तान्तं सर्वथा अनुकरोति इति वक्तुं शक्यते। तद्यथा – **भावस्थिराणि जननान्तरसौहृदानि**[1] इति कालिदासोक्तरीत्या संस्काराः जन्मान्तरागताः यद्यपि सुदृढा भवन्ति तथापि तेषां संस्काराणां कदाचित् उद्बोधप्रतिबन्धे सति तिरोधानम्, उद्बोधकसमवधाने तु पुनः तेषामाविर्भावः इति मनस्तत्त्वविश्लेषकाणां

1. **रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्**
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वम्
भावस्थिराणि जननान्तरसौहृदानि।। ५.१००।। अभि.

सुदृढो निर्णयः। यथा च बलीयसा दूर्वासशापप्रभावेण शकुन्तलायाः विस्मरणं प्रत्यभिज्ञानाङ्गुलीयकदर्शनेन पुनस्स्मरणं, तद्वत् नाटकेऽस्मिन् जन्मान्तरव्यवहितरतिप्रेम्णः संस्काराणां जन्मव्यवधानेन तिरोधाने सति, पुनः **उद्बोधनसरो जलपानेन आविर्भावः** इति अभिज्ञानशाकुन्तलोदन्तसादृश्यं महदस्ति। इयांस्तु विशेषः यत् तत्र तज्जन्मवृत्तान्तस्यैव बलीयसा शापप्रभावेण विस्मरणम्, अत्र तु जन्मव्यवधानेन पूर्वजन्मवृत्तस्य विस्मरणम् इति।।

४. नान्दी–विष्कम्भ–प्रवेशक–आकाशभाषितानां निरूपणम्

एवं नाटकेऽस्मिन् काल्पनिकतां ज्ञाते नाटककथांशनिर्वहणोपयोगिनाम् अंशानां परामर्शः संक्षेपेण अत्र विधीयते।

अङ्के सामान्यतः एकाहाचरितम् उदन्तं प्रचलत् निरूप्यते। तत्र नीरसस्य कथावस्तुनः नाटके साक्षात् प्रदर्शनायोग्यत्वात् विष्कम्भ–प्रवेशकादिभिः वृत्तस्य वर्तिष्यमाणस्य वा कथांशस्य नीरसस्यापि आवश्यकस्य वस्तुनः सूचनं भवति। क्वचित् आकाशसम्भाषणेनापि आवश्यकं कथावस्तु उपक्षिप्यते बाह्यसमाजात् आगन्तॄणां मानसिकोल्लासाय प्रस्तावनादिकम् आद्रियते। निर्विघ्नरसानुभूतिवितरणाय नान्दीपाठः अपि आद्रियते। अतश्च नाटकसाङ्केतिकपदानां नान्द्यादीनां स्वरूपमत्र उपस्थाप्यते।

४.१. नान्दी :– आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते।
देव–द्विज–नृपादीनां तस्मान्नान्दीति संज्ञिता।। ५.२४।।[1]

इति भरतोक्तनियममनुसृत्य प्रद्युम्नानन्दीयनाटके –

श्रीमद्धामसमामनन्ति कमलं तष्टान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तष्टन्धुरूपं बुधाः।
सावर्ण्यं तटिता-वपुश्शुभतरं धत्तेऽथवा तद्वता
भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे।। १.१।।

इत्यनेन श्लोकेन आशीः प्रयुक्ता। अत्र पद्ये शेषाचलवासिनोः पद्मावतीश्रीनिवासयोः स्तुतिं कृत्वा भगवतः प्रेक्षकाणाम् आशीः प्रसादयति। अतः देवाशीर्भिः युक्तत्वात् अयं श्लोकः नान्दीति कथ्यते। अपि च–

1. नाट्य. पञ्चमोऽध्यायः पृ. २१९

कृष्णेन स्नानकेळौ वसनमपहृतं याचमानास्सलज्जं
कालिन्द्यां गोपकन्याः प्रहसितुमपरास्वागतास्वङ्गनासु।
तं दृष्ट्वा लोभनीयं स्मरविवशतया स्रस्तवस्त्रासु तौल्यात्
सानन्दाः पश्यतस्ताः कलयतु कुशलं तस्य मन्दस्मितं नः।। १.२।।

अस्मिन् पद्ये आशीः प्रदानपुरस्सरं प्रद्युम्नानन्दीयनाटकस्य कथावस्तु सूचयति। तथा हि अत्र **कृष्णेन** इत्यनेन कथानायकः प्रद्युम्नः, **स्नानकेलौ** इत्यनेन प्रद्युम्नस्य उद्बोधनसरसि पयःपानोदन्तः, **वसनमपहृतम्** इत्यनेन प्रद्युम्नस्य विस्मरणापगमनम्, **याचमानास्सलज्जं कालिन्द्यां गोपकन्याः** इत्यनेन प्रद्युम्नस्य जन्मान्तरस्मरणप्रापणाय मायावत्या क्रियमाणः प्रयासश्च संसूच्यते।

४.२. विष्कम्भः :–

इतिवृत्तं सूच्यमसूच्यं चेति द्विविधम्। असूच्यञ्च दृश्यं श्राव्यं चेति द्विप्रकारकम्। सूच्यवस्तूनां सूचना पञ्चभिः अर्थोपक्षेपकैः (अर्थस्य कथावस्तुनः सूचकैः) **विष्कम्भ–चूलिका–अङ्कास्य–अङ्कावतार–प्रवेशकैः**[1] सूच्यते। दशरूपककारः धनञ्जयः विष्कम्भकं लक्षयति –

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
सङ्क्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः।। १.५९।।[2]

विष्कम्भः सूच्यः अर्थोपक्षेपकः भवति। अतीतानां भाविनां च कथावयवानां ज्ञापकः मध्यमपात्रेण द्वाभ्यां मध्यमपात्राभ्यां वा सम्भाषणमाध्यमेन प्रयोजितो विष्कम्भः शुद्धः भवति। नीच–मध्यमैः पात्रैः युगपत्प्रयुक्तः **मिश्रविष्कम्भः**[3] भवति। अत्र पात्रभाषा शौरसेनीप्राकृतं विद्यते ।

आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः।[4]

अस्य विष्कम्भस्य प्रयोगः नाटके प्रथमाङ्कात् पूर्वमपि वर्तते। एवं द्वयोरङ्कयोः मध्येऽपि प्रयुज्यते। यदि पात्रद्वयमपि अधमव्यक्तिभ्यां प्रयोजितं भवति तर्हि प्रवेशकः भवेत्। नाटकारम्भे विष्कम्भकस्य वा अङ्कस्य वा प्रयोगः युक्त्या भवेत्। इयं च युक्तिः –

1. द.रू. प्रथमः प्रकाशः श्लो. ५८ पृ. ६७ 2. द.रू. प्रथमः प्रकाशः श्लो. ५९ पृ. ६८
3. **एकानेककृतः शुद्धः सङ्कीर्णो नीचमध्यमैः।। ६०.अ।।**
4. द.रू. तृतीयः प्रकाशः पृ.१६५, १६६

अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।। ३.२८।।

यदा सन्दर्शयेच्छेषं कुर्याद्विष्कम्भकं तदा।
यदा तु सरसं वस्तु मूलादेव प्रवर्तते।। ३.२९।।[5] इति।

वस्तु यदि नीरसं भवति अथवा विस्तृतं भवति तर्हि विष्कम्भकप्रयोगरचना कुर्यात्। यदि कथावस्तु आरम्भादेव रसमयं भवति तर्हि विष्कम्भप्रयोगः न करणीयः, साक्षात् अङ्कः प्रदर्शनीयः। नाटके विष्कम्भस्य अङ्कस्य च अयमेव भेदो वर्तते यत् विष्कम्भे श्राव्यं वस्तु सूच्यते, अङ्के तु दृश्यं वस्तु प्रद्युम्नादिपात्रद्वारा प्रत्यक्षतया प्रदर्श्यते। प्रस्तुतप्रद्युम्नानन्दीये विष्कम्भो यथा –

विरहिजनकृते वनप्रियो विषमशरोपचयैकसूचकः।
श्रुतिसुखशुभगानदक्षिणः प्रविशति पर्वतकाननान्तरम्।। १.१९।।

इदं नेपथ्यपद्यं प्रेक्षकान् नाटककथायाः उन्मुखान् करोति। प्रथमाङ्कप्रारम्भे आश्रमं प्रविशन् नारदः मुन्याश्रम–वातावरणं वर्णयति। एतत् प्रेक्षकाणां मनस्सु प्रशान्ततां पूरयति। नारद–पर्वतयोः सम्भाषणम् अत्र **शुद्धविष्कम्भः** भवति। वस्तु = कथा, सङ्ग्रहाय प्रवृत्तानां प्रवर्तिष्यमाणानां च घटनानां मध्यपात्रद्वारा सूचनस्यैव विष्कम्भः इति व्यवहारः।

प्रकृते नारद–पर्वतयोः सम्भाषणद्वारा – **रुक्मिण्यां प्रद्युम्नस्य जननम्, शम्बरेण तस्य अपहरणम्, अपहृतस्य समुद्रे पातनम्, पातितस्य शिशोः मीनेन गिलनम्, धीवरेण प्रापणम्, शम्बराय समर्पणम्, पाकशालाप्रेषणम्, मीनस्य खण्डनम्, अन्तः शिशोः दर्शनम्, अयं मन्मथः इति नारदेन मायावत्यै निवेदनम्, पोषणाय दर्भकमुनेः आश्रमे न्यासनम्, तस्य यौवनारूढत्वम्** – इत्येतावत्पर्यन्तं प्रवृत्ता कथा विष्कम्भेण सूचिता।।

एवं द्वितीयाङ्के लब्धवर्णः महेन्द्रचारः इत्यतः उत्तमपात्रप्रयोजितः शुद्धविष्कम्भः। ततः चतुर्थाङ्के कञ्चुकि–राक्षसरूपमध्यम–नीचपात्राभ्यां प्रयुक्तत्वात् मिश्रविष्कम्भः। पञ्चमाङ्कः च नारद–शिष्याभ्यां उत्तमपात्राभ्यां प्रयोजितः अतः शुद्धविष्कम्भः।

---

5. द.रू. तृतीयः प्रकाशः पृ.१६५, १६६

४.३. प्रवेशकः :–

प्रवेशकोऽपि विष्कम्भ इव भूतभविष्यदर्थज्ञापकः अनुदात्तोक्त्या नीचेन नीचैर्वा पात्रैः प्रयोजितः विष्कम्भलक्षणापवादः भवति। अत्र नीचपात्रप्रयुक्तत्वात् उक्तिः उदात्ता न भवति। अर्थात् भाषा कदापि संस्कृतं न भवेत्। सदा प्राकृतं भवति तत्रापि प्राकृतभाषा शिष्टप्राकृतं (शौरसेनीप्राकृतम्) न भवति, अपि तु मागधी, शकारी, आभीरी, चाण्डाली, पैशाची इत्याद्यशिष्टप्राकृतं भवति। अस्य प्रवेशकस्य प्रयोगः द्वयोः अङ्कयोः मध्ये विद्यते। प्रवेशकः आद्याङ्के न प्रयोक्तव्यः। तद्यथा –

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः।। १.६०।।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः।[1]

प्रद्युम्नानन्दीये द्वितीयाङ्कस्यान्ते तृतीयाङ्कस्यारम्भे अर्थात् द्वितीय–तृतीयाङ्कयोर्मध्ये मायावतीप्रयुक्ता मायारूपनीचपात्रेण –

"जह मह वल्लहो पोक्खरारण्णभूसणस्स उब्बोहणसरस्स परिसरं परावडिस्सदि। तह तु एकादव्वम्। अहं वि विरहतावावणोअणकदे तदंतिअट्ठिदं विविह-कुसुमप्पसरंत-मअरंदसीदलं कवित्थवणं उवगच्छिस्सं। तुमं तुण्णं गच्छ" (इति)।

"ता मए को एद्ध उवाओ करणिज्ञो" - (इति चिन्तामभिनीय सोत्साहम्)।

एव्वं एद्ध करिस्सं - "जह दाणिं दारुणसद्दूलरूपं कदुअदब्भअ महेसिणो आसमं गदुअ मए तत्त जंतूणं खोहो कादव्वो।। तदो आसमक्खोहभीदेहिं मुणिंदेहिं मह वहकदे पत्थिदो पज्जुण्णो मह पआइं अणुसरिस्सदि।। जावहि तस्स लोअणगोअरो भविस्सं। अह उब्बोहणसरपरिसरं गदुअ तत्त तिरोहाणं पडिवज्जिस्सामि। संपदं विलंबो ण कादव्वो।" - (इति सत्वरं निष्क्रान्ता।।)

इत्येवंप्रयुक्तत्वात् **प्रवेशकः** नाम अर्थोपक्षेपकः भवति।

---

1. द.रू. प्रथमप्रकाशः, पृ. ६८, प्र.रु. नाटकप्रकरणम्, का. २४ पृ. ८१

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
प्रवेशकस्तु नाद्येऽङ्के नीचपात्रप्रयोजितः।। प्र.रु. १.२४।।

अयं प्रवेशकभागः प्रद्युम्नस्य जन्मान्तरीयसंस्कारोद्बोधनाय क्रियमाणम् आचरिष्य–माणमुपायं ज्ञापयति। इदं वृत्तान्तम् अभिज्ञानशाकुन्तलस्थम् अङ्गुलीयकदर्शनवृत्तान्तं स्मारयति। दारुणशार्दूलवृत्तान्तम् अभिज्ञानशाकुन्तलस्थं मदगजवृत्तान्तं स्मारयति। प्रद्युम्नस्य प्रतिस्पन्दनं दुष्यन्तस्य प्रतिस्पन्दनं स्मारयति।

तदस्यैवोदकेन कान्तारभ्रमणतापमपनेष्यामि (इति तदीयं विमलकमलपरिमळ-सुरभिळमुदक-मास्वाद्य मुहूर्तमिव ध्यायन्नुत्थाय, सानुस्मरणरोमाञ्चम्।) —

हन्त! रतेरधरसुधारसास्वादमहोत्सवमनुस्मारयत्येतदीयं पयः। ततश्च नूनं भवान्तरीयवृत्तान्ता-नुस्मरणमहौषधं तदिदमुदकमिति तर्कयामि। यदिदानीम्।

इति जन्मान्तरोद्बोधनम् अनुभूयमानः प्रद्युम्नः, धीवरेण प्राप्तम् अभिज्ञानं लब्ध्वा शकुन्तला–स्मृतिमवाप्तं दुष्यन्तं स्मारयति। प्रद्युम्नविरहस्य दुष्यन्तविरहस्य च साम्यं वर्तते। अत्र प्रद्युम्नेन अनुभूयमानमिव प्रदर्शितं विरहवेदनं रसास्वादनाय यद्यपि मधुरं तथापि प्रेक्षकाणां किञ्चिदिव उद्वेगं जनयति इव आभाति। अत्र तापातुरा सखीभ्याम् आश्वास्यमाना मायावती, अभिज्ञानशाकुन्तले तृतीयाङ्के दुष्यन्तविरहवेदना–मनुभवन्तीम् अनसूया–प्रियंवदाभ्यां सेव्यमानां शकुन्तलां सूचयति।

४.४. आकाशभाषितम् :–

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।
श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम्।। १.६७।।[1]

यत्र **किं ब्रवीषि** इत्यादिकथयन् परस्य पात्रस्याभावेऽपि अनुक्तमपि श्रुत्वा इव कथनोपकथनं करोति तत्र आकाशभाषितम् इति तस्य स्वरूपम्। एकपात्रपरिमितं भाणाख्ये रूपके आकाशभाषितस्य प्रयोगः प्रसिद्धः। आधुनिके काले तु एकपात्राभिनये **(Mono-action)** द्रष्टुं शक्यते।

द्वितीयाङ्कप्रारम्भे – लब्धवर्णः एकः प्रविशति। अयं मायावतीप्रद्युम्नयोः उदन्तमवगन्तुम् ऋक्षवन्तं प्रहितः महेन्द्रचारः।

1. द.रू. प्रथमः प्रकाशः पृ. ७३

"... प्रद्युम्नेन खल्वनात्मज्ञेन परदारबुद्ध्या प्रत्यादिष्टा मायावती तद्विरहदहन-सन्तापमनुभवन्ती सखीभ्यां सोपचारमाश्वास्यमाना क्रीडावने गूढमास्ते। तत्कृते प्रद्युम्नस्य प्राचीनजन्मसंस्कारोद्बोधनोपायं प्रष्टुकामया विचक्षणया प्रेषिताऽस्मि महायोगिनमेनमानेतुम्"

इति लब्धवर्णस्य आकाशभाषणम्। प्रद्युम्नेन परदाराबुद्ध्या मायावत्याः निराकरणम्, मायावत्याः विरहवेदनम्, प्रद्युम्नस्य पूर्वजन्मसंस्कारोद्बोधाय उपायचिन्तनप्रयत्नश्च प्रचलतीति ज्ञायते अनेन आकाशभाषणेन । अत्र च प्रथमाङ्कावसाने विच्छिन्नस्य मायावतीप्रद्युम्नप्रणय-प्रसङ्गस्य लब्धवर्ण-आकाशभाषणेन प्रबोधनोपास्यसोमश्रवसः वृत्तान्तस्य ज्ञापनात् तद्वारा पुनः तयोः प्रणयप्रसङ्गस्य तथा पुरोनयनात् आकाशभाषितस्योपयोगः।।

४.५. प्रासङ्गिकम् अभिज्ञानशाकुन्तलस्य साम्यम् :-

तदनन्तरं प्रद्युम्नविदूषकयोः सम्भाषणं प्रवर्तते। अनेन सम्भाषणेन प्रद्युम्नस्य यौवनारूढमनस्कत्वं प्रेक्षकाणां ज्ञापितं भवति। तत्र सहकारवृक्षाणां कुरङ्गाणां नदीनदानां च वर्णनं प्रद्युम्नस्य लालित्यं प्रकृतिप्रियत्वं च प्रकटयति। ततः ससखीभ्यां मायावत्याः प्रवर्तनम् अभिज्ञानशाकुन्तले वृक्षसेचनसन्दर्भे अनसूया-प्रियंवदाभ्यां युक्तायाः शकुन्तलायाः स्वभावं प्रवर्तनं च ज्ञापयन्ति। अत्रैव प्रद्युम्नस्य – **तदेहि तावदन्तिकवर्ति वेतसलताकुहरति-रोहितात्मानौ विस्रब्धमासां व्यापारमवधारयाव** इति वचनं, वृक्षसेचनं कुर्वन्तीं शकुन्तलां पश्यतः दुष्यन्तस्य स्वगतवचनं स्मारयति।

५. नाटककर्तरि पूर्वकविप्रभावः

नाटककर्ता वेङ्कटाध्वरिः प्रद्युम्नानन्दीयनाटकम् अभिज्ञानशाकुन्तलसाम्येन नायकस्य प्रद्युम्नस्य मन्मथत्वप्रत्यभिज्ञानं मायावतीविषये रतित्वप्रत्यभिज्ञानं च उपनिबद्धवान् इति अभिज्ञानशाकुन्तलकथया अत्यन्तसुश्लिष्टं नाटकमिदम् इति प्राङ् निवेदितम्। इदानीं तु न केवलं प्रधानकथासाम्यम् अपि तु तत्र तत्र पात्रगतसादृश्यमपि अस्तीति निवेद्यते। यथा –

१. प्रकृतनाटकचतुर्थाङ्ककथायां कञ्चुकिपात्रोक्तयः अभिज्ञानशाकुन्तलीयकञ्चुकिवचनैः तुलामर्हन्ति।

प्रागासीज्जनवारणाय भवनद्वारिप्रभोरन्वहं
निर्यातेषु वयस्सु या कतिपयेष्वालम्बनायाभवत्।
यष्टिस्सैव कुलक्रमादुपगता यस्या भरादद्य मे
भारायैव चिराय पर्यवसिता तस्यै जरायै नमः।। प्रद्यु.४.१।।

आचार इत्यभिहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लबगतेरवलम्बनार्था।। ५. १०१।।[1]

इत्युभयत्रापि पूर्ववयसि अधिकारयष्टेः उत्तरवयसि आलम्बनयष्टित्वं तुल्यम्।

२. एवं नाटकेऽपि प्रद्युम्नानन्दीये प्रथमाङ्कावसाने विचक्षणया बोधितस्य प्रद्युम्न–मायावत्योः रति–मन्मथभावस्य –

प्रद्युम्नः :- (सावज्ञम्) पण्डिता हि भवती दुरुपपादानामप्युपपादने विचक्षणा खल्वसि।।

पद्यम् - **आपातसुन्दरमनर्थकरं विमर्शे क-**
श्श्रद्दधीत वचनं भुवि कामिनीनाम्।
किं पाकलब्धसहकारफलानुकारं
किंपाकभूरुहफलं निपुणा गृणन्ति।। १.८६।।

इत्येवमात्मना प्रद्युम्नेन कृतं निराकरणम्, अभिज्ञानशाकुन्तले प्रत्याययितुम् उपक्रान्तायाः शकुन्तलायाः राज्ञा दुष्यन्तेन **स्त्रीणामशिक्षितपटुत्वममानुषीषु** इत्येवमात्मना कृतं प्रत्यादेशं स्मारयति।

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजात–
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति।। ५.१२०।।[2]

इति श्लोकेन नाटककारेण पारुष्यं विना राज्ञा कृतं प्रत्यादेशं स्मारयति।

1. अभि. पृ. 181
2. अभि. पञ्चमाङ्कः पृ. 211

३. एवं भासनाटकचक्रेषु नैकत्र मुमूर्षोः **आपस्तावत्।। २।।** इति वचनानि श्रूयन्ते। एवमेव अत्रापि नाटके पञ्चमाङ्के युद्धरङ्गे **हा ताडिताय विशिखेन पयः पयो मे** (प्रद्यु. ५.२१) इति श्रूयते।

४. एवं प्रकृतनाटके पञ्चमाङ्ककथायां क्रमेण –

प्रचण्डे सप्ताश्वे परिकलितनालीकविभवे
प्रवृत्ते निर्गन्तुं कृतविगमनक्षत्रनिवहः।
अतेजा राजाऽसावपसरति पश्चात्सरभसं
सदन्तर्मालिन्ये सति जगतिवृद्धिं व्रजति कः।। प्रद्यु. ५.२।।

चन्द्रास्तमय–सूर्योदययोः वर्णनम्–

यात्येकतोऽस्तशिखरं पतिरोषधीना–
माविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।
तेजो द्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।। ४.७९।।[1]

इति अभिज्ञानशाकुन्तलीयचतुर्थाङ्कगतवर्णनासाम्यं भजते।

५. एवं प्रकृतनाटके षष्ठाङ्के –

मन्दानप्याश्रितानुच्चैः महान्तो बहु मन्वते।
शृङ्गिणस्तृणगुल्मादीन् शिरसा न वहन्ति किम्।। प्रद्यु. ६.२।।

इति नारदस्य श्रीकृष्णौन्नत्यप्रकाशकवचनेषु, **महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि**[2] इत्यादिमाघकविवचनसाम्यं दृश्यते।

६. मायावत्याः मायया प्रद्युम्नस्य उद्बोधनसरः प्रापणवृत्तान्तः वर्ण्यमानः, नैषधे नलगुणप्रस्तावकर्त्रा हंसेन दमयन्त्याः सखीभ्यः तस्याः दूरतो नयनवृत्तान्तमनुकरोति।

एवमनेकेषु प्रकृतनाटककर्तरि पूर्वकवीनां प्रभावः अस्तीति सोदाहरणं निरूपितम्। अथ इदानीं नेतुः स्वरूपम् आलङ्कारिकरीत्या सोदाहरणमत्र प्रस्तूयते।

1. अभि. चतुर्थाङ्कः पृ. 140
2. शिशु. सर्ग.२

३. नेता (नायकः)

धनञ्जयप्रोक्तप्रकारेण नाटके नायकः धीरोदात्तः भवेत्। तद्यथा तृतीयप्रकाशे–

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।। ३.२२ ।। इति।

तस्य स्वरूपस्तु – **कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः।**
प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः ।। ३.२३।।[1]

इति नाटके प्रसिद्धवंशे उत्पन्नः राजर्षिः वा दिव्यः पुरुषः वा नायकः धीरोदात्तः भवेत्। तस्य धीरोदात्त–नायकस्य कीर्तिकामुकत्वं, महोत्साहत्वं, वेदसंरक्षणत्वम् इत्यादिगुणाः भवेयुः। एवं धनञ्जयेन दशरूपके द्वितीयप्रकाशेऽपि नायकसामान्यगुणाः उक्ताः[2]। विद्यानाथेन प्रतापरुद्रीये–

महासत्त्वोऽतिगम्भीरः कृपावानविकत्थनः ।। १.३२।।[3]

इति धीरोदात्तस्य लक्षणमुक्तम्। तत्र महासत्त्वं नाम क्रोधाद्यनभिभूतान्तःकरणत्वम्। स एव अचलति–तत्वलक्षणः शास्त्रचक्षुः धीरः इति व्यवह्रियते। विकारे सत्यपि सावहित्थगुणत्वम् गम्भीरत्वम्। परदुःखापहरणेच्छावान् च कृपावान् भवति। अविकत्थनं च आत्मनः स्तुतिविरहत्वम्। एवञ्च अतिगम्भीरत्व–कृपावत्त्व–अविकत्थनत्वादिगुणैर्युक्तः नेता भवति।

१. दिव्यनायकः प्रद्युम्नः :–

श्रीकृष्णस्य जगत्प्रभोस्तनुभवश्शृङ्गाररङ्गावनिः,
प्रख्यातः कृतिनायकस्तु भगवान् प्रद्युम्न एव स्वयम्।। १.१५।।

---

1. द.रू. तृतीयः प्रकाशः पृ. १६३
2. द.रू. द्वितीयः प्रकाशः पृ. ७५ **नेता विनीतो मधुरः त्यागी दक्षः प्रियंवदः।**
रक्तलोकः शुचिः वाग्मि रूढवंशः स्थिरो युवा।। २.१।।
बुद्ध्युत्साह–स्मृति–प्रज्ञा–कला–मानसमन्वितः।
शूरः धृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।। २.२।।
3. प्र.रु. नायकप्रकरणम् पृ. १४

इति प्रद्युम्नानन्दीयनाटके सूत्रधारवचनेन नायकः रुक्मिणी कृष्णयोः पुत्रः। अतः दिव्यपुरुषः, कुलीनः, धीरोदात्तनायकः इति ज्ञायते। अत्र नाटके मायावती नायिका। शम्बरः प्रतिनायकः, उद्धतः मायावी च।

२. उदात्तनायकः प्रद्युम्नः :–

सामान्यतः नायकगुणवर्णने पात्रचित्रणे रसपोषणे च नाटककर्ता सावधानः सुनिपुणश्च भवति। नायिकायाः मायावत्याः समवधाने नायकः कथं सहजतया प्रवर्तते इति, नायिकायां सत्यां सखीभिः तस्य नायकस्य भाषणं च कथं भवेत् इति उदात्तनायके प्रद्युम्ने प्रदर्शयति अयं वेङ्कटाध्वरिः। शृङ्गार–वीरयोः एकत्र वर्णनं तस्य प्रावीण्यं निरूपयति। अपि च अबलासु तासु स्त्रीषु स्थितभयापगमनाय अभयवचनानीव श्लेषयुक्तैः वचोभिः अनायासेन प्रद्युम्नेन वाचयति। तद्यथा तृतीयाङ्कस्यावसाने –

सख्यौ :- (सत्रासश्वासम्-) अपि शृणोषि राजपुत्र! एतान्यतिभयङ्कराणि जल्पितानि।

....

प्रद्युम्नः :- (साङ्गीकारम्) न तर्हि शम्बरवधादृते निरातङ्कं पङ्कजाक्षीसम्भोगसौख्यं सेत्स्यति।

अस्मिन् सन्दर्भे प्रद्युम्नः महासत्त्ववत्त्वेन उदात्तत्वेन च चित्रितः।

३. विनीतः प्रद्युम्नः :–

षष्ठाङ्के प्रद्युम्नः मायावत्या सह द्वारकामागत्य नारदादिमुनीनां समवधाने जननी-जनकौ मिलति। तत्र सः सहर्षत्वरम् उपसृत्य पितुश्चरणौ ग्रहीतुमिच्छति। तदा —

कृष्णः :- (प्रतिषिध्य) वत्स! वन्दस्व जगद्गुरुं नारदं भगवन्तमितरांश्च महानुभावान् मुनीन्द्रान्।

प्रद्युम्नः :- यदाज्ञापयति तत्र भवांस्तातचरण! (इति सप्रश्रयं परिक्रम्य)

पद्यम्- **भगवन्नारदमुने! प्राचार्यं पाद्मसम्भविम्।**
कार्ष्णिः प्रद्युम्नवर्माहं भवन्तमभिवादये।। ६.१२।।

(इति नारदस्य चरणावुपसंगृह्णाति।)

....

मुनयः :- नयनानन्द-नन्द-नन्दन! ...

कृष्णः :- वत्स! चिरविरहशोकपावकक्लान्तायाः प्रणिपत मातुश्चरणयोः।

प्रद्युम्नः :- यदाज्ञापयति तात! (इति सादरमुत्थाय तथा करोति।)

अनेन सम्भाषणेन प्रद्युम्नस्य वीनीतत्त्वं, वाग्मित्वं च द्योत्यते।।

एतावता नाटककथासमीक्षणम् इत्यस्मिन्नंशे नाटकस्य नामौचित्यम्, पञ्चसन्धीनां समन्वयः, नाटके काल्पनिकता, तदन्तर्गततया उद्बोधनसरोवृत्तान्तः, नान्दी-विष्कम्भ-प्रवेशक-आकाशभाषितानां निरूपणं विहितम्। ततश्च नाटककर्तरि पूर्वकविप्रभावः संसूचितः।

नेता (नायकः) इति चतुर्थांशे नायकस्य स्वरूप-स्वभावादिविमर्शनद्वारा प्रद्युम्नस्य दिव्यत्वम्, उदात्तत्वं, विनीतत्वञ्च स्फुटीकृतम्।

एवं नाटकेऽस्मिन् नायकस्वरूपे ज्ञाते अथ रसविचारः संक्षेपेण अग्रे निरूप्यते।

४. रसविचारः

काव्यं पठतः शृण्वतः अभिनेयार्थं च पश्यतः सहृदयस्य जायमानालौकिकस्थितेः किं कारणम् इत्युक्ते रसवद्भाव एवेति आलङ्कारिकाणामभिप्रायः।

१. भरतमुनेः रसस्वरूपम् :–

भरतमुनिः नाट्यशास्त्रे रसस्वरूपमित्थमभाणीत् – **विभावानुभावव्यभिचारि–संयोगात् रसनिष्पत्तिः**[1] इति। **अयं भावः।** अत्र विभावपदस्य विशेषेण भावयन्ति इति व्युत्पत्त्या ये रत्यादिस्थायिभावान् आस्वादयोग्यतां नयन्ति ते विभावाः। यथा शकुन्तला–दुष्यन्तादयः। अनुभावाः नाम अनुसृत्य भावयन्ति इति व्युत्पत्त्या रत्यादिचित्तवृत्ति–अनुभवेन जनिताः चेष्टाविशेषाः। यथा – कटाक्षभ्रूविक्षेपादयः। व्यभिचारिभावाः नाम विशेषेण अभितः स्थायिभावं सञ्चरन्ति इति, तटिल्लतावत् उद्यत्तिरोहिताः भावाः भवन्ति। यथा– हर्षादयः। एतेषां विभाव–अनुभाव–व्यभिचारिसंयोगात् रसनिष्पत्तिः इति अस्य भरतरससूत्रस्य सारः।

अभिनवगुप्तः **सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यः भाव एव रसः**[2] इति रससूत्रं व्याख्यातवान्। **अयं भावः।** वासनात्मा अलौकिकावस्थायां विद्यमानः रत्यादिभाव एव रसः। स भावः साधारण्येन प्रतीतैः विभावानुभावव्यभिचारिभिः मिलित्वा चर्वणायां व्यक्तीभवति। रसः च सहृदयनिष्ठः। अभिव्यक्तः रत्यादिभाव एव रसः इति सिद्धान्तः। अभिनवगुप्ताचार्यमते – संयोगपदस्य – व्यङ्ग्य–व्यञ्जकभावसम्बन्धः, निष्पत्तिपदस्य च अभिव्यक्तिः – इति अर्थः। तथा हि –

भावाभिनयसम्बन्धान् स्थायिभावांस्तथा बुधाः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः॥ ३३॥[3]

अत्र आस्वादः न रसनाव्यापारसाध्यः। अपि च निर्विघ्नेन्द्रियान्तरेण मानसव्यापरेण साध्यः। अत्र नाट्यरसाः इत्यनेन – **'नाट्यात् समुदायरूपात् रसाः। यदि वा नाट्यमेव**

1. नाट्य. षष्ठोऽध्यायः पृ. २७१ 2. नाट्य. षष्ठोऽध्यायः अभि. पृ. २७९
3. नाट्य. षष्ठोऽध्यायः पृ. २८८

रसाः। रससमुदायो हि नाट्यम्। न तु नाट्ये एव रसाः इति। काव्येऽपि रसः नाट्यायमान एव।'[1] इति जानीमः। विभावादिनाशेऽपि रसस्यावस्थानप्रसङ्गात् काव्यगतरसस्य अलौकिकत्वसिद्धिः इति अभिनवगुप्तपादाः।

अपि च स्थायिनां विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपसम्बन्धात्, विभावादीनां परस्परसंयोगात् रसस्य निष्पत्तिः अभिव्यक्तिः। तथाहि लोके कारणादिभिः स्थायिनः रत्यादेः यथा प्रवृत्तिः तथा सामाजिकानां सूक्ष्मतया अन्तःस्थितः रत्यादिः स्थायी काव्ये नाट्ये च गुणालङ्कारयोगात् चतुर्विधाभिनयेन च विभावादिव्यापारवत्त्वात् च अलौकिकविभावादिशब्द-व्यपदेशयोग्यदशाविशेषविशिष्टैः अभिव्यज्यते। यदि सहृदये रत्यादिः नाविष्कृतः तर्हि तद्वासनाभाव एव कारणम् भवति। तदा रसाभिव्यक्तिः तेषां न भवति। तत्र सन्देहावकाशो नास्ति। शृङ्गारिणां शृङ्गारस्य अभिव्यक्तिः। निर्विण्णस्वभावानां शान्तस्य अभिव्यक्तिः भवति।

एवं च काव्यानुसन्धानबलात् आलम्बनोद्दीपनव्यक्तौ तदनुगुणस्य रोमाञ्चादेः दर्शनीयस्य आविर्भावेन व्यञ्जनीयस्य उत्कण्ठादेः प्रधानस्थायिभावकार्यस्य प्रकटनात् कृत्रिमत्वेन अनभिमन्यमानैः तल्लिङ्गैः रत्यादिस्थायी अनुमीयते। सैव अनुमितिः सचमत्कार-प्रतीतिरूपा चर्वणा। चर्वणया विषयीक्रियमाणः स्थायी भावः रसः इत्युच्यते।

लोके पूर्वं स्थितः घटपटादिः प्रदीपेन ज्ञाप्यते। वासनारूपतया पूर्वं स्थितिसम्भवेऽपि रसत्वसम्पत्तिस्थायिभावस्य स्थितिः न भवति। विभावादिभिः चर्वणीयः व्यञ्जितः रसः निर्विकल्पकानन्दं न ददाति। नापि स्वभिन्नसविकल्पकानन्दम्। अपि तु चर्व्यमाणस्य अलौकिकानन्दमयस्य तस्य संवेदनासिद्धात्वात्। एवं हि उभयरूपत्वमापाद्यमानं स्वाभिन्न-सविकल्पकविषयतया लोकोत्तरचमत्कारमेव गमयति।

२. मम्मटस्य रसस्वरूपम् :-

कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।। ४.२७।।

विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः *स्थायी भावो रसः स्मृतः*।। ४.२७।।[2]

इति मम्मटः काव्यप्रकाशे कारिकाद्वयेन रसस्वरूपं स्पष्टीचकार।

1. नाट्य.अभि. षष्ठोऽध्यायः पृ. २८८ 2. का.प्र. चतुर्थोऽल्लासः पृ. ८९, ९०

उपायानां विभावादीनाम् उपस्थापकबलात् रसस्य अनुभवकाले वेद्यान्तरसम्पर्कशून्येन अपरिमितभावेन प्रमात्रा सकलसहृदयसंवादकारिणा स्थायी चर्व्यते। चर्वणया स्थायी एव विषयीक्रियते। एवं **चर्वणा विशिष्टः स्थायी भावः रस** इत्युच्यते। चर्व्यमाणः ब्रह्मानन्दा-स्वादमिव अनुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः। स च न कार्यः। विभावादि विनाशेऽपि तस्य सम्भवप्रसङ्गात् नापि ज्ञाप्यः। सिद्धस्य तस्यासम्भवात्। अपि तु विभावादिभिः व्यञ्जितः चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्। न क्वचित् दृष्टमिति अलौकिकसिद्धेः भूषणमेतत् न दूषणम् इति मम्मटः अभिप्रैति[1]।

३. धनञ्जयस्य रसस्वरूपम् :-

दशरूपककारः धनञ्जयः चतुर्थप्रकाशे रसस्वरूपम् इत्थं प्रदर्शयति –

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः।। ४.१ ।।[2] इति।

अत्रायं भावः। काव्ये नाटके वा नायकाभिनयादिमाध्यमेन प्रदर्शितैः विभाव-अनुभाव-व्यभिचारीभाव-सात्त्विकभावैः चर्व्यमाणः रत्यादिः स्थायिभाव एव रसः – इति। ये रसम् आस्वादयन्ति ते रसिकाः भवन्ति। इत्थम् अलौकिकानन्दचेतनाहेतुत्वात् काव्यस्य **रसवत्** इति व्यपदेशः। आयुर्वर्धने यथा घृतस्य **आयुर्घृतम्** इति व्यवहारः, तथा रसास्वादने **काव्यं रसवत्** इति। एवं च काव्यात् रसास्वादः – अलौकिकानुभूतिः, वेदान्तज्ञानात् ब्रह्मभावः।

इत्थं रसस्वरूपे ज्ञाते रससमाग्री विचार्यते।

४. रससामाग्री :-

रसोत्पत्तौ कारणीभूताः ये ते एव रससामाग्री इति कथ्यते। रूपके प्रधानतत्त्वत्रयेषु वस्तु-नेता-रसेषु अन्यतमः रसः। स च 'विभाव-अनुभाव-व्यभिचारिभावैः चर्व्यमाणः रत्यादिस्थायिभावः एव रसः इति व्यवह्रियते' – इत्युक्तम्। तत्र विभाव-अनुभाव-व्यभिचारिभावाः नाम के इति जिज्ञासायाम्-

1. का.प्र. चतुर्थोल्लासः पृ. १०१ 2. द.रू. चतुर्थप्रकाशः पृ. १८२

४.१. विभावाः :–

ज्ञायमानतया तत्र विभावो भावपोषकृत् ।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा ।।[1] इति दशरूपककारः धनञ्जयः ।

अयं भावः । सामाजिकं रसास्वादे विशेषेण भावयन्ति ये ते विभावाः इति व्यवहारः । विभावाः द्विधा –

१.१. आलम्बनविभावाः :– नायकादि । यथा – दुष्यन्तः, शकुन्तला, रामः सीता च ।
१.२. उद्दीपनविभावाः :– देशकालादिः । यथा – मालिनीतट–मलयानिल–वसन्तर्तु–पुष्पवाटिका इत्यादि ।

४.२. अनुभावाः :– अनुभावो विकारस्तु भावसंसूचनात्मकः ।[2]

स्थायिभावम् अनुभावयन्तः सहृदयं रसास्वादं प्रति नयन्ति ये ते अनुभावाः । यथा – भ्रूविक्षेपकटाक्षादयः रसपोषकारिणः । अनुभावाः अभिनये काव्ये च साक्षात् भावकानाम् अनुभूयन्ते इति । उत्पद्यमानस्थायिभावम् अनुसृत्य तिष्ठन्तीति अनुभावाः ।

४.२.१.सात्त्विकभावाः :–

पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः ।। ४ ।।
सत्त्वादेव समुत्पत्तेः तच्च तद्भावभावनम् ।[3]

यदि अन्येषु उत्पन्नदुःखहर्षादिभावानासु भावुकस्य सहृदयस्य अन्तःकरणं समाहित–मनस्त्वात् उत्पद्यते । नामपरः खिन्ने प्रहर्षिते च सत्त्वगुणोपेतस्य अपि अश्रुरोमाञ्चादयः निर्वर्त्यन्ते। अतः सत्त्वेन उत्पन्नः सात्त्विकाः भावाः अनुभूयमानत्वात् अनुभावाः इति । ते च–

स्तम्भ–प्रलय–रोमाञ्चः स्वेदो वैवर्ण्यवेपथुः ।। ५ ।।
अश्रुवैस्वर्यमित्यष्टौ, स्तम्भोऽस्मिन्निष्क्रियाङ्गता ।

प्रलयो नष्टसंज्ञत्वम्, शेषाः सुव्यक्तलक्षणाः ।। ६ ।।[4] इति ।

1. द.रू. चतुर्थः प्रकाशः पृ. १८३
2. द.रू. चतुर्थप्रकाशः पृ. १८५
3. द.रू. चतुर्थप्रकाशः पृ. १८८
4. द.रू. चतुर्थप्रकाशः पृ. १८८

४.३. व्यभिचारिभावाः :–

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ।। ३१ ।।

व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ।। ३२ ।।

सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।। ३३ ।।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ।। ३४ ।।[1]

एवं च **व्याघ्रादयः विभावाः** भयानकस्य इव वीर–रौद्राणाम् अपि विभावाः एव भवन्ति। तथैव **अश्रुपातादयः अनुभावाः** – शृङ्गाररसस्य इव करुण–भयानकयोः अपि अनुभावाः भवन्ति। एवमेव **चिन्तादयः व्यभिचारिभावाः** शृङ्गाररसस्य इव वीर–करुण–भयानकरसानाम् अपि व्यभिचारिभावाः भवन्ति। व्याघ्रात् हि भीरूणां भयम् अपूर्वदर्शिनां विस्मयो, वीराणाम् उत्साहः, व्यापादितबन्धूनां क्रोधः भवति।

एवं विभाव–अनुभाव–व्यभिचारिभावानां विषये ज्ञाते अथ स्थायिभावाः के इति विचार्यते।

४.४. स्थायिभावाः :–

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ।। ३० ।।[2]

विरुद्धा अविरुद्धा वा यं तिरोधातुक्षमाः।
आनन्दाङ्कुरकन्दोऽसौ भावः स्थायिपदास्पदम् ।।[3]

1. का.प्र. चतुर्थोल्लासः पृ. १२०–१२३ 2. का.प्र.चतुर्थोल्लासः पृ. ११९
3. का.प्र. चतुर्थोल्लासः उद्द्योतः पृ. ११९

१. रतिः :– मनोऽनुकुलेषु अर्थेषु सुखसंवेदनं रतिः। तत्प्रकृतिको रसः शृङ्गाररसः।
२. हासः :– व्यङ्ग्यव्रीडादिभिश्चेतो विकासो हास उच्यते। तत्प्रकृतिको रसः हास्यरसः।
३. शोकः :– इष्टनाशादिभिश्चेतो वैक्लब्यं शोक शब्दभाक्। तत्प्रकृतिको रसः करुणरसः।
४. रौद्रः :– प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते। तत्प्रकृतिकः रसः रौद्ररसः।

५. उत्साहः :– कार्यारम्भेषु संरम्भः स्थेयान् उत्साह उच्यते। तत्प्रकृतिको रसः वीररसः। स च त्रिधा – युद्धवीरो दानवीरो दयावीरश्च। तत्र युद्धवीरे – नायकः (रामादि) आलम्बनम्। कार्यं समुद्रबन्धनम् उद्दीपनम् नीचेषु उपेक्षा रामे प्रतिस्पर्धा चानुभावौ। स्मृतिः, लज्जा, गर्वः सञ्चारीभावाः।

६. भयम् :– रौद्रशक्त्या तु जनितं चित्तवैक्लब्धं भयम्। तत्प्रकृतिकः रसः भयानकरसः। भयं स्थायीभावः, राजा आलम्बनम्। शरपतनभयमनुसरणं चोद्दीपनम्, ग्रीवाभङ्गपलायनादयः अनुभावाः। शङ्का–त्रास–श्रमादयः व्यभिचारिणः।

७. जुगुप्सा :– जुगुप्सा गर्हणार्थानां दोषमाहात्म्यदर्शनात्। तत्प्रकृतिको रसः बीभत्सरसः। गर्हणा नाम न असौ अदनसंकोचादिजनकः चित्तवृत्तिविशेषः।

८. विस्मयः :– विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात्[1]। तत्प्रकृतिको रसः अद्भुतरसः।

स्थायिभावाः अपि क्वचन सञ्चारीभावाः भवन्ति :–

शृङ्गार–वीरयोः हासः, वीरे क्रोधस्तथा मतः।
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः।।[2]

हासस्थायिभावः – शृङ्गारे वीरे च व्यभिचरति। **रति**स्थायिभावः हास्य–करुण–शान्तेषु सञ्चारीभावो भवति। **क्रोध**स्थायिभावः – वीररसे सञ्चरति। **जुगुप्सा**स्थायिभावः भयानक–शान्तरसयोः व्यभिचारं प्राप्नोति। **विस्मयः** सर्वरसेषु व्यभिचारिभावो भवति। **उत्साहः** रौद्र–हासरसयोः सञ्चारिभावो भवति। एते च व्यभिचारिभावाः कदाचित् प्रधानरसस्य पोषकाः भवन्ति। कदाचित् रसभङ्गस्य हेतवः भवन्ति।

1. द.रू. चतुर्थप्रकाशः उद्द्योतः पृ. ११३–११८ 2. का.प्र. चतुर्थोल्लासः प्रदीपः पृ. १२३

रसेषु प्रधानतया सञ्चारीभावाः :–

तत्र १. **सम्भोगशृङ्गारे–** आलस्य–उग्रता–जुगुप्सौ अवर्ज्याः सर्वे व्यभिचारिणः बोध्याः। **विप्रलम्भशृङ्गारे** तु – आलस्य–ग्लानि–निर्वेद–श्रम–शङ्का–निद्रौत्सुक्य–अपस्मार–सुप्त–विबोध–उन्माद–जाड्य–असूयाः।

२. **हास्ये –** अवहित्थ–आलस्य–निद्रा–प्रबोध–असूयाः।

३. **करुणे –** मोह–निर्वेद–दैन्य–जाड्य–विषाद–भ्रम–अपस्मार–उन्माद–व्याधि–आलस्य–स्मृति–वेपथु–स्तम्भ–स्वरभेद–अश्रूणि।

४. **रौद्रे–** स्मृति–स्वेद–आवेग–अमर्ष–रोमाञ्च–चञ्चलता–उग्रत्व–स्वरभेद–कम्पाः।

५. **भये –** स्तम्भ–स्वेद–गद्गदता–रोमाञ्च–वैवर्ण्य–शङ्का–मोह–वेग–दैन्य–चापल–त्रास–अपस्मार–प्रलाप–मूर्छाः।

७. **बीभत्से** – अपस्मार–मति–व्याधि–मोह–आवेग–गर्व–वैवर्ण्यानि।

८. **अद्भुते** – सम्भ–रोमाञ्च–स्वेद–गद्गदन–अश्रु–विभ्रमाः।

एवं रसस्वरूपे ज्ञाते रसभेदाः विचारयामि।

५. रसभेदाः :–

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः इति सूत्रेण रसस्वरूपे ज्ञाते रसाः के इति जिज्ञासायाम् –

रसाश्च– **शृङ्गार–हास्य–करुणा रौद्र–वीर–भयानकाः।**
बीभत्साद्भुतसंज्ञाश्चेत्यष्टौ नाट्ये रसाः स्मृताः ।। २९ ।।[1]

इति भरतस्य नाट्यशास्त्रोक्तिः। काव्यप्रकाशकारेण यद्यपि अष्टौ रसाः[2] तथापि अमङ्गलप्रायस्य व्यभिचारिषु आदावनुल्लेखनीयस्य निर्वेदस्य प्रथमोल्लेखात् व्यभिचारित्वेऽपि तस्य स्थायित्वसूचनेन निर्वेदस्थायिकतया शान्तरसत्वसिद्धिः – इति गदितम्। अत एव तेन **निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः**[3] इत्युक्तम्। एवं नवरसेषु प्रायशः अधिकप्राधान्येन नाटके निर्दिष्टयोः शृङ्गार–वीरयोः लक्षणमालङ्कारिकदृष्ट्या परिशील्यते।

1. नाट्य. षष्ठोऽध्यायः पृ. २६६.
2. का.प्र.चतुर्थोल्लासः का. २९ पृ. १०६
3. का.प्र.चतुर्थोल्लासः पृ. १२४ **निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।। ४.३५।।**

५.१. शृङ्गाररसस्य लक्षणम् :–

भरतः नाट्यशास्त्रे – **तत्र शृङ्गारो नाम रतिस्थायिभावप्रभवः**[1] इति लक्षयति। तत्र शृङ्गारस्य द्वौ भेदौ। संयोगो विप्रलम्भश्च। रसः सुखात्मकः आनन्दात्मकः तर्हि दुःखमयः करुणः रस इति कथं व्यवहार इति चेत् लोके दुःखात्मकोऽपि करुणः काव्यादौ तु अलौकिकसुखोदयः। नो चेत् प्रेक्षावतां सहृदयानां तत्र अप्रवृत्तिरेव भवति। मनोऽनुकूलेषु अर्थेषु सुखसंवेदनं रतिः। तत्प्रकृतिकः रसः शृङ्गाररसः। स च द्विविधा। तत्र–

५.१.१. सम्भोगशृङ्गारलक्षणम् :–

अनुकूलौ निषेवेते यत्रान्योऽयं विलासिनौ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः।।[2]

तत्र सम्भोगो नायिकारब्धः नायकारब्धः चेति द्विधा। स च परस्परावलोकन–आलिङ्गन–अधरपान–परिचुम्बनादि–कुसुमोच्चय–जलकेलि–सूर्यास्तमय–चन्द्रोदय–षड्ऋतुवर्णनादिभेदेन अनन्तभेदात् **रसादीनामनन्तत्वात् भेद एको हि गण्यते** इति न्यायेन अपरिच्छेद्यः अगण्यः भवति।

५.१.२. विप्रलम्भशृङ्गारलक्षणम् :–

भावोपदा रतिर्नाम प्रकर्षमधिगच्छति।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते।।[3]

सङ्गमपूर्वः। अन्त्यः अभिलाषहेतुकः। आद्यस्तु क्वचित् ईर्ष्यया प्रणयेन वा मानरूपः। स च ईर्ष्या हेतुकः। क्वचित् विप्रलम्भशृङ्गारः ईर्ष्या–प्रवास–शापवशात्, गुरुलज्जादिहेतुकः। विरहः नाम गुरुलज्जादितः सङ्गमप्रतिबन्धः भवति इति एके। रहः नाम एकान्तः तस्य अभावः विरहः इति। नायिका–नायकयोः सङ्गमयोग्यस्य एकान्तदेशस्य अभावः विरहः इति।

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भः।।[4]

1. नाट्य. षष्ठोऽध्यायः पृ. २९८
2. का.प्र. चतुर्थोल्लासः उद्द्योतः पृ. १०७
3. का.प्र. चतुर्थोल्लासः उद्द्योतः पृ. १०७
4. का.प्र. चतुर्थोल्लासः प्रदीपः पृ. १०८

अत्र करुणविप्रलम्भे शोकः व्यभिचारी भावः। अत एव सङ्गमप्रत्याशाकालिकः तदनुत्पादः विप्रलम्भः इत्याहुः। विप्रलम्भशृङ्गारः अभिलाष–विरह–ईर्ष्या–प्रवास–शापहेतुकः इति पञ्चविधः। तत्र प्रवासः–भूत–भविष्यत्–वर्तमान इति त्रिविधः। इत्येवम् एकस्य शृङ्गारस्यानन्त्यात् रसस्यानन्त्यम्।

एतावत्पर्यन्तं नाटकातत्त्वत्रये अन्यतमस्य रसस्य सामान्यतः स्वरूपविमर्शनं कृतम्। तत्र नाटकेऽस्मिन् प्रद्युम्नानन्दीये रसविचारः प्रस्तूयते –

६. नाटके रसपोषणम् :–

समान्यतः **एको रसोऽङ्गी कर्तव्यः वीरश्शृङ्गार एव वा।। ३.३३।।**[1] इति वचनानुसारेण नाटके वीर–शृङ्गारयोः एकः एव रसः अङ्गी (प्रधानरसतया) कर्तव्योऽस्ति। परम् अस्मिन्नाटके –

सूत्रधारः :- ***उदारवीरशृङ्गारोद्दीपकं*** **रूपकं त्वया।**
नव्यमत्र प्रयोक्तव्यमुत्तमश्लोकनायकम्।। प्रद्यु. १.३।।

इति सूत्रधारमुखेन कविना उक्तत्वात् निरूपितनाटकलक्षणविलक्षणतया उदारवीरशृङ्गारौ अत्र अङ्गीरसौ इति, तेन च द्वयोः समप्राधान्यम् इति च यद्यपि ज्ञायते, तथापि उदार–वीरशृङ्गारयोः द्वयोः एकत्र नाटके अङ्गित्वलक्षणप्राधान्यस्य अयोगः। तत्र च कारणं शृङ्गारस्य कामपुरुषार्थानुबन्धित्वम्, स्वतन्त्रस्य वीरस्य च अर्थपुरुषार्थानुबन्धित्वम्।

एवञ्च तद्रससाध्यपुरुषार्थभेदेन रसयोरपि अत्यन्तभिन्नत्वात् तयोः एकत्र प्राधान्यं न युज्यते। यद्यपि वीर–शृङ्गारयोः स्वाभाविकः विरोधः, शान्तरौद्रयोरिव नास्ति, तथापि तयोः समप्राधान्यताप्रयुक्तः विरोधस्तु अत्र अस्त्येव। अतः उदारवीर–शृङ्गारयोः समप्राधान्येन उद्दीपकमिदं रूपकमिति वक्तुं न शक्यते। किन्तु शम्बरवधद्वारा निष्प्रत्यूहप्रद्युम्न–मायावतीसमागमः सुसाध इति कृत्वा वीरस्य शृङ्गाराङ्गत्वं सुसम्पादम्। एतच्च मायावती–सखीभयख्यापकविचक्षणावचनेन, **ततो मामेव स मायामात्म्येन हत्वा किं किं करिष्यतीति न ज्ञायते** इति स्वयं मायावतीवचनेन, **न हि शम्बरवधादृते निरातङ्कं पङ्कजाक्षी–**

1. द.रू.तृतीयप्रकाशः पृ. १६७

सम्भोगसौख्यं सेत्स्यति इति प्रद्युम्नवचनेन च; मायावतीसमागमे शम्बरवधस्य उपायतया प्रतिपादनात्, वीरस्य शृङ्गाराङ्गत्वं स्पष्टं ज्ञायते। सन्दर्भास्यास्य स्पष्टीकरणाय तृतीयाङ्कावसानगतः सम्भाषणक्रमः अधस्तात् दीयते –

सख्यौ :- (सत्रासश्वासम्-) अपि शृणोषि राजपुत्र! एतान्यतिभयङ्कराणि जल्पितानि।

प्रद्युम्नः :- अयि विचक्षणे! केषाममूनि भीषणानि भाषणानि येभ्यो बिभ्यति भवत्यः।।

....

प्रद्युम्नः :- (साङ्गीकारम्) न तर्हि शम्बरवधादृते निरातङ्कं पङ्कजाक्षीसम्भोगसौख्यं सेत्स्यति।

किञ्चात्र वीरस्य उदारत्वं कथमिति चेत् नाटकेऽस्मिन् कथानायकः प्रद्युम्नः नैव अन्यतुच्छजनवत् सगर्वः। शम्बर–प्रद्युम्नयोर्मध्ये महति संग्रामे प्रचलति सति, प्रायशः शम्बरस्य समस्ते सैन्ये नष्टेऽपि प्रद्युम्नः क्षीणशक्तिं शम्बरं वीक्ष्य युद्धाय नोदसहत। किन्तु स्वाश्वानां स्नान–पानादिव्यवस्था भवतु इति धिया तेषां विश्रान्तिदानार्थमेव प्रायतत। न प्रक्षीणबलस्य शम्बरस्य सद्यः व्यापादने उत्साहं प्रादर्शयत। एतदेव उदारवीरपुरुषाणां लक्षणम्। स्पष्टीकृतञ्चैतत् युद्धे प्रचलति चतुर्थाङ्के –

शम्बरः :– सबाष्पं निर्वर्ण्य) मुहूर्तमिव ध्यायन् मोहमुपगच्छति।

प्रद्युम्नः :– (सूतमुद्दिश्य) यावदयं पापः पुनरपि संज्ञामासादयिष्यति तावद्वयमपि समरश्रमापनयनं करवामः।। – इति।

एवं शृङ्गारस्य उदारताविषयेऽपि किञ्चिरदत्र प्रस्तोतव्यम्। पुराणकथायाम् –

भवान्नारायणसुतश्शम्बरेणाहृतो गृहात्।
अहं ते दयिता पत्नी रतिः, कामो भवान् प्रभो।। १२।।[1]

इत्यादिरत्युपदेशमात्रेण नायकः प्रद्युम्नः आत्मानं मन्मथं मायावतीञ्च मातरमपि दयितां रतिं मेने। किन्तु नाटकेऽस्मिन् मायावती प्रथमतः सामान्यकान्तात्वेन ज्ञाता, अनुरागविषया अपि पश्चात् मन्मथप्रेयसीत्वेन ज्ञाता सती प्रद्युम्नेन परदारात्वेन निराकृता। अतर्कित–प्रत्यासन्नसुन्दर्याः निराकरणं न युक्तमिति विदूषकेण उद्बोधितोऽपि प्रद्युम्नः स्वगृहदीपज्वालायाः

1. भाग.१० स्क. ५५ अध्यायः १२ श्लोकः

स्पर्शोऽपि प्रमादहेतुः इत्याशयं प्रकटीकुर्वाणः परकान्ताम् अग्निसदृशीमेव मेने। यावता उद्बोधनसरोऽमृतं न पीतं तावता मायावतीं स्वप्रियात्वेन न गृहीतवान्। अत एवायं शृङ्गारः भारतीयानाम् आदर्शप्रायः शृङ्गारः इति उदारशृङ्गारत्वम् अस्य सुव्यवस्थापितं नाटकम्। एवञ्चात्र नाटकस्य उदारशृङ्गारोद्दीपकत्वम्।

तथा च उदारवीरशृङ्गारो नाम विरुद्धभावनाम् अजनयित्वा, उदात्तशृङ्गारस्य उदात्तवीरस्य च पोषणाय एव उदार–वीरशृङ्गार इति नामकरणं कृतम्। स चात्र नाटककर्ता स्वाभीष्टानुगुणं निबध्नन् नव्यमार्गे कृतकृत्यो जातः।

अत्र सम्भोगशृङ्गारस्य विप्रलम्भशृङ्गारस्य वीररसस्य रौद्ररसस्य बीभत्सरसस्य च उदाहरणानि समन्वयपूर्वकं प्रदर्श्यन्ते। तत्र–

६.१. शृङ्गाररसस्य उदाहरणानि :–

६.१.१. सम्भोगशृङ्गारस्य उदाहरणम् –

प्रथमाङ्के सविदूषकः प्रद्युम्नः मज्जदुज्जीवनसरःप्रान्ते इष्टदेवचरणार्चनाय आगतां मायावतीं दृष्ट्वा प्रथमसन्दर्शने एव तस्याः लोकोत्तरसौन्दर्यस्य आकृष्टो भूत्वा मनसि सोत्कण्ठम् इत्थं भवयति -

पद्यम् - **कनकमयलता वा? कान्तिकल्लोलिनी वा?**
रजनिकरकला वा रत्नदीपप्रभा वा।
किमचिररुचिवल्ली केयमीदृग्विधश्रीः
मदयति हृदयं मे मन्मथस्येव माया।। प्रद्यु. १.६७।।

अस्या नेत्ररुचिर्निरस्यतितरामैन्दीवरीं वैखरीं
सौन्दर्यं वदनस्य निन्दति परं सन्दोहमिन्दो रुचाम्।
कान्तिः कुन्तलसंहतेर्न सहते कादम्बिनीडम्बरं
छाया हन्त! तनोर्धुनोति सुतनोश्शम्पा महस्सम्पदम्।। प्रद्यु. १.७०।।

अस्यायं भावः। इयं स्वर्णलता वा कान्तिसमुदायः वा चन्द्रकला वा रत्नप्रभा वा, मनोहारिणी नवलता वा एवं शुभगुणयुक्ता इयं का वा न जाने ? माया मन्मथमिव इयं मम

हृदयं मदयति। किञ्च अस्याः नेत्रकान्तिः पद्मकान्तिम् अधिक्षिपति, अस्याः मुखसौन्दर्यं चन्द्रस्य कान्तिसन्दोहं तिरस्करोति। कुन्तलसंहतेः कान्तिः मेघमालायाः सादृश्यम् अतिशेते। एवं सुतनोः अस्याः तनोः छाया मनोज्ञशोभां तनोति - इति।

अत्र पद्ये मायावत्यालम्बनकः एकान्तादिना उद्दीपितः रोमाञ्चाद्यनुभावितः सम्भ्रमाश्चर्यादिभिः व्यभिचारिभावैः परिपुष्टः नायकारब्धः प्रद्युम्ननिष्ठः रत्याख्यः स्थायी अवलोकनरूपं सम्भोगशृङ्गारं व्यञ्जयति।

६.१.२. विप्रलम्भशृङ्गारस्य उदाहरणानि :-

मायावत्याः विरहसन्दर्भे ——

द्वितीयाङ्के मायावती प्रद्युम्नस्य निराकरणेन खिन्नमनस्का सञ्जाता। एवं सन्तप्तहृदया मायावती बाष्पाविलोचनाभ्यां मुहुर्मुहुः प्रियतममवलोकयन्ती सव्याजं विलम्ब्य, सह सखीभ्याम् ततः अपसरति। ततः विरहातुरा मायावती दैवमेवं निन्दति —

"हन्त! मयि दैवस्यान्यादृशी प्रतिकूलता। तथा हि—

अहो आवयोः खलु परस्परयोगकाले
विघ्नो हळा विरचितो विधिना हतेन।
हा! मे मनस्तपति सम्प्रति रज्जुभङ्गो
हैयङ्गवीनजननावसर इव जातः।। प्रद्यु. २.४।।

अस्यायं भावः। आवयोः मायावतीप्रद्युम्नयोः परस्परसमागमकाले हतकेन विधिना अन्तरायः आचरितः हन्त सम्प्रति मम मनः दहति। दध्नः मन्थनसमये हैयङ्गवीनस्य - नवनीतस्य उत्पत्तिकाले मन्थनरज्जोः भङ्गः जात इव मम मनः वियोगदुःखमनुभवति – इति।

अत्र प्रद्युम्नालम्बनकः वियोगाद्युद्दीपितः स्मरणाद्यनुभावितः निर्वेद-ग्लान्यादिव्यभिचारिभिः परिपुष्टः मायावतीनिष्ठः रत्याख्यः स्थायी विप्रलम्भं व्यञ्जयति।

उद्बोधनसरःपरिसरे प्रद्युम्नविरहः :-

उद्बोधनसरसि कान्तरभ्रमणतापापनोदनाय तदीयं विमलकमलपरिमळसुरभिळमुदकमास्वाद्य मुहूर्तमिव ध्यायन्नुत्थाय, सानुस्मरणरोमाञ्चम् — "हन्त ! रतेरधरसुधारसास्वादमहोत्सवमनुस्मारयत्येतदीयं पयः। ततश्च नूनं भवान्तरीयवृत्तान्तानुस्मरणमहौषधं तदिदमुदकमिति तर्कयामि। यदिदानीम्—

रोमाञ्चकर्कशरतिस्तनशातकुम्भ-कुम्भोपमर्दिपरिरम्भणसम्भ्रमाणि।
तानि प्रसूनधनुषो मम ताण्डवानि चेतस्स्वयं स्मरति हन्त! चिराय भूयः।।३.१२।।

इत्यत्र श्लोके नायकः प्रद्युम्नः नायिका च मायावती (रतिस्वरूपा) आलम्बनविभावौ। प्रद्युम्नेन अनुभूतैः परिरम्भणसम्भ्रमैः अनुभावैः स्मृत्यादिभिः सञ्चारीभावैः प्रद्युम्ननिष्ठः रत्याख्यः स्थायी विप्रलम्भम् अभिव्यजयति। एवम् -

अयत्नलब्धामणुमध्यमां तां, त्यजन् भ्रमाद्दैवहतोऽस्मि मूर्खः।
अनर्घमप्यन्तिकवर्तिरत्न-मङ्गारमोहादिव मन्दभाग्यः।। ३.१३।।

इत्यत्र दैवहतः मूर्खः अयं प्रद्युम्नः अयत्नलब्धाम् अणुमध्यमां भ्रमात् परदारा इति त्यक्तवान्। लोकोक्त्या कविः समर्थयति यथा - मन्दभाग्यः अमूल्यं समीपवर्ति रत्नम् अज्ञानात् अङ्गारपिण्डमिव मत्वा परित्यजति। तद्वद् प्रद्युम्नः स्वाज्ञानवशात् तां मायावतीं परित्यज्य, पुनःपुनर्मधुरस्मृतिभिः चिन्तयति। एवं प्रद्युम्ननिष्ठः मायावत्यालम्बनकः रत्याख्यः स्थायी स्मृत्यादिभिः परिपुष्टः विप्रलम्भशृङ्गारं व्यञ्जयति।

अनुचितमसौ स्वीया नो वेत्यहो! मयि संशयं
कृतवति तदा रोषादापाटलत्वमुपेयुषीम्।
प्रसभमुदयद्बाष्पां शोकाद्भयादतिविह्वलां
दृशमकृतयत्तन्वी तन्मे धुनोति मनोऽधुना।। ३.१७।।

अत्र च मायावत्यां स्वीया वा परकीया वा इति संशयं कृतवान् प्रद्युम्नः। तदा रोषात् तस्याः वदनं पाटलत्वं प्राप्तम्। शोकात् बाष्पनेत्रा सञ्जाता। भयात् अतिविह्वलतां प्राप्ता। रत्याः तत्रस्थदृशः अधुना मम मनः धुनोति। अत्र रोष(क्रोध)स्थायिकः रौद्रः, शोकस्थायिकः

करुणः, भयस्थायिकः भयानकः इत्येते रसाः प्रस्तुतवृत्तान्तम् प्रद्युम्नगतम् अङ्गिनं विप्रलम्भशृङ्गारं पोषयन्ति। प्रद्युम्ननिष्ठः मायावत्यालम्बनकः रत्याख्यः स्थायी रोष-शोक-विह्वलतादिभिः अनुभावैः पुष्टः विप्रलम्भशृङ्गारः व्यज्यते।

अपि च- **दृष्ट्वा मुक्तदयं मदीयहृदयं दीर्घं श्वसत्युच्चकै-**
रुत्तिष्ठेति सखीजनेन रभसादुक्ताऽपि कृच्छ्रेण सा।
उत्थायाथ पुनर्विलम्ब्य शनकैरुर्वीं लिखन्ती पदा
दीनां दृष्टिमधत्त यन्मयि खले तन्मे मनः कृन्तति।। ३.१८।।

पद्यम्- **चेतः कष्टं चिन्तया दह्यते मे, वक्त्रं घर्मश्वासवातोद्गमेन।**
कामेनाङ्गं कामवस्थां न कुर्यात्, प्राचीनानां पाप्मनां दुर्विपाकः।। ३.२०।।

अत्र परदारात्वेन निराकरणसमये रत्या चेष्टितानि अनुस्मरन् प्रद्युम्नः "पदा उर्वीं लिखन्त्या मायावत्या मयि दृष्टिः दत्ता। रतेः तदानीन्तनदीनादृष्टिः मम मनः कृन्तति" इति कथयति। एवमत्र प्रद्युम्नेन अनुभूयमाना विरहवेदना वर्ण्यते।

उद्बोधनसरसि जलपानेन प्राप्तजन्मान्तरसंस्कारः प्रद्युम्नः द्रुततरमस्यैव माधवी-मण्टपस्योपकण्ठ-मासाद्य तदन्तस्थितरम्भास्तम्भान्तरितः सन् विस्रम्भं मायावत्याः सल्लापादिकम् आचरन् दीर्घमुष्णञ्च निश्वस्य, पुनः सबाष्पदृष्टिः सन् एवं चिन्तयति —

मधुरमधुरसार्द्रे माधवीमण्डपेऽस्मिन्
वसति सह सखीभ्यां वल्लभा सैव नूनम्।
विरहदहनतापाद्व्यक्तमालिङ्गिताना-
मिह किल कदळीनामीक्ष्यते म्लानिरेवम्।। ३. ४६।।

अस्यायं भावः — मधुरसान्द्रे अस्मिन् माधवीमण्डपे सा मम प्रेयसी मायावती एव सखीभ्यां सह वसति, नात्र संशयः। यतः विरहदहनतापात् व्यक्तमालिङ्गितानां कदलीनां म्लानिः एवं विद्यते खलु — इति।

अत्र मायावत्यालम्बनकः पञ्चमुख(पिक)-पवनाद्युद्दीपितः स्मरणाद्यनुभावितः शङ्का (सम्भावनादि) व्यभिचारिभिः परिपुष्टः प्रद्युम्ननिष्ठः रत्याख्यः स्थायी विप्रलम्भाख्यं शृङ्गारं व्यञ्जयति।

तृतीयाङ्के प्रद्युम्नः उद्बोधनसरसि जलपानेन प्राप्तजन्मान्तरसंस्कारः माधवीमण्डपं प्रविश्य रतिं संस्मरन् रम्भास्तम्भावरणादुत्थाय मायावत्याः समवधाने आश्लेषसुखमभिनीय एवं चिन्तयति —

पद्यम्- **क्षणमनुपमानन्दोत्सिक्तलक्षणं कुतुकोल्बणं**
क्षणमथ घनव्यामोहान्धं क्षणं मुकुळेक्षणम्।
इदमिति परिच्छेदायोग्यं कमप्यसितेक्षणे!
वितरति परं संश्लेषस्ते विकारमिवान्तरम्।। प्रद्यु. ३.६५।।

अस्यायं भावः। असितेक्षणे! मायावति! अनुपमानन्दस्य अतिशयः अस्मिन् क्षणे मम कुतूहलाधिक्यं जनयति। चेतः गाढं व्यामोहयति। ईक्षणं मुकुलयति। तवायं संश्लेषः इदमिति वक्तुमशक्यं कमपि आन्तरं निर्वृतिं वितरति - इति।

अत्र मायावत्यालम्बनकः माधवीमण्डपाद्युद्दीपितः कुतूहलमुकुलसोत्कर्षाद्यनुभावितः प्रमोद-मोहादिव्यभिचारिभिः परिपुष्टः प्रद्युम्ननिष्ठः रत्याख्यः स्थायी शृङ्गारम् अभिव्यञ्जयति।

६.१.३. अतिवेलशृङ्गारः :-

प्रथमाङ्के प्रद्युम्नः भृगुमद् गिरितटे वनसौभाग्यविलोकनाय विदूषकेण सह गच्छति। तत्र विद्याधरदम्पत्योः शृङ्गारचेष्टाः पश्यति —

निश्शङ्कमङ्कमधिरोप्य नितम्बगुर्वी
नीवीविकर्षभयसम्भ्रमचञ्चलाक्षीम्।
सीत्कृत्य दीर्घमिह शीधुमयं सुखेन
बिम्बाधरं चिरमसौ पिबति प्रियायाः।। प्रद्यु. १.५६।।

तत्र कामुकः विद्याधरः नितम्बगुर्वी, नीवीविकर्षणेन सञ्जतसम्भ्रमां चञ्चलाक्षीं प्रियां स्वाङ्के संस्थाप्य सीत्कारेण दीर्घम् अधरामृतमास्वादयति ससुखम् — इति अतिवेलशृङ्गारः।

तथा हि — **दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्।। ३४।।**
संरोधं भोजनं स्नानं सुरतं चानुलेपनम्।
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्।। ३५।।[1]

1. द.रू. तृतीयप्रकाशः पृ. १६८

इति नाटकलक्षणानुसारेण **वेदिकायां सुरतक्रीडा प्रत्यक्षतया न प्रदर्शनीया।** नाटकलक्षणमर्यादां (वेलाम्) अतिक्रम्य प्रदर्शितः शृङ्गारः इति इदं पद्यम् अतिवेलशृङ्गारस्य उदाहरणं भवति इति यद्यपि सम्भावनीयम्, तथापि यौवनभावोद्दीपकतया कविना तात्कालिकतया आस्थितः प्रयत्नविशेष अयम् अतिवेलशृङ्गारः इति मन्तव्यम्।

६.२. हास्यरसः :–

नाटकेऽस्मिन् सत्यपि शृङ्गररसस्य प्राधान्ये रसान्तराणां सुश्लिष्टः अङ्गभावः दृश्यते। तत्र हास्यरसस्य स्थितिः इदानीं निरूप्यते –

प्रथमाङ्के **मज्जदुज्जीवन** नाम सरः दृष्ट्वा, तत्रत्यं सरः सौन्दर्यं वर्णयन् विदूषकः –

चारुगुणकलितैः विविधैरलङ्कृतं प्रसूनैः।
एतत्सरो विजयति मनोहरं सौरभानुसारेण ।। प्रद्यु. १.२० ।।

इति प्रशंसति। क्रमसन्निविष्टानां सान्द्रतया गुणबद्धानामिव सूत्रबद्धानामिव) अवस्थितानां कमलानां सौरभसौन्दर्यादिगुणैः विराजमानानां कमलानाम् अवस्थित्या एतत् सरः सर्वोत्कर्षेण वर्तते इति विदूषके गुणपदश्लेषं कृत्वा भाषमाणे सति प्रद्युम्नः **सखे! सद्यस्तनश्लेष–निपुणोऽसि** इति तस्य तत्क्षणस्फूर्त्या श्लेषप्रयोगचातुर्यं प्रशशंस। विदूषकस्तु प्रद्युम्नादपि एकतालपत्रमधिकतया पठितवानिव **त्वं तु सद्यस्स्तनाश्लेषनिपुणोऽसि** इति किञ्चित् दीर्घीकृत्य सचमत्कारं राजानं परिजहास। येन शृङ्गाररसस्य प्रधानतया परिपोषणम् अत्र सुकरं भवति।

हास्यरसाय सन्दर्भान्तरेऽपि उदाहरणं प्रस्तूयते –

उद्बोधनसरः तावत् जन्मजन्मान्तरीयसंस्काराणाम् उद्बोधकमिति लोकप्रसिद्धम्। भगवतः सृष्टौ इदं वैचित्र्यं यत् जन्मान्तरीयसंस्काराणां विषयाणाञ्च सदा इदन्तया स्मृत्यभावः। यदि कस्यचित् इदन्तया तादृशी भवान्तरीया स्मृतिः जायेत तर्हि सृष्टौ महान् उपद्रवः एव जायेत। यदि पार्श्वस्थे भवान्तरीयघातुकत्वज्ञानोद्बोधः तर्हि तं वयं ताडयितुं हन्तुं वा उद्यता

भवेम। नायकस्य मन्मथत्वस्मृतिर्वा नायिकायां रतित्वस्मृतिर्वा अत्यन्तं मोदाय भवति। वधबन्धादीनाम् उद्बोधने तु अत्यन्तं खेद एव। अत एव विदूषकः प्रद्युम्नादिभिः पञ्चमाङ्के पुष्पकविमानेन गच्छन् उद्बोधनतीर्थस्य वाचामगोचरं माहात्म्यम् एवं वर्णयति –

जन्मनि पूर्वस्मिन् जनैर्बद्धः चोरत्वं दृष्ट्वा ताड्यमानः।
यद्यत् खलु तत्कालभवं च तत्तत्सोत्साहं चिरात् स्मरामीदानीम्।। प्रद्यु.५.२१।।

इति अनावश्यकविषयस्मारकत्वम् उद्बोधनसरसः महत्त्वेन वर्णयन् उदरभेदं हास्यं जनयति।

६.३. करुणरसः :–

चतुर्थाङ्के शम्बरः युद्धे मृतान् चित्रसेनादीन् शतपुत्रान् स्मारं स्मारम् अतिकरुणं विलपति। तदीयदुर्वार्तां राक्षसमुखात् श्रुत्वा मूर्च्छित्वा पुनः संज्ञां लब्ध्वा –

पुत्रान् शतमपि प्राप्य पुत्रीणां सदृशं हि यत्।
नैवापं वारि नैवापं तदन्तर्दन्दहीति माम्।। प्रद्यु. ४.२६।।

इति कथयन् बाष्पं मुञ्चति। मृतशतपुत्रालम्बनः, मूर्च्छा–पुनःसंज्ञालाभ–बाष्पमोचनादिना अनुभावितः, कर्तव्याकरणप्रयुक्तलज्जादिना सञ्चरितः चित्तवैक्लब्यलक्षणः प्रस्तुतकथानायक–गतवीररसस्य परिपोषकः अङ्गभूतः **शम्बरनिष्ठः करुणः** अत्र विराजते।

६.४. रौद्ररसः :–

चतुर्थाङ्के – शम्बर–प्रद्युम्नयोः युद्धः वर्णितः। शम्बरः प्रतिनायकः। अयमुद्धतः मायावी च। सुलभक्रोधः चण्डवृत्तिः विकत्थनश्च। प्रद्युम्नः नायकः उदात्तः महासत्त्वः। अतिगम्भीरः कृपावान् अविकत्थनः उभयोरेतादृशयोः परस्परं व्यूहप्रतिव्यूहादिकस्य शस्त्रास्त्रप्रयोगात्मकस्य युद्धस्य वर्णनम् अत्र भवति। चतुर्थाङ्कप्रारम्भे राक्षसपात्रप्रयुक्तेन –

रथाङ्गक! यदुकुलशिशुना प्रद्युम्ननाम्ना धानुष्कमानिना।
साम्प्रतमस्मदीयस्यन्दनकेतनापहरणं कृतमित्यश्रौषम्।। ४.४।।

प्रवेशकान्तर्गतपद्येन शम्बरस्य क्रोधकारणमुक्तं भवति।

शम्बरः :- न केवलं जीवति। किन्तु-

पद्यम्- **हित्वा साध्वसमेष रोषपरुषः कृत्वा च धैर्यं परं मुक्त्वा**
तीव्रशिखान् जवेन विशिखान् हत्वा च दोषाचरान्।
भित्वा सालमनुप्रविश्य नगरं हृत्वा ततस्स्यन्दनं
भूयो हन्तुमथाप्यमर्षमधिकं पुष्णाति कृष्णात्मजः।। प्रद्यु. ४.७।।

इत्यादिषु पद्येषु शम्बरस्य सुलभक्रोधः वर्णितः। चतुर्थाङ्के प्रधानतया वीर-क्रोध-जुगुप्सा रसानां वर्णनं भवति। तत्र रौद्रः किञ्चित् सोदाहरणं प्रदर्श्यते -

वध-बन्धादिपर्यवसितः परनिकृतिजन्ममनः प्रज्ज्वलनाख्यः भावः क्रोधः। महासंग्रामे प्रचलति सति शम्बरः **पूर्वमेव प्रद्युम्नम् अहत्वा त्यक्तवान् धिङ् माम्** इति आत्म-निन्दाव्याजेन प्रद्युम्ने कारुण्यं प्रदर्शितमिव प्रगल्भते। **अयुद्धोचिते काले एव समुद्रे पातनेन ते कारुण्यम् अत्यन्तं श्लाघनीयम्** इति सोल्लुण्ठनवचनं कथयति। तदा शम्बरः सामर्षम्-

'अरे रुक्मिणी यौवनपरशो! पशुपालशिशो! प्रद्युम्नपशो!

शम्बरस्य ममाप्यन्तर्जृम्भितश्शोकपावकः।
सुतापायसमुत्पन्नोऽप्यसु-तापाय ते भवेत्।। ४.५०।।'

इति कथयता शम्बरेण **मदीयः सुतापसमुत्पन्नः शोकः ते असूनां तापाय भवेत्** इति प्रतिज्ञाकरणात् प्रद्युम्नालम्बनः क्रोधः, रौद्रात्मना परिणतः प्रद्युम्नगत-उत्साहस्य परिपोषकः।

चतुर्थाङ्के प्रद्युम्नस्य वचसः क्रुद्धः सन् शम्बरः सावज्ञम् एवं तं प्रद्युम्नमधिक्षिपति -

शम्बरः :- अरे! दुरात्मन्! अतुलदैत्यकुलतिलकस्य शम्बरस्यापि किं नाम त्वादृशो नरपाशोऽपि लक्ष्यम्।

तेजस्विनो हि कार्येण दर्शयन्ति स्वविक्रमम्।
त्वादृशाः कत्थनं व्यर्थं कुर्वते खर्व तेजसः।। ४.५३।।

तस्यायं भावः। अप्रतिहतपराक्रमशालिनः शम्बरस्य त्वं कियान् ? प्रतापशालिनः कार्येण पराक्रमं प्रदर्शयन्ति। दुरात्मन् त्वं तु वृथाकत्थसे व्यर्थं जल्पसि इति प्रद्युम्नं निन्दति।

अत्र प्रद्युम्नालम्बनकः प्रतिस्पर्धाद्युद्दीपितः, ईर्ष्यासूयादि-अनुभावितः अधिक्षेपादि-व्यभिचारिभावैः परिपुष्टः शम्बरनिष्ठः क्रोधाख्यः स्थायी रौद्रं व्यञ्जयति। एवमेव अत्र नाटके इतरत्रापि प्रद्युम्न-शम्बरयोः वाक्कलहे वीर-रौद्रयोः अभिव्यक्तिः सहृदयैः अनुभूयते।

६.५. वीररसः :–

नेपथ्ये दुन्दुभिध्वनिं श्रुत्वा मायावती ससंभ्रमोद्वेगम् -राजपुत्र! परित्रायस्व इति प्रद्युम्नं गाढमाश्लिष्यति। मनोरमापि महावीर इति सम्बुद्ध्य सखीं शम्बरात् संरक्षतु इत्यभ्यर्थयति। तदा प्रद्युम्नः सावज्ञं मनोरमां प्रति **"मा भैषीः। कियदेतदस्य हरिकिशोरस्य। किन्तु मदीयमनोरथबन्धुरेवैष दुन्दुभिघोषः।"** इत्यभयं दत्वा –

चटुभिरसकृन्नर्मालापैरयाचितया भयात्
कलवलयनिक्वाणं कण्ठग्रहस्सहसा कृतः।
उरसि च कुचामर्दो दत्तस्सुमुद्रितमौक्तिकं
स्वयमपगतद्वैतं तन्व्या परिष्वजमानया।। प्रद्यु. ४.९२।।

इति कथनेन शत्रोः मायाविनः शम्बररक्षसः अत्यन्तनिकटवर्त्यपि प्रद्युम्नः निश्चलत्वभावनया तामाश्वासयति। तस्य शत्रोः तृणप्रायत्वभावनेन प्रद्युम्नस्य उत्साहस्थायिकः वीरः अभिव्यज्यते। यद्यपि अत्र परिष्वङ्गात् कुचामर्दात् शृङ्गाररसः, **भयात् सहसा कण्ठग्रहः** इत्यनेन मायावतीगतभयस्थायिकः भयानकरसश्च वर्णितौ तथापि अवान्तरप्रकरणदृष्ट्या अङ्गिनं वीररसम् अङ्गरसौ भूत्वा पोषयतः।

तृतीयाङ्के शम्बरात् भीतां मायावतीं प्रति प्रतिज्ञां कुर्वतः प्रद्युम्नस्य वचनमिदम् –

जाग्रन्मायाडम्बरं शम्बरं तं साकं दैत्यं पुत्रमित्रैर्निहत्य।
द्रक्ष्यामि त्वां सुप्रसन्नाननाब्जां प्रद्युम्नोऽहं तन्वि! कुर्वे प्रतिज्ञाम्।। ३.६८।।

अस्यायं भावः। तन्वि! मायाविनं दैत्यं शम्बरं पुत्रमित्रैस्साकं निहत्य त्वां प्रसन्नवदनां कृत्वा द्रक्ष्यामि इति प्रद्युम्नोऽहं प्रतिज्ञां करोमि इति। अत्र शम्बरालम्बनकः, मायावत्याः भयादिभिः उद्दीपितः, प्रतीकाराद्यनुभावितः, प्रसन्नाननाब्जमायावतीदर्शनविषयकौत्कण्ठ्य-धैर्यादिभिः व्यभिचारिभावैः परिपुष्टः, प्रद्युम्ननिष्ठः उत्साहाख्यः स्थायी वीररसं व्यञ्जयति।

एवं चतुर्थाङ्के युद्धाय प्रवृत्तयोः प्रद्युम्न-शम्बरयोः परस्परवाक्कलहे —

प्रद्युम्नः :- **अखिलदनुजकूटध्वंसकात् कंसकाला-**
दधिगतजनुषो मे त्वादृशास्स्युः[4] कियन्तः।
जगति हरिकिशोरो जम्बुकं हन्त! जीर्यत्
कुणपनिगरणान्धं किं नु लक्षीकरोति।। ४.५२।।

इदं पद्यं वर्तते। तस्यायं भावः – "हे शम्बर! कंसं हतवतः वंशात् जन्मप्राप्तवतः मम प्रद्युम्नस्य त्वादृशाः कियन्तः? तथा हि — जगति यदा कदापि हरिकिशोरः विगतमांसलम् अस्थिं लिहन्तं जम्बुकं किं नु लक्षीकरोति?" इति। अत्र शम्बरालम्बनकः, युद्धाद्युद्दीपितः, अधिक्षेपाद्यनुभावितः, गर्व-आत्मविश्वासादिभिः व्यभिचारिभिः परिपुष्टः प्रद्युम्ननिष्ठः उत्साहस्थायिभावः वीररसं व्यञ्जयति।

६.६. भयानकरसः :–

मायाशार्दूलं विलोक्य तत्रत्याः तपोवनवासिनः मुनयः दशस्वपि दिक्षु अर्पितदृशः धावन्ति। **करेभ्यः तुलसीमालाः भ्रंशयन्तः पलायन्ते मुनयः** इत्येवं शार्दूलाम्बनस्य मुनिजनाश्रयस्य तुलसीमालाभ्रंशादिना अनुभावितस्य भयस्य अधो निर्दिष्टपद्ये अभिव्यक्तेः भयानको रसः।

जवात् पश्चाद्धावज्जनचरणघातध्वनिभिर–
प्यमी जाता शङ्का दशसु च दिशास्वर्पितदृशः।
करभ्रश्यत्पूजाकुसुमतुलसीवासितपथाः
पलायन्ते हन्त! प्रसभमृषयश्शुष्यदधराः।। प्रद्यु. ३.२।। इति।

६.७. बीभत्सरसः :–

चतुर्थाङ्के युद्धभूमौ अधो निर्दिष्टपद्ये अनुज्ज्वलशवाद्यलम्बनकः प्रेतानां क्रोष्टुशतेन उत्पाटनादिना अनुभावितः चपलतादिभिः परिपोषितः जुगुप्साख्यः स्थायी बीभत्सरसो भवति। तद्यथा –

छिद्रोत्सृत्वरकोष्णशोणितरसोन्मत्तोग्रगृध्रच्छटा
भुक्तोच्छिष्टकया तया मदिति जप्रेताङ्गगूढं पलम्।
गाढालीढकरोटिघट्टनभवक्रांकारघोरस्फुटद्दंष्ट्रं
क्रोष्टुशतेन चापलवता हा कष्टमुत्पाट्यते ।। प्रद्यु. ४.५६ ।। इति।

६.८. अद्भुतरसः :–

उद्बोधनसरो वृत्तान्तादौ अद्भुतस्य पताका दृश्यते एव।

एवञ्च वीरादिरसान्तरपोषितस्य शृङ्गारस्य अन्ततः प्रद्युम्नानन्दीये रुक्मिणी–कृष्णयोः समर्पिते शान्तरसस्य दर्शनात् शान्तस्यापि अत्र प्रान्ते अवस्थानम्। एवं नवरसभरितमिदं नाटकं विराजते।

रसविचारप्रकाशकेऽस्मिन्नंशे आदौ भरतमुनि–मम्मट–धनञ्जयैः प्रतिपादितं रसस्वरूपम्, तदनु रससामग्री, रसभेदाः, रसपोषणम् इत्येते अंशाः निरूपिताः।

अथाग्रे कवेः वेङ्कटाध्वरिणः श्लेष–यमकालङ्कारप्रियत्वम्, नाटके तयोः अलङ्कारयोः सन्निवेशप्रकारश्च सङ्क्षेपेण समुपस्थाप्यते।।

५. श्लेष–यमकालङ्काराध्ययनम्

१. अलङ्कारस्वरूपनिरूपणम् :–

ये काव्यशोभां वर्धयन्ति ते अलंकाराः। अलं नाम सौन्दर्यम्। सौन्दर्यस्य = चमत्कार्यर्थस्य उपकारकाः भवन्ति। तत्र–

१.१. मम्मटस्य अलङ्कारलक्षणम् :–

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। ६७।।[1]

अङ्गी रसः तस्य अङ्गभूतौ च शब्दार्थौ। अतः शब्दार्थद्वारेण ये धर्माः रसम् उपकुर्वन्ति ते अलङ्काराः इति मम्मटाभिप्रायः। यथा कामिनीसौन्दर्ये कण्ठादीनां शरीराङ्गानाम् उत्कर्षेण हाराद्यलङ्काराः उपकारकाः भवन्ति, तथैव यत्र रसस्य स्थितिः तत्र तं रसम् उपकुर्वन्ति। यत्र च रसस्याभावः तत्र उक्तिवैचित्र्यमात्रं पर्यवसितम् इति। रमणीयाः अपि अर्थाः तुच्छशब्देन अभिधीयमानाः सन्तः न तथा चमत्काराधायकाः भवन्ति। यथा काञ्चनाञ्चलादि वस्त्रं तत्परिधात्रीं नायिकाम् उत्कर्षयति तथा नायिका रमणीया अपि तुच्छवस्त्रम् आह्लादाय न भवति।

१.२. जयदेवस्य अलङ्कारलक्षणम् :–

शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।
हारादिवदलङ्कारसन्निवेशो मनोहरः।। १।।[2]

इति जयदेवस्य अलङ्कारसामान्यलक्षणम्। अत्र च –

अलं क्रियते अनेन इति अलङ्कारः इति करणव्युत्पत्त्या काव्यशोभाधायकत्वेन अनुप्रासोपमादयः गृह्यन्ते। ललितकोमलानां युवतीनां देहे यथा हारादयः उपकारकाः अत्यन्तशोभां सम्पादयन्ति तथा कान्तासम्मितललितवचस्सु उपमादयः अलङ्काराः अपि

1. का.प्र. पृ. ३८५ 2. चं.आ. पं.म. श्लो.१ पृ. 73

काव्यशोभायाम् उपकुर्वन्तीति जयदेवकृत–चन्द्रालोकस्य पञ्चममयूखगतालङ्कारप्रकरणस्थास्य श्लोकस्य भावः। हारादिवत् इत्यनेन यथा हाराः शरीरे संयोगसम्बन्धेन तिष्ठन्तः कृत्रिमशोभां संवर्धयन्ति तथैव शब्दार्थशरीरे काव्ये संयोगवृत्त्या भवन्ति इति ज्ञायते।

एवञ्च रमणीयार्थस्य उपस्कारकतया गुणाः अलङ्काराश्च उक्ताः। कवेः कल्पनाचातुर्येण शब्दानां यो चमत्कारजनकः अलङ्कारसन्निवेशः अस्ति सः शब्दगतः चेत् शब्दालङ्कारः इति, अर्थगतश्चेत् अर्थालङ्कार इति च व्यवह्रियते।

श्लेष–यमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन ... वेङ्कटाचार्ययज्वना इति पुष्पिकायां वेङ्कटाध्वरिणा स्वयमुक्तत्वात् अस्य पिता रघुनाथार्यः **श्लेष–यमकचक्रवर्ति–**बिरुदाङ्कितः इति स्पष्टं ज्ञायते। एवं पितुः कौशलं पुत्रेऽपि सुस्पष्टं दीप्यते। अतः अस्मिन् नाटके प्रद्युम्नानन्दीये श्रीमद्वेङ्कटाध्वरिणः श्लेष–यमकालङ्कारयोः प्रयोगप्रियत्वं कीदृशम् ? इति प्रथमं तयोः स्वरूपं विविच्य विचारः क्रियते।

२.१. मम्मटस्य श्लेषालङ्कारलक्षणम् :–

वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः।
श्लिष्यन्ति शब्दाः श्लेषाऽसावक्षरादिभिरष्टधा।। ९.८४।।[1]

अर्थभेदेन शब्दभेदः इति न्यायेन काव्यमार्गे स्वरो न गण्यते इति न्यायेन च एकवृन्तगतफलद्वयन्यायेन नानार्थेषु च श्लिष्टेषु यत्र प्रकरणादिकं युगपदवतरति तत्र अर्थद्वयप्रतीतिः भवति, सः श्लेषः। स च वर्ण–पद–लिङ्ग–भाषा–प्रकृति–प्रत्यय–विभक्ति–वचनभेदात् अष्टधा भवति। इति।।

२.२. जयदेवस्य श्लेषालङ्कारलक्षणम् :–

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः[2]।

नानार्थसंश्रयः = नानार्थानाम् आश्रयः यः भवति सः श्लेषालङ्कारः। (नाना अर्थान् आश्रित्य तिष्ठति।) नानार्थानाम् आश्रयणे एकस्मिन् एव पदे वाक्ये वा अनेकार्थाः यथा आयान्ति तथा रचनं श्लेषः इति श्लेषालङ्कारस्य लक्षणम्। वर्ण्यम् = उपमेयम्/विषयः/

1. का.प्र. नवमोल्लासः पृ. ४१८ 2. చం. ప. पृ. 100.

प्रकृतम्, अवर्ण्यम् = उपमानम्/विषयी/अप्रकृतम्, उभयाश्रितः = प्रकृताप्रकृताश्रयः, श्लेषः = श्लेषालङ्कारः। अयं च अलङ्कारः शब्दमर्थमञ्चाधारीकृत्य तिष्ठति इत्यतः शब्दस्य अर्थस्य च (समानार्थे सति) आवृत्तिं न सहते। अत एव आलङ्कारिकैः श्लेषालङ्कारस्य गणना शब्दालङ्कारेषु अर्थालङ्कारेषु च (उभयत्र) कृता।

श्लेषालङ्कारस्य भेदान् वदति – कदाचित् सः श्लेषः (नानार्थसंश्रयः) वर्ण्यम् आश्रित्य तिष्ठति। कदाचित् अवर्ण्यम् आश्रित्य, कदाचिच्च उभयमाश्रित्य तिष्ठति – इत्थम् श्लेषालङ्कारः त्रिविधा – इति । १. प्रकृताश्रयश्लेषः २. अप्रकृताश्रयश्लेषः ३. प्रकृताप्रकृताश्रयश्लेषः इति।

इदानीं कुवलयानन्दे अप्पय्यदीक्षितेन्द्रेण कथितानाम् उदाहरणानां मुखेन तस्य श्लेषस्य समन्वयः प्रदर्श्यते –

१. प्रकृतश्लेषः :–

उक्ताः अर्थाः यदि प्रकृतयोः एव समन्वयः भवति तदा प्रकृतश्लेषः। **सर्वदो माधवः पायात् स योऽगङ्गामदीधरत् –** इति प्रकृतश्लेषस्य उदाहरणम्। इदमुदाहरणम् अर्थद्वयं ददाति। यः अगं गाम् अदीधरत् सः सर्वदः माधवः पायात् अर्थात् यः गोवर्धनपर्वतं, भुवं च धृतवान् सः (श्रीकृष्णः) समस्तदाता रक्षतु इति श्रीकृष्णपरतया एकः अर्थः । द्वितीयश्चार्थः भवति – यः गङ्गाम् अदीधरत् सः सर्वदा उमाधवः पायात् अर्थात् यः गङ्गां धृतवान् सः पार्वतीवल्लभः नित्यं रक्षतु – इति। श्लेषमहिम्णा आगतयोः द्वयोः अर्थयोः भक्तं प्रति प्रकृतत्वात् प्रकृतश्लेषालङ्कारः। अस्यैव सभङ्गश्लेष इति नाम।

२. अप्रकृतश्लेषः :–

यदा प्रकृतस्य कथनेन अप्रकृतस्य स्फूर्तिः तदा **अप्रकृतश्लेषः** इति।

अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना।

श्लोकेऽस्मिन् नायिकामुखवर्णनम् प्रकृतविषयः। हरिणा = सूर्येण, आहितसक्तिना = प्राप्तसंसर्गेण, अब्जेन = **पद्मेन, त्वन्मुखं तुल्यम्** इति प्रकृतार्थः। अनेन प्रकृतार्थज्ञानेन श्लेषवशात् हरिणेन = मृगेन, आहित = संस्थापित, सक्तिना = आसक्त्या, अब्जेन = **चन्द्रेण, त्वन्मुखं तुल्यम्** इति अप्रकृतार्थस्फूर्तिः भवति । अतः अयम् अप्रकृतश्लेषालङ्कारः।

अत्र वर्ण्यम् मुखम् प्रकृतवृत्तान्तः अस्ति। अस्य उपमानतया पद्मं प्रयुक्तम्। प्रकृतार्थेन साकम् अप्रकृतार्थस्य अर्थान्तरतया अब्जपदेन चन्द्रस्य स्फुरणात् अत्र अप्रकृतश्लेषालङ्कारः। अब्जेन = पद्मेन/चन्द्रेण त्वन्मुखं तुल्यम् इति नानार्थघटितत्वात् अत्र श्लेषस्यावकाशः।

३. प्रकृताप्रकृतश्लेषः (उभयश्लेषः) :–

प्रकृताप्रकृतौ द्वौ अपि गृह्येते चेत् **प्रकृताप्रकृतश्लेषः।** यथा–

उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः।।

अत्र वाहिनीपतिः इति पदस्य सेनापतिः/ समुद्रः इति, कीलालः इति पदस्य रुधिरम्, उदकम् इति च अर्थद्वयस्य सत्त्वात् श्लेषस्यावकाशः। अत्र सेनापतिः वर्ण्यः प्रकृतविषयः। वाहिनीपतिः समुद्रः अवर्ण्यः अप्रकृतविषयः। एवञ्च **उच्चरत् अधिकरुधिरः सेनापतिः शुशुभे** इति प्रकृतस्य, **उच्चरत् अधिकोदकसमुदायः समुद्रः शुशुभे** इत्यप्रकृतार्थस्य भानात् प्रकृताप्रकृतश्लेषः भवति।

३. प्रद्युम्नानन्दीये श्लेषालङ्कारस्य उदारणानि :–

एवं जयदेवस्य मम्मटस्य च श्लेषालङ्कारस्य लक्षणनिरूपणानन्तरं श्रीमद्वेङ्कटाध्वरिकृते प्रद्युम्नानन्दीये तादृशश्लेषालङ्कारस्य प्रयोगविन्यासं कीदृशम् इति परिशील्यते।

छन्नास्सम्प्रति शाखिनस्समुदयद्रागैरमीपल्लवै-
र्मद्यन्ते मधुपाङ्घ्रिभिस्सुमनसो मान्यास्सतां मौलिभिः।
सन्तन्वन्ति भयं च पञ्चमरवाः प्रौढद्विजार्हागम-
श्रेयो हृद्यवनाभिवृद्धिसमये किं किं न सम्भाव्यते।। प्रद्यु. १.४५।।

इदानीं शाखिनः - वृक्षाः, समुदयत् रक्तिमपल्लवैः (किसलयैः) आच्छादिताः सन्ति। मधुपायिनां भ्रमराणां पादसञ्चारेण सुमनसः - पुष्पाणि मद्यन्ते - सन्तोषं प्राप्नुवन्ति। सुमनसः - पुष्पाणि सतां मौलिभिः लालनीयानि। कोकिलानां पञ्चमालापाः विरहिणां भयं सन्तन्वन्ति। हृद्यवनाभिवृद्धिसमये प्रौढपक्षिणाम् अर्हागमं श्रेयः सर्वमपि किं किं न सम्भाव्यते ? सम्भाव्यते इति एकः प्रकृतार्थः।

समुदयत् रागैः - आविर्भूतरजोगुणैः छन्नाः - अभिभूताः शाखिनः - वेदाध्यायिनः

सन्ति। सतां मौलिभिः मान्याः, सुमनसः - विद्वांसः, मधुपाँघ्रिभिः - मधुपायिनां चरणैः (तत् साहचर्यात्), मद्यन्ते - सन्मौलिमान्याः विद्वांसोऽपि मत्ताः भवन्ति। सर्वपुष्पसुगन्धभरिततर्तोः सर्वप्राण्युन्मादकत्वात् विद्वांसोऽपि मद्यन्ते। इति युज्यते। पञ्चमरवाः चण्डालध्वनयः भयं सन्तन्वन्ति। प्रौढद्विजानां योग्यागन्तव्यश्रेयसः हारिणां - यवनानाम्, अभिवृद्धिसमये किं किं न सम्भाव्यते इति अप्रकृतः द्वितीयार्थः।

अत्र **शाखिनः, रागैः, मद्यन्ते, मधुपाः, सुमनसः, पञ्चमरवाः द्विजाः** इति पदानां भङ्गं विनैव प्रकृताप्रकृतयोः द्वयोरर्थयोः **समर्पणं, श्रेयः + हृद्यवनाभिवृद्धिसमये, श्रेयो हृत् + यवनाभिवृद्धिसमये** इत्यत्र तु पदानां भंगात् सभंगश्लेषः।

कवेः अत्र प्रकृतकथानुकूलवनवर्णनस्य, प्रकृतकथानुकूलत्वेन तात्पर्यविषयत्वात्, कविसमकाले भारतदेशे यवनप्रवेशेन समुद्भूतानां परदारागमन-मद्यपान-चण्डालविजृम्भण-वैदिककर्मध्वंसादीनामपि तदानीन्तनकाले प्रकृतानामपि, इदानीं प्रकृतकथाननुकूलतया अप्रकृतानां वैदिकमार्गविद्वेषिसामाजिकदुराचाराणाम् अप्रकृतार्थेन समम् अभेदसादृश्याद्यविषयाणाम् उपनिबन्धात् अयं **प्रकृताप्रकृतश्लेष** एव। न शब्दशक्तिमूलध्वनिः।।

विजृम्भमाणां विटपाळिमेव समाश्रयन्ते सकला द्विजेन्द्राः।
तथोचितं विप्रवरा वळीनां विमानरूपः कलिकालयोगः।। प्रद्यु. १.४६।।

वसन्तकाले सकलाः द्विजेन्द्राः - पक्षिराजाः, विजृम्भमाणां, विप्रवरावलीनामुचितं विटपालिमेव -पक्षिश्रेष्ठानामुचितं शाखासमुदायमेव, समाश्रयन्ते। तथा कलिकानां - कुट्मलानाम्, आलयः - निवासभूतः, अगः - वृक्षः, विमानरूपः = व्योमयानस्वरूपः, उपरि विद्यमानाः कलिकाः, गच्छत् विमानायमानाः सूक्ष्मरूपेण विराजन्ते इति भावः।

दूरात् दृश्यमानानि कुट्मलानि विमानायान्ते इति एकः अर्थः। सकलाः द्विजेन्द्राः - ब्राह्मणश्रेष्ठाः सकलप्राण्युन्मादके वसन्तकाले विजृम्भमाणां विटपालिमेव - विटसमुदायमेव, समाश्रयन्ते, कुटीसञ्चारिणोऽपि कर्मिष्ठाः विप्रवराः वळीनाम् - उपरिच्छदानाम्, उचितम् - योग्यम्, प्रदेशं समाश्रयन्ते विहाराय। कलिकालयोगः विगतमानरूपो हि वसन्तकाले वेदवेत्तारः लज्जां विहाय विटैस्सञ्चरन्तः विहारार्थम् उपरि वलीः समाश्रयन्ते।

एवं पद्येऽस्मिन् पक्षि-ब्राह्मणरूपवृत्तान्तस्य समग्रस्य वसन्तकालसम्बन्धात् प्रकृतस्य द्विजेन्द्राः विप्रवराः कलिकालयोगः इति श्लिष्टपदैः प्रतिपादनात् श्लेषः। स च प्रकृतविषयत्वात् **प्रकृतश्लेषः**।।

मायावती **:-** (सानन्दम्) (संस्कृतमाश्रित्य) -

पद्यम् - **अन्तर्मग्नं विरहजलधेर्हन्त! मन्देतरस्य**
प्रौढैर्दुःखव्यतिकरमयैः पन्नगैर्यन्त्रिताङ्गम्।
भक्तश्रेयः प्रकटकमठस्साधु वोढा क्षमाया
मादृक्षं त्वं जनमुदहरो मन्दरागं क्षणेन।। प्रद्यु. २.३३।।

इति मायावती सोमश्रवं सप्रश्रयं प्रणमति।

द्वितीयाङ्के सोमश्रवसा उपायसूचनान्तरं सानन्दं संस्कृतमाश्रित्य मायावत्या उक्ते उपरि श्लोके प्रकृताप्रकृतश्लेषः दृश्यते। कूर्मरूपी भगवान् नारायणः क्षीराब्धेः अन्तर्मग्नं सर्ववेष्टितं मन्दरसंज्ञकम् पर्वतम् उद्धृतवान् इत्येकः अर्थः।

क्षमागुणधारी भजतां श्रेयःप्रकाशकः आश्रमसाधुः सोमश्रवाः महतः विरहाब्धेः अन्तर्मग्नं माम् अमन्दरागम् - अधिकप्रियानुरागिणं दीनजनम् उद्धृतवान्। इति द्वितीयः अर्थः।

अत्र **उदहरो मन्दरागम्** इत्यत्र अमन्दरागम् मन्दरागम् इति सभङ्गश्लेषेण अर्थद्वयं, **क्षमायाः वोढा** इत्यत्रापि भूमेः, क्षमागुणस्य इत्यर्थद्वयेन श्लेषः। विरहजलधेः अगाधेन, सम्भावितशून्यतागुणस्य जलधेः समुद्रकल्पविरहात् इति चार्थद्वयेन श्लेषः। अत्र च कमठवृत्तान्तस्य सोमश्रवोवृत्तान्तस्य च इति प्रकृताप्रकृतवृत्तान्तयोः एकशब्देन कथनात् अयं श्लेषः। विरहजलधेः इत्यत्र सोमश्रवोवृत्तान्तस्य वाच्यायमानत्वात् अत्र शब्दशक्तिमूलध्वनिः न भवति। अपि तु **प्रकृताप्रकृतश्लेष** एव।

मायाशार्दूलप्रभावेन सम्भ्रान्ताः मुनयः प्रद्युम्नमाश्रयन्ति। न भेतव्यम् इत्युक्त्वा दृप्तशार्दूलः अत्र निर्भयं चरन् जनान् भाययति। इति कथनात् परं प्रकृताप्रकृतश्लेषसहितं श्लोकं वदति -

वनभूसुरभीकरणक्षमं(१) कबन्धैकसापेक्षम्।
नेष्यामि पुण्डरीकं सुशोभ नक्षत्रपतिरहं शोषम्।। प्रद्यु. ३.६।।

मायाशार्दूलवर्णनपरे अस्मिन् पद्ये श्लेषः दृश्यते। भीकरणक्षमं, कबन्धैकसापेक्षं पुण्डरीकम् - शार्दूलम्, सुशोभनक्षत्रपतिः - राजन्यश्रेष्ठः अहं प्रद्युम्नः शोषम् - नाशम्, प्रापयिष्यामि इत्येकः अर्थः प्रकृतविषयः।

वने निवसतां भूसुराणाम् - ब्राह्मणानाम्, वनभू + सुरभीकरणक्षमम् - अरण्यभूमेः परिमलीकरणे शक्तम्, कबन्धैकसापेक्षम् - जलैकसापेक्षम्, पुण्डरीकम् - सिताम्भोजम्, नक्षत्रपतिः चन्द्रः इव अहं शोषं नेष्यामि - म्लानिं प्रापयिष्यामि।

अत्रापि अहमिति अश्लिष्टस्य पदस्य सद्भावात् तस्य अप्रकृतानन्वयित्वात् प्रकृत-अप्रकृतवृत्तान्तयोः सादृश्यस्य व्यङ्ग्यत्वेऽपि न ध्वनित्वम्। अपि तु श्लेष एव। औपम्यान्वयिनः समग्राप्रकृतार्थस्य अत्र अभावात्। अतः इदमपि **प्रकृताप्रकृतश्लेषस्य** उदाहरणम्।।

पद्यम्- **पुरस्तनतटस्थेमभासुरापाण्डराकृतिः।**
विनेष्यति रसैस्तापमसौ सुरतरङ्गिणी।। प्रद्यु. ३.५३।।

पुरोभवं यत्तटं तस्य स्थेम्ना = स्थिरत्वेन। सुरतरङ्गिणी = देवगङ्गा, रसैर्जलैः। तापम् = आतपसन्तापम् अपनेष्यति। पुरोग्रे स्तनतटयोः = कुचप्रदेशयोः, स्थेम्ना = स्थिरत्वेन काठिन्येनेति यावत्। सुरतरङ्गिणी = सुरतस्थानभूता, रसैः - सुरतसुखैश्च। तापं विरहज्वरञ्च अपनेष्यति।

चतुर्थाङ्के जराभरालसः कृच्छ्रेण वेत्रयष्टिमुद्यम्य सनिर्वेदं कञ्चुकी प्रविश्य जरां वर्णयति -

पदोपन्यासे हा! चरणरसनं प्रस्खलति
मे वपुर्वक्त्रं चेदं सदशनपरिहासमधुना।
अदश्चक्षुश्शीर्षं बहुलपलितान्तर्हितमभू-
दसौ पारे वाचां जयति जरसः कोऽपि महिमा।। ४.२।।

पादस्य समीपे पादनिक्षेपे, पदस्य सुबन्तादेरुपन्यासे उच्चारणे च प्रस्खलति। वपुश्शरीरं, सन् = विद्यमानः, अशनस्य परह्रासोऽल्पीभावो यस्येति। वक्त्रम् = आननम्। दशनानां =

दन्तानां, परिहासस्संक्षेपः तत्सहितमिति चार्थः। चक्षुः परत्वे पलितशब्देन रलयोरैक्यात् परितमिति प्रतीयते। पॄ-पालनपूरणयोरिति पूरणार्थक-पॄ-धातुनिष्पन्नत्वात् परितशब्दस्य नेत्राच्छादकदोषविशेषोऽर्थः। जरसः महिमा तु वाचं पारं गतम्।

बहुलं यत्परितं नेत्रदोषः तेनान्तर्हितमाच्छादितं चक्षुः विषयग्रहणपाटवशून्यमिति यावत्। बहुलं यत्पलितं जरसा केशानां शुक्लत्वं तेनाच्छादितं शीर्षमिति चार्थः।।

एवं पितुः रघुनाथयज्वनः इव, श्लेषालङ्कारप्रियत्वं वेङ्कटाध्वरिणि अपि प्रवाहप्रयातमेवेति उपरि प्रदर्शितेभ्यः पद्येभ्यः ज्ञायते। अनन्तरमस्य यमकालङ्कारप्रियत्वं किञ्चित् निरूप्यते। एतन्निरूपणात् प्राक् यमकस्य आलङ्कारिकाणां कानिचनलक्षणानि परिशील्यन्ते।

४.१. मम्मटोक्तं यमकालङ्कारलक्षणम् – तद्भेदाश्च :–

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।
यमकम् पादतद्भागवृत्ति तद्यात्यनेकताम्।। ९.८३।।[1]

अर्थे सति भिन्नार्थानां वर्णानाम् पुनः श्रुतिः (आवृत्तिः) यमकम् । समानार्थत्वा–भाववत्समानानुपूर्वीकानेकवर्णावृत्तिः यमकमिति ज्ञायते । तत्र **पादयमकम्** एकादशधा (११)–

यदि प्रथमपादः द्वितीयपादे अर्थभेदे सति आवृत्तितया यम्यते तदा **मुखं** नाम यमकालङ्कारः (१)। प्रथमपादः तृतीये पादे यम्यते चेत् तदा **सन्दंशयमकम्** (२)। प्रथमपादः चतुर्थे यम्यते तदा **आवृत्तियमकम्** (३)। एवं द्वितीयपादः तृतीये पादे यम्यते – **गर्भयमकम्** (४)। द्वितीयपादः चतुर्थपादे यम्यते तदा **सन्दष्टकयमकम्** (५)। तृतीयपादः चतुर्थपादे यम्यते तदा **पुच्छयमकम्** (६) । प्रथमपादः द्वितीय–तृतीय–चतुर्थपादेषु यम्यते तदा **पङ्क्तियमकालङ्कारः** (७)। पङ्क्तिमेव महायमकालङ्कार इति केचित् आलङ्कारिकाः। पादत्रययमकं तु न चमत्कारकारि। इत्थम् एकैकपदावृत्तौ यमकस्य सप्त भेदाः आयान्ति।

1. का.प्र. नवमोल्लासः पृ. ४१२–४१५ एते यमकभेदाः यथामति अनुसन्धात्रा लिखिताः।

प्रथमः पादः द्वितीयपादे, तृतीयपादः चतुर्थे पादे यम्यते चेत् तदा **युग्मकम्** (८)। प्रथमपादः चतुर्थपादे, द्वितीयपादः तृतीयपादे चेत् तदा **परिवृत्तियमकम्** (९) । इति अर्धाभ्यासमृते पादद्वयावृत्तौ द्वयमिति नव भेदाः। अर्धावृत्तिस्तु **समुद्गः** (१०)। श्लोकावृत्तिः **महायमकम्** (११)। तदुभयमपि पादावृत्तियमकविशेषे एव इति कृत्वा एकादश पादयमकभेदाः।

१. १–२ – प्रथमपादः द्वितीयपादे अर्थभेदे सति आवृत्तिः **मुखयमकम्**

२. १–३ – प्रथमपादः तृतीयपादे अर्थभेदे सति आवृत्तिः **सन्दंशयमकम्**

३. १–४ – प्रथमपादः चतुर्थपादे अर्थभेदे सति आवृत्तिः **आवृत्तियमकम्**

४. २–३ – द्वितीयपादः तृतीयपादे अर्थभेदे सति आवृत्तिः **गर्भकयमकम्**

५. २–४ – द्वितीयपादः चतुर्थपादे अर्थभेदे सति आवृत्तिः **सन्दष्टकयमकम्**

६. ३–४ – तृतीयपादः चतुर्थपादे अर्थभेदे सति आवृत्तिः **पुच्छयमकम्**

७. १–२–३–४ प्रथमपादः द्वितीय–तृतीय–चतुर्थपादेषु अर्थभेदे सति आवृत्तिः **पङ्क्तियमकम्** पङ्क्तियमकमेव **महायमकम्** इति केचित् अभिप्रयन्ति।

८. १–२, ३–४ प्रथमपादः द्वितीयपादे, तृतीयपादः चतुर्थपादे अर्थभेदे सति आवृत्तिः **युग्मकयमकम्**

९. १–४, २–३ प्रथमपादः चतुर्थपादे, द्वितीयपादः तृतीयपादे अर्थभेदे सति आवृत्तिः **परिवृत्तियमकम्**

१०. १.२–३.४ प्रथमद्वितीयपादौ तृतीयचतुर्थपादयोः अर्थभेदे सति आवृत्तिः अर्धावृत्तिः **समुद्गयमकम्**

११. **श्लोकावृत्तिः** प्रथमः श्लोकः द्वितयश्लोके अर्थभेदे सति आवृत्तिः **महायमकम्**

पादभागावृत्तियमकस्तु बहुविधम् – प्रथमं पादाः द्विधा विभज्यन्ते। एवं एकस्मिन् श्लोके चत्वारः पादाः तेषु एकैकस्य पदस्य द्विधा कृते अष्टौ भागाः भवन्ति। अत्र प्रथमपादः १ द्वितीयपादः – २, तृतीयपादः – ३, चतुर्थपादः – ४ इति सङ्केतः। तथैव पादस्य द्विधा करणे प्रथमपादे १a १b इति द्वितीयपादे – २a २b इति, तृतीयपादे – ३a ३b इति, चतुर्थपादे – ४a ४b इति च सङ्केतः कृतः।

पादस्य द्विखण्डीकृतेषु (a-b)प्रथमादिपादानाम् ***आद्यभागाः*** (a) पूर्ववद्द्वितीयादिपादेषु ***आद्यभागेषु*** यदि यम्यन्ते तदा **आद्याद्यमुखयमकादयो** दश(१०) भेदाः । एवम् अन्त्यभागाः पूर्ववद्द्वितीयादिपादेषु अन्त्यभागेषु यदि यम्यन्ते तदा **अन्त्यान्त्यमुखयमकादयो** दश भेदाः आयान्ति। एवं च विंशतिभेदाः अत्र समायान्ति। श्लोकावृत्तिस्थानीयः एकादशो भेदः भागावृत्तौ नान्वेति।

१. १a–२a – प्रथमपाद–आद्यभागः द्वितीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यमुखयमकम्

२. १a–३a – प्रथमपाद–आद्यभागः तृतीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यसन्दंशयमकम्

३. १a–४a – प्रथमपाद–आद्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यावृत्तियमकम्

४. २a–३a – द्वितीयपाद–आद्यभागः तृतीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यगर्भकयमकम्

५. २a–४a – द्वितीयपाद–आद्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यसन्दष्टकयमकम्

६. ३a–४a – तृतीयपाद–आद्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यपुच्छयमकम्

७. १a–२a–३a–४a प्रथमपाद–आद्यभागः
द्वितीय–तृतीय–चतुर्थपाद–आद्यभागेषु अर्थभेदे सति आवृत्तिः
आद्याद्यपङ्क्तियमकम्

पङ्क्तियमकमेव **महायमकम्** इति केचित् अभिप्रयन्ति। इत्येतावत् सप्तशुद्धभेदाः।

८. १a–२a, ३a–४a प्रथमपाद–आद्यभागः द्वितीयपाद–आद्यभागे,
तृतीयपाद–आद्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्य–युग्मकयमकम्

९. १a–४a, २a–३a प्रथमपाद–आद्यभागः चतुर्थपाद–आद्यभागे,
द्वितीयपाद–आद्यभागः तृतीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्य–परिवृत्तियमकम् इति द्वौ सङ्करभेदौ।

१०. १a.२a–३a.४a प्रथमपादद्वितीयपाद–आद्यभागौ
तृतीयपाद–चतुर्थपाद–आद्यभागयोः अर्थभेदे सति आवृत्तिः अर्धावृत्तिः
आद्याद्यसमुद्गयमकम् – इति।

पादस्य द्विखण्डीकृतेषु (a-b) प्रथमादिपादेषु अन्त्यभागस्य द्वितीयादिपादेषु अन्त्यभागेषु यमने **अन्त्यान्त्यमुखयमकादयो** (१०) भेदाः आयान्ति। तद्यथा–

१. १b–२b – प्रथमपाद–अन्त्यभागः द्वितीयपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यमुखयमकम्
२. १b–३b – प्रथमपाद–अन्त्यभागः तृतीयपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यसन्दंशयमकम्
३. १b–४b – प्रथमपाद–अन्त्यभागः चतुर्थपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यवृत्तियमकम्
४. २b–३b – द्वितीयपाद–अन्त्यभागः तृतीयपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यगर्भकयमकम्
५. २b–४b – द्वितीयपाद–अन्त्यभागः चतुर्थपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यसन्दष्टकयमकम्
६. ३b–४b – तृतीयपाद–अन्त्यभागः चतुर्थपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यपुच्छयमकम्
७. १b–२b–३b–४b प्रथमपाद–अन्त्यभागः द्वितीय–तृतीय–चतुर्थपाद–अन्त्यभागेषु अर्थभेदे सति आवृत्तिः **अन्त्यान्त्यपङ्क्तियमकम्**
पङ्क्तियमकमेव **महायमकम्** इति केचित् अभिप्रयन्ति। इत्येतावत् ***समशुद्धभेदाः***।

८. १b–२b, ३b–४b प्रथमपाद–अन्त्यभागः द्वितीयपाद–अन्त्यभागे,
तृतीयपाद–अन्त्यभागः चतुर्थपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्ययुग्मकयमकम्
९. १b–४b, २b–३b प्रथमपाद–आद्यभागः चतुर्थपाद–आद्यभागे,
द्वितीयपाद–अन्त्यभागः तृतीयपाद–अन्त्यभागे अर्थभेदे सति आवृत्तिः
अन्त्यान्त्यपरिवृत्तियमकम्
इति ***द्वौ सङ्करभेदौ।***

१०. १b.२b–३b.४b प्रथमपादद्वितीयपाद–अन्त्यभागौ

तृतीयपाद–चतुर्थपाद–अन्त्यभागयोः अर्थभेदे सति आवृत्तिः अर्धावृत्तिः

अन्त्यान्त्यसमुद्गयमकम्

एवं च पादस्य द्विधा करणे विंशति(२०) भेदाः आयान्ति।

त्रिखण्डीकृतेषु तु पादस्य (आदि(a)–मध्य(b)–अन्तत्वेन(c)) त्रिंशद्भेदाः (३०), चतुःखण्डीकृतेषु चत्वारिंशत् (४०) भेदाः **स्थानपरिवर्तिनो** भवन्ति। प्रथमादिपादानाम् आन्त्यादिभागाः द्वितीयादिपादानाम् आदेभागेषु यम्यन्ते, इत्याद्यन्वर्थतानुसारेण अन्त–आद्यादि यमकादयः प्रभेदाः भवन्ति।

१. १b–२a – प्रथमपाद–मध्यभागः द्वितीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

मध्यादिमुखयमकम्

२. १b–३a – प्रथमपाद–मध्यभागः तृतीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

मध्यादिसन्दंशयमकम्

३. १b–४a – प्रथमपाद–मध्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

मध्यादिवृत्तियमकम्

४. २b–३a – द्वितीयपाद–मध्यभागः तृतीयपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

आद्याद्यगर्भकयमकम्

५. २b–४a – द्वितीयपाद–मध्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

आद्याद्यसन्दष्टकयमकम्

६. ३b–४a – तृतीयपाद–मध्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

आद्याद्यपुच्छयमकम्

७. १a–२a–३a–४a प्रथमपाद–आद्यभागः

द्वितीय–तृतीय–चतुर्थपाद–आद्यभागेषु अर्थभेदे सति आवृत्तिः

आद्याद्यपङ्क्तियमकम्

पङ्क्तियमकमेव **महायमकम्** इति केचित् अभिप्रयन्ति। इत्येतावत् सप्तशुद्धभेदाः।

८. १a–२a, ३a–४a प्रथमपाद–आद्यभागः द्वितीयपाद–आद्यभागे,

तृतीयपाद–आद्यभागः चतुर्थपाद–आद्यभागे अर्थभेदे सति आवृत्तिः

आद्याद्ययुग्मकयमकम्

९. १a-४a, २a-३a प्रथमपाद-आद्यभागः चतुर्थपाद-आद्यभागे,
द्वितीयपाद-आद्यभागः तृतीयपाद-आद्यभागे अर्थभेदे सति आवृत्तिः
आद्याद्यपरिवृत्तियमकम् - इति द्वौ सङ्करभेदौ।
१०. १a.२a-३a.४a प्रथमपादद्वितीयपाद-आद्यभागौ
तृतीयपाद-चतुर्थपाद-आद्यभागयोः अर्थभेदे सति आवृत्तिः अर्धावृत्तिः
आद्याद्यसमुद्गयमकम् - इति।

द्विखण्डे यथा प्रथमपादस्य अन्त्यम् अर्धम् द्वितीयपादस्याद्यार्धे यम्यते तदा **अन्तादि-यमकम्**। प्रथमभाग एव अन्त्यभागे यदि यम्यते तदा **आद्यन्तयमकम्**। एवं प्रथमपादस्य आद्यन्तभागौ द्वितीयस्यान्तादिभागयोः यदि यम्यते तदा आद्यन्तान्तादियमकयोः समुच्चयः।

अत्र त्रिखण्ड-चतुःखण्डयोः पूर्वपादमध्यभाग उत्तरपादस्य आदिभागे यदि यम्यते तदा **मध्यादियमकम्।** पूर्वस्य आदिभागः चेत् उत्तरपादस्य मध्यभागे तदा **आदिमध्य-यमकम्।** पूर्वस्य मध्यादिभागौ चेत् उत्तरस्य आद्यमध्ययोः तदा **मध्यादि-आदिमध्ययोः समुच्चयः**। एवं प्रथमस्य अन्त्यभागः द्वितीयस्य मध्यभागे चेत् तदा अन्त्यमध्यम्। पूर्वस्य मध्यभागः चेत् द्वितीयस्यान्त्यभागे तदा मध्यान्तिकम्। पूर्वस्यान्त्यमध्यभागौ चेत् द्वितीयस्य मध्यान्त्यभागयोः तदा अन्त्यमध्यमध्यान्त्ययोः समुच्चयः। यद्यपि पूर्वस्य आदिभाग उत्तरस्य अन्त्यभागे चेत् तदा आद्यन्त्यकम्, मध्यभागः तु आद्यभागे चेत् तदा अन्तादिकम् इत्यादिप्रकारद्वयं सम्भवति तथापि द्विखण्डान्तर्गतमेव तत् इति पृथक् न गण्यते।

अन्त-आदियमकम् :-

द्विखण्डे यथा प्रथमपादस्य अन्त्यम् अर्धम् द्वितीयपादस्याद्यार्धे यम्यते तदा **अन्तादियमकम्**।

प्रथमपादस्य आदि-अन्तभागौ	१-२ = **२-३, २-५, २-७** → अन्त-आदियमकम्
द्वितीयपादस्य आदि-अन्तभागौ	३-४ = ४-५, ४-७, (४-१)
तृतीयपादस्य आदि-अन्तभागौ	५-६ = ६-७, (६-१, ६-३)
चतुर्थपादस्य आदि-अन्तभागौ	७-८ = (८-१, ८-३, ८-५)

उपरितः अधः एव आगन्तव्यम्। अधः उपरि न गन्तवयम्। अतः (४-१), (६-१, ६-३), (८-१, ८-३, ८-५) इत्येते भेदाः न आयान्ति।

आदि–अन्तयमकम् :–

प्रथमपादस्य आदिभागः एव द्वितीयपादस्य अन्त्यभागे यदि यम्यते तदा **आद्यन्तयमकम्**।

प्रथमपादस्य आदि–अन्तभागौ	१–२	= १–४, १–६, १–८
		→ **आदि–अन्तयमकम्**
द्वितीयपादस्य आदि–अन्तभागौ	३–४	= ३–६, ३–८, (३–२)
तृतीयपादस्य आदि–अन्तभागौ	५–६	= ५–८, (५–२, ५–४)
चतुर्थपादस्य आदि–अन्तभागौ	७–८	= (७–२, ७–४, ७–६)

अत्र च (३–२), (५–२, ५–४), (७–२, ७–४, ७–६) इत्येते न गण्याः।

आद्यन्त–अन्तादियमकम् :–

एवं प्रथमपादस्याद्यन्तभागौ द्वितीयस्यान्तादिभागयोः यदि यम्यते तदा **आद्यन्तान्तादियमकयोः** समुच्चयः।

प्रथमपादस्य आदि–अन्तभागौ	१–२	= १.२–४.३, १.२–६.५, १.२–८.७
		→ आद्यन्त–अन्तादियमकम्
द्वितीयपादस्य अन्त–आदिभागौ	४–३	= ३.४–६.५, ३.४–८.७
तृतीयपादस्य आदि–अन्तभागौ	५–६	= ५.६–८.७
चतुर्थपादस्य अन्त–आदिभागौ	८–७	=

इत्येवमादिकाः ऊह्याः। एते सर्वे नियतस्थानविवक्षया स्थानयमकभेदाः। अनियतेषु स्थानेषु आवृत्तेः अस्थानयमकभेदाः अपि बहवो सन्ति प्रभूततम् इदं यमकनिरूपणम्। **तदेतत् काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम्।**[1] इति मम्मटवचनम्। अस्य वचनानुसारं गूढार्थप्रतिसन्धानविलम्बेन आस्वादविच्छेदः इति, यथा इक्षुदण्डे इक्षोश्चर्वणेन रसनिःसरणे ग्रन्थिः व्यवधायकः तथा काव्ये यमकमपि। इति शम्।

1. का.प्र. नवमोल्लासः पृ. ४१५

४.२. जयदेवोक्तं यमकलक्षणम् :–

आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः।
यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः।।[1]

इति जयदेवस्य यमकालङ्कारलक्षणम्। **श्लोकस्यायं भावः।** माधुर्यवचसि श्रेष्ठाः प्राचीनालङ्कारिककवयः पुनरुक्तवर्णानां समूहं कवेः स्तुतिरूपः बीजाङ्कुरः यमकालङ्कारः इति वदन्ति। नाम वर्णानां समूहः सर्वथा समतया आवृत्तिः यमकम् इति सारः। लक्षणरूपे अस्मिन् लक्ष्ये एव स्तबकं स्तवकं इति श्लोकपूर्वार्धे माधुर्य–माधुर्य इति च वर्णसमूहस्य आवृत्तेः यमकालङ्कारः। अस्मिन् यमकालङ्कारे रकार–लकारयोः, शकार–षकारयोः, नकार–डकारयोः, ड–लाकारयोः विसर्ग–अविसर्गयोः, सबिन्दुक–अबिन्दुकयोः च भेदे सत्यपि, अभेदः कल्प्यते। तद्यथा –

यमकादौ भवेदैक्यं डलयोरलयोर्बवोः।
शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः।।
सबिन्दुकाबिन्दुकयोः स्यादभेदकल्पनम्।।[2] इति।

४.३. विद्यानाथोक्तं यमकलक्षणम् :–

यमकं पौनरुक्त्ये तु स्वरव्यञ्जनयुग्मयोः।। ५।।[3]

छेकानुप्रास–वृत्त्यनुप्रासयोः स्वराणां पुनरुक्तिः यमके तु स्वर–व्यञ्जनसमुदाय–पौनरुक्त्याश्रयं यमकम् इति रत्नापणकारः कुमारस्वामी व्याख्याति।

५. प्रद्युम्नानन्दीये यमकनिबन्धनम् :–

एवमस्य यमकालङ्कारस्य लक्षणं निरूपितम्। अथ प्रद्युम्नानन्दीयनाटकमालक्ष्य यमकालङ्कारस्य वेङ्कटाध्वरिणः यमकप्रयोगप्रियत्वं परिशील्यते।

दग्धे योगानलैश्शम्भोर्विदग्धे प्राणनायके।
वियोगानलसन्तप्ता तपस्तेपे रतिस्सती।। १.३३।।

1. चं.आ. पं.म. श्लो. ८ पृ. 79. 2. चं.आ. पं.म. पृ. 79.
3. प्र.रु. रत्ना. पृ. 247

अत्र **दग्धे** –विद**ग्धे,** इति वर्णस्तबकस्य आवृत्तत्वात् यमकालङ्कारः।

जम्बीरप्रतिबिम्बमेदुरकुचं गम्भीरनाभीबिलं
मर्यादाव्यतिलङ्घिलोचनमसत्पर्यायमध्यं वपुः।
सौवं रूपमिवापरं सुललितं निर्माय दुर्मायम-
प्यस्तोकस्मरविभ्रमैररमयन्मायावती शम्बरम्।। १.३६।।

प्रद्युम्न एष यदुवंशपतेः कुमारो
मारो भवत्प्रियतमो भुवि तन्वि! जातः।
गोप्तुं त्वमर्हसि मनस्विनि ! गूढमेनं
दैत्यं निहत्य दयितोऽयमुपेष्यति त्वाम्।। १.३९।।

दयाळुहृदयो योगी दर्भकोऽपि तमर्भकम्।
वर्धयामास कृष्णेन स्पर्धमानं वपुश्श्रिया।। १.४०।।

श्रमं हारं हारं सुरतविहितं पाण्ड्यसुदृशां
शनैर्घ्रायं घ्रायं सपरिमळचोळीकचभरान्।
प्रियैर्योजं योजं परिकुपितकर्णाटतरुणी
रसौ मन्दं मन्दं मलयमरुदास्कन्दति वनम्।। १.४३।।

इह विहरति पश्य प्राश्यघासं विलासा-
च्चलितनिजविषाणत्यक्तकण्डूविषादाम्।
अतिचिरमुपजिघ्रन्नादरात् प्राणकान्तां
दिशि दिशि कृतलीलादृक्तरङ्गः कुरङ्गः।। १.५२।।

मूले मूले स्फुरति पयसां दीर्घनाळप्ररोहो
नाळे नाळे नवसुरभिता सम्पदां सद्मपद्मम्।
पद्मे पद्मे भ्रमति परितश्शीधुपानाय भृङ्गो
भृङ्गे भृङ्गे श्रवणमधुरा भाति सङ्गीतभङ्गी।। १.६३।।

मन्दं मन्दं यथा यथा हळा! मारुतो वात्येषः
शीघ्रं शीघ्रं तथा तथा बहू भवन्ति श्वाशाभिलाषाः।
संवर्धन्ते यथा यथा वने कोकिलोदारनादा
अहो! शब्दास्तथा तथा गळे मम मन्दी भवन्ति।। २.२५।।

पद्यम्- **नेदीयांसि यथा यथा हि पुरतो वस्तूनि सूक्ष्माण्यपि**
स्थौल्यं यान्ति तथा तथा सपदि नस्संयोगहर्षादिव।
पश्चात्तानि यथा यथा बहुतरे दूरे पतन्ति क्षणाद्रूपं
यान्ति तथा तथा कृशतमं विश्लेषदुःखादिव।। ५.७०।।

इत्यादिषु तत्तत्पद्येषु अधोरेखाङ्कितवर्णसमूहस्य आवृत्तेः दर्शनात् यमकालङ्कारस्य उदाहरणानि भवन्ति। एतत्परिशीलनेन यमकप्रयोगे अस्य वेङ्कटाध्वरिणः प्रियत्वं नैपुण्यं च स्पष्टमवगम्यते।।

अस्मिन् श्लेष-यमकालङ्काराध्ययनपरे षष्ठांशे प्रथमम् अलङ्कारस्वरूपनिरूपणम्, पश्चाच्च मम्मट-जयदेवयोः मते श्लेष-यमकालङ्कारयोः लक्षणम्, मम्मटप्रोक्तयमकभेदाः, प्रकृतग्रन्थे श्लेष-यमकनिबन्धनम् इत्येते विषयाः विशदीकृताः ।

अथ कवेः वर्णनावैदुष्यम् विचार्यते।

६. कवेः वर्णनवैदुष्यम्

मायाविनः शम्बरासुरवधानन्तरं प्रद्युम्नो मातलिर्विदूषको मायावती सख्यौ च आकाशमार्गे विमानमधिरूढाः प्रयान्ति। तदा वेङ्कटाध्वरिणा कृतं **तीर्थयात्राप्रकल्पनम्** अस्य नाटककर्तुः यात्रादर्शनप्रीतिं स्फोरयति।

तत्र तीर्थयात्रकल्पने - युद्धदेशात् आरभ्य द्वारकागमनपर्यन्तं यानि पुण्यस्थालानि, क्षेत्राणि वा सन्ति तेषां वर्णनानि साधु कृतानि। तत्र प्रथमं युद्धभूमिवर्णनम्, उद्बोधनसरः प्रभाववर्णनम्, रामसेतुवर्णनम्, ताम्रपर्णीनदीवर्णनम्, आगस्त्याश्रमवर्णनम्, श्रीरङ्गक्षेत्रवर्णनम्, चोलदेशवर्णनम्, पिनाकिनीनदीवर्णनम्, काञ्चीनगरवर्णनम्, शेषाचलस्य (तिरुमलगिरेः) वर्णनम्, गोदावरीवर्णनम्, काशीक्षेत्रवर्णनम्, यमुनानदीवर्णनम् इत्यादिवर्णनानि कविना प्रत्यक्षतया अनुभूतानि इव वर्णितानि। एतेन तत्तद्भौगोलिकांशान् , तत्तत्क्षेत्रमाहात्म्यं च ज्ञातुं प्रभवामः। तत्र अद्यतनकाले रामसेतुः रामेण निर्मितः उत सहजतया प्रादुर्भूतः इत्यादिविषयाणां मूलभूतत्वात् तालपत्रमातृकायां तं सेतुमुद्दिश्य सम्प्रदायवादिनः किं सम्भावयन्ति इति **रामसेतुवर्णनम्**, कवेः आवासस्थलविशेषत्वेन **काञ्चीनगरवर्णनम्** च स्वीकृत्य किञ्चिद्वस्तु परामृश्यते। तत्र —

६.१. सेतुसमुद्रवर्णनम्

आकाशमार्गे देवेन्द्रस्य सारथिना मातलिना चोद्यमाने पुष्पकविमाने द्वारकायाः गमनसमये युद्धवर्णनं, मज्जदुज्जीवनसरो वर्णनम्, उद्बोधनतीर्थवर्णनानन्तरं मायावती दक्षिणतो दत्तचक्षुरुद्ग्रीवं पश्यति। तदा विचक्षणा च मायावत्या इङ्गितं ज्ञात्वा, "भो मातले! ***सेतुबन्धप्रमुखान्*** पुण्यदेशान् द्रष्टुमुत्कण्ठते सखी। तस्मात्तमेव देशं नेतव्यमेतद्विमानम्" इति वदति। मातलिश्च "एवमस्तु" इति विमानं दक्षिणतः सरयं चारयति। तदा प्रद्युम्ने "पुरुहूतसूत! कोऽयं तोयनिधिकृतानुबन्धो बन्धो द्राघीयानक्ष्णोः कन्दळयत्यानन्दम्" इति पृच्छति सति **मातलिः** इत्थं समादधति-

पद्यम्-

तत्तादृग्रामभद्रप्रभुपदकमलन्यासतो धन्यजन्मा
त्रैलोक्यातङ्कलङ्कापुरपतिकुलविध्वंसने कालदण्डः।
जानक्याः प्राणनाडी जलनिधिवपुषश्चारुयज्ञोपवीतं
जीवातुर्जीवलोके गुरुतरदुरितैरातुरे सेतुरेषः।। ५.२२।।

श्रीरामचन्द्रप्रभोः पदकमलन्यासेन प्राप्तधन्यजन्मा अयं **रामसेतुः**, त्रिलोकानाम् आतङ्क-कारिणे लङ्काधिपस्य रावणकुलस्य विध्वंसने तु कालदण्ड एव। जानक्याः प्राणनाडी भवति। जलरूपदेहस्य समुद्रस्य मनोज्ञं यज्ञोपवीतं भवति। सर्वजन्तूनां गुरुतरदुरितजलोपद्रवेषु एष रामसेतुरेव आधारभूतो भवति।

राशेरशेषपयसां परमंहसां च,
सन्तारकाणि सरतामभिपश्यतां च।
धर्मावनाय कुहना मनुजस्य विष्णोः,
कर्माणि पश्यत मुहुः करुणाकृतानि।। ५.२३।।

मातलिना इत्यक्ते सति प्रद्युम्नः प्राञ्जलिस्सचमत्कारं सविस्मयं च —

श्रीमान् पुष्यतु जानकीप्रियतमश्श्रेयांसि भूयांसि नः
पादाम्भोजरजःकणैरपि शिलां प्रागारचय्याबलाम्[4]।
एनां प्लावयतैव येन जलधावश्मप्लवालापिनो[5]
वेदस्याप्यसदर्थवाद इति तन्निर्यापितं दुर्यशः।। ५.२४।।

येन पूर्वं पादाम्भोजरजःकणैरपि शिलाम् अबलात्वेन आरचय्य, इदानीं जलधौ अश्मप्लवनारचनेन वेदस्य यत् दुर्यशः **असदर्थवाद** इति वर्तते तत् एतेन समापितम्, सः जानकीप्रियतमः श्रीरामचन्द्रप्रभुः अस्मभ्यं श्रेयांसि भूयांसि पुष्यतु - इति नमस्करोति।

मातलिश्च प्रद्युम्नं प्रति "आयुष्मन्! किं नाम रामभद्रस्य न विस्मयकरं चरितम् –

मैत्री यस्य निषादयूधपतिना भुक्तिश्शबर्या गृहे
पात्रं त्यक्तकुटुम्बको निशिचरो दाने कुबेरानुजः।
अस्त्रं यस्य तृणं बलं कपिकुलं लङ्कापतेस्सङ्गरे
तस्मिन् विस्मयकारि दिव्यचरिते देवे मनोदीव्यति।। ५.२५।।

पुत्रदारादिपरित्यागपूर्वकं शरणागताय कुबेरानुजाय राक्षसाय विभीषणाय राज्यं दत्तवान्। श्रोत्रियाय दरिद्राय दातव्यं च कुटुम्बिने इत्यादिशास्त्रोल्लङ्घनं च प्रतीयते। निषादयूधपतिना मैत्री कृता। भक्त्या शबर्या दत्तं स्वीकृतम्, लङ्कापतिना प्रचलितसङ्गरे यस्य शत्रोरस्त्रं तृणप्रायं, यस्य बलं कपिकुलं जातं तस्मिन् रामचन्द्रस्य विस्मयकारि दिव्यचिरिते कस्य मनः न रमते।

ततः प्रद्युम्नः प्रियामवेक्ष्य सचमत्कारम् —

सोऽव्याद्यस्य हि धर्मो नाळीकाळीकमोचननिदानम्।
जनको हेतुः प्राप्तावप्यवनीभूवनीभुवोश्चित्रम्।। ५.२६।।

१. यस्य रामस्य धर्मः धनुः बाणस्य मोचने हेतुः। स्वभावः, आळीकस्यावृत्तस्य, त्यागे निमित्तमिति चार्थः। जनकराजः। सीतायाः जनकः, पिता = दशरथः, वनीभुवः = अरण्यभूमेः प्राप्तौ हेतुरिति चार्थः। इति निगदति।

अपि च - **निगदति यजमानं प्रस्तरं नित्यवाणी**
तदिह तु विपरीतं तन्वि! कामं प्रतीमः।
पदकमलपरागैः प्रस्तरं हन्त! पत्नीं
प्रभुरकृत रघूणां भाग्यतः पश्यदङ्घ्रेः।। ५.२७।।

वेदवाक्येन **यजमानः प्रस्तर** इति प्रस्तरस्य स्तुत्यर्थं यजमानत्वमुक्तम्। अत्र तु प्रस्तरं पत्नीम् अकृतेति वैपरीत्यम्। रघूणां प्रभुः श्रीरामचन्द्रः स्वपदकमलपरागैः अङ्घ्रिणा शिलां गौतमस्य पत्नीमहल्यामकृतेति वास्तवार्थः।

मायावती रामचन्द्रेण विनिर्मितं रामसेतुं सप्रश्रयं नमस्करोति। सख्यावनुनमस्कुरुतः।

ततः ताम्रपर्णीनदीवर्णनं चलति। सुदीर्घगद्येन कलशसम्भवस्य तपोवनं, श्रीरङ्गधाम, कावेरीनदीं च वर्णयति। अथ काञ्चीनगरवर्णनम् अन्येन सुदीर्घगद्येन करोति तत्पश्यामः।

६.२. काञ्चीनगरवर्णनम्

मायावती महेन्द्रसारथिं प्रति "का सा इह नगरी ? मनोरमनदीकूले वेदजडत्वविनिर्मुक्तेनेव ब्रह्मणा निर्मिताऽस्माकमक्ष्णां कल्याणमातनोति" इति पृच्छति। मातलिश्च इत्थं श्रावयति -

गद्यम्- "इयं किल नियतमपङ्किलवेगवती पृथुकूलदुकूलायितद्युतिविततिविबुधतटिनी प्रभवहिमाचलायमानानां स्फटिकसौधावसधानामभिजातेषु वातायनेषु अविरतसुरतपरितापभरहरणाय समर्पितेन मुखचन्द्रमसा हतसन्तमसाभिः अभूषितत्वदोषमपनेतुमिव भुवमवतीर्णवतीभिरमर-युवतीभिः नीरदसङ्गतावरोचकतया विहाय विहायसमिहागताभिरिव विद्युल्लताभिः ... ... कान्ताराधिकाभिः नवयौवनदीप्रमदाभिः प्रमदाभिरमरावतीमुपहसन्ती प्रतिसदनमुत्सवेषु

समवेताभिर्वारसारसलोचनाभिः प्रपञ्चीकृतविपञ्चीरुतसमञ्चिता ***काञ्ची*** नाम नगरी।।" इति। सम्पूर्णगद्यास्वादः सम्पादिताध्यायादेव लब्धव्यः।

अथ प्रद्युम्नः विभाव्य सश्लाघं मायावतीं प्रति "देवि! कामम् अन्वर्थमेवास्याः **काञ्ची**त्यभिधानम्। पश्य-

श्रुतिमञ्जुनादनिचयैरभिरामा, सवलग्ननाभिजघनद्युतिहेतुः।
सतताभिरूपवरदारमणीभिः, परिभूषिता विजयते शुभकाञ्ची।। ५. ४७।।

वेदानां, ये मनोज्ञाः उदात्तानुदात्तादिशब्दाः तेषां च समूहैः रम्या इयं काञ्चीनगरी। अस्याः काञ्च्याः घनद्युतेः - श्रेयोहर्षजन्याधिककान्तिविशेषस्य, सवे - यज्ञे, लग्नः - संसक्तः, नाभिजः - चतुर्मुखः एव हेतुः। एवं श्रुतिमञ्जुघोषसमूहैः मनोज्ञा, नित्ययज्ञहेतुभिः सदा मनोज्ञः स्वामी वरदराजः। तस्य रमणीयाः पराः गुणश्रेष्ठाश्च, पत्न्यः मणय इव ताभिः परिभूषिता श्रेष्ठा, काञ्चीनगरी विजयत इति श्लेषमहिम्ना इत्येकः प्रकृतार्थः।

श्रोत्रयोः ये रम्याः ध्वन्यात्मकशब्दाः एतेषां च समूहैः रम्या इयं काञ्चीनगरी। वलग्न-सहितस्य नाभिजघनस्य द्युतेः हेतुः। रमणीभिः स्त्रीभिः परिभूषिता सततमभिरूपाः पत्न्यः मणय इव विराजन्ते। ताभिः परिभूषिता शुभा काञ्चीनगरी विजयत इति अपरः प्रकृतार्थः। अत्र द्वयोश्च प्रकृतत्वं वर्ण्यमानैककाञ्चीपुरसम्बन्धित्वेन।

प्रद्युम्नः नगरं समन्तादवलोक्य सविस्मयं मायावत्या "नळिनाक्षि! नगरमिदं खलु शृङ्गारशान्तयोः समावेशायतनम्।" इति प्रदर्शयन् श्रावयति —

पद्यम्- **क्रीडासौधविटङ्कसङ्गतिजुषः केचिद्विहङ्गार्भकाः**
कात्स्न्र्येनानुवदन्ति पक्ष्मलदृशां कामाक्षराणि स्वयम्।
शास्त्राणि क्वचिदीरयन्ति शिशवश्शास्त्राशय[1]व्याक्रिया
साक्षिण्यश्च विवृण्वते प्रति गृहं शारीरकं शारिकाः।। ५.४८।।

शरीरे भवः शारीर आत्मा तमधिकृत्य प्रवृत्तं शास्त्रं **शारीरकं** = वेदान्तशास्त्रम्। इति द्वन्द्वोक्त्या वक्ति।

अथ मायावत्या प्रद्युम्नं प्रति "आर्यपुत्रात्र खलु रोषेण ब्रह्मयागकर्मणो विघातं कर्तुकामा सरस्वती नदीरूपं कृत्वा समागतेति श्रूयते इतिहासः।" इति प्रश्ने कृते — प्रद्युम्नः शृणु देवि! तादात्त्विकं देवस्य कमलागृहमेधिनः करुणावरुणालयस्य शरणागतवात्सल्यम्-

पद्यम्- **अम्भो वेगादध्वरविघ्नोदयभीत्या**
देवे खिन्ने पद्मभवे दीनदयाळुः।
सेतोर्बन्धे हन्त! विलम्बो भवितेति
क्षिप्रं सेतुस्सेतुकृदेव स्वयमासीत्।। ५.४९।।

इत्यादिना काञ्चीं वर्णयति। तत्रस्थहस्तिगिरिं मातलिः इत्थं वर्णयति —

भेत्ता गोप्ता च हरिर्महानासवजुषो हिरण्यगर्भस्य।
भयकृदिभस्याभयकृन्मूलाञ्चलयोश्चकास्ति हस्तिगिरेः।। ५.५१।।

महानासवो मद्यं तज्जुषस्तत्पायिनः हिरण्यकशिपोः दैत्यस्य विदारकः, गजस्य भयकृत् सिंहः हरिः नृहरिः हस्तिगिरेः मूलाञ्चले चकास्ति इत्येकः प्रकृतार्थः। महायागकर्तुः हिरण्यगर्भस्य (चतुर्मुखस्य) पालकः, गजेन्द्रस्य अभयकृत् ग्राहभीतिनिवारको हरिः करीन्द्रवरदः हस्तिगिरेरग्रे चकास्ति -इत्यपरः प्रकृतार्थः। उभयश्लेषः।

ततः मातलिः वेगेन विमानमुत्तरतः प्रस्थापयति।

एवम् नाटकेऽस्मिन् वेङ्कटाध्वरिणा कृताः वर्णनाः नाटककथायाः रसस्य वा औचित्यभङ्गं विना स्वकल्पनाचातुर्येण सहृदयं रञ्जयन्ति – इति सेतुवर्णन-काञ्चीनगरवर्णनद्वारा अवगम्यते।

अथ पाठभेदानां तुलनात्मकम् अध्ययनम् विधास्यते।

।। श्रीः ।।

८. छन्दोऽध्ययनम्

❊ छन्दोवैशिष्ट्यम्

शिवेतरक्षतिजनकं काव्यं दृश्यश्रव्यत्वभेदेन द्विधा विभज्यते। तत्र पुनः श्रव्यं पद्य-गद्य-चम्पू भेदेन त्रिधा विभक्तं विद्यते। तेषु पद्यकाव्यस्यास्ति सुमहद् वैशिष्ट्यम्। यतोऽहि वेदादारभ्य स्मृतीतिहास-पुराण-काव्य-नाटकादीनि सर्वाणि पद्येषु एव विलसन्ति। **"श्लोकः"** इत्यपि पद्यस्य नामान्तरं विद्यते। संस्कृतावाङ्मये विलसन्तः सर्वेऽपि श्लोकाः छन्दोबद्धाः एव भवन्ति। छन्दोविहीनः श्लोकः कुत्रापि न दृश्यते एव, यदि तथा तर्हि तद्वचनकाव्यमेव स्यात्। एवं च छन्दोबद्धानि पद्यकाव्यानि रागयुक्तानि भूत्वा सहृदयान् रञ्जयन्तीत्यत्र नास्ति कस्यापि विप्रतिपत्तिः। नाटके च तस्य आधिक्यं द्योत्यते। वाल्मीकिमहर्षेः मुखकमलात् सहसा करुणरसभरितः शोकः श्लोकत्वेन उद्भूतः। तद्यथा -

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। इति।

छन्दश्शास्त्रस्य परिचायकग्रन्थेषु छन्दोविचितिः, छन्दोऽनुशासनम्, छन्दोविवृति तथा छन्दोमानम् पाणिनीयशिक्षा इत्यादिषु छन्दसः महत्त्वं प्रतिपादितम्। **छन्दः पादौ तु वेदस्य** वेदस्य चरणस्थानीयं नाम मूलभूतं भवति छन्दश्शास्त्रम्। वेदे सप्तछन्दसां प्रयोगः लभ्यते। लौकिकसाहित्ये तु छन्दसां संख्या अपरिमिता।

सम्प्रति उपलभ्यमानछन्दोग्रन्थेषु पिङ्गलचार्यकृतं छन्दःसूत्रम् सर्वप्राचीनम् वर्तते। अस्य ग्रन्थस्य मौलिकतायाः कारणेन प्राचीन-नवीनविद्वासः बहवः विषयसारल्याय टीका अपि अरचयन्। छन्दःसूत्र-ग्रन्थानन्तरकालिकछन्दोग्रन्थानां सर्वेषां प्रायशः छन्दःसूत्रम् एव उपजीव्यग्रन्थः इति वक्तुं शक्यते। यद्यपि पिङ्गलाचार्यात् परं छन्दःपरिचायकग्रन्थरचना जाता तथापि श्रीकेदारभट्टविरचितस्य **वृत्तरत्नाकरस्य** अत्यन्तप्रसिद्धिः विद्यते। अस्य वैशिष्ट्यं किमित्युक्ते पिङ्गलछन्दस्सूत्रवत् अस्य रचना न जाता, अपि तु स्वोक्तलक्षणानां छन्दोबद्धत्वं तानि लक्षणानि एव उदाहरणानि इत्यतः अस्य संस्मरणे सौलभ्यं वर्तते पाठकजनेषु। प्राचीनेषु १४ टीकासु

नारायणीटीका ज्ञानवर्द्धनदृष्ट्या अत्यन्तोपयोगी इति विज्ञायते। विद्वत्समाजे अन्याः ग्रन्थाः अपि आद्रियन्ते ते च - कालिदासकृतः श्रुतबोधः, हेमचन्द्रकृतं छन्दोऽनुशासनम्, आचार्य-क्षेमेन्द्रकृता सुवृत्ततिलका, गङ्गादासकृता छन्दोमञ्जरी इत्यादयः।

❊ छन्दोनिर्वचनम्

छन्दांसि- **'छन्दयति आह्लादयतीति छन्दः'** अमरकोशबलात् छन्दसामाह्लादकरत्व-मभ्युपगम्यते। वस्तुतः वेदाङ्गेषु छन्दसां माहात्म्यं विस्तरेण प्रतिपादितमस्ति। अतोऽत्र तस्य प्रस्तावः न क्रियते। छन्दसः वृत्तम् इति पर्यायः। प्रायः सर्वेऽपि कविश्रेष्ठाः श्लोकरचनायामासक्ताः सन्तः छन्दोबद्धानि काव्यानि विरच्य सहृदयलोकमतोषयन्। तादृशे पथि **प्रद्युम्नानन्दीयम्** नाम नाटकमपि कविना श्रीमद्वेङ्कटाध्वरिणा प्रणीतं विद्योतते। एवं प्रद्युम्नानन्दीयछन्दोऽ-ध्ययनव्याजेन छन्दश्शास्त्रस्य कञ्चित् लघुपरिचयः अनुसन्धात्रे भवतु इति धिया विस्तृतम् अध्ययनं विहितम्।

❊ छन्दसः प्रयोजनम्

१. छन्दसि गानेन मङ्गलध्वनिरुत्पद्यते। तेन अमङ्गलनाशः सम्भवति।

२. छन्दोबद्धश्लोकश्रवणेन आह्लादः जायते।

३. छन्दसि श्लोकप्रणयनेन श्लोकः नष्टो न भवति, अपि तु संरक्षितो भवति।

४. छन्दः कवेः रचनाचातुर्यं प्रकटयति।

५. छन्दोज्ञानं काव्यगतरमणीयार्थास्वादने सहकरोति।

❊ केदारभट्टवृत्तरत्नकरस्य सङ्क्षिप्तपरिचयः :-

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।
मात्रा-वर्णविभागेन छन्दस्तदिह कथ्यते।। ४।।

पिङ्गल-भाष्यकारादयः लौकिकछन्दः १. मात्राछन्दः २. वर्णछन्दः इति द्विधा प्रतिपादितम्।

१. मात्राछन्दः नाम मात्रायाः संख्यामनुसृत्य श्लोकरचनां कुर्वन्ति तद्यथा- आर्या-उपगीति इत्यादयः।

२. वर्णछन्दः, यस्मिन् वर्णसंख्यामनुसृत्य श्लोकरचना भवति तद्यथा- अनुष्टुप्-इन्द्रवज्रादयः। लौकिकछन्दः काव्यादिषु अधिकप्रयोगः। वैदिकछन्दः तु गायत्र्यादिछन्दः वेदे प्रयोगाधिक्यम्।।

१. मात्राछन्दः

❁ १. आर्या ❁

मात्राछन्दसि आर्या प्रसिद्धं छन्दः वर्तते। प्राकृतेऽपि आर्या इव छन्दः भवति यस्य छन्दसः नाम गाथा विद्यते। केचन विद्वांसः गाथा एव प्राचीनं छन्दः, तमेतं संस्कृतभाषायामानीय आर्या इति नाम करणं विहितम् इति मन्यन्ते। **गोवर्धनाचार्यः** आर्याछन्दसः प्रयोगे नितान्तं प्रसिद्धः।

लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः।। २.१।।[1]

प्रथमपादे - १२ वर्णाः, द्वितीयपादे - १८ वर्णाः भवेयुः।

मात्रावृत्तेषु प्रथमम् आर्याछन्दः भवति। आर्यायाः पूर्वार्धे निश्चयेन एतत् लक्षणं भवति तत् एकेन गुरुणा संयुक्ताः सप्तसंख्याकाः गणाः चतुष्कला भवन्ति। अत्र गणाः चतुष्कला एव गृह्यन्ते आर्यायाः मात्रावृत्तत्वात् इति अवगन्तव्यम्। इत्थम् आर्यायाः पूर्वार्धे (7 x 4 = 28 + 2 = 30)त्रिंशन्मात्रा भवन्ति। तत्रापि प्रथमे पादे द्वादश (१२) मात्राः द्वितीये च (१८) अष्टादश मात्राः भवन्ति। सप्तगणेषु आर्यायाः पूर्वार्धे विषमे अर्थात् प्रथम-तृतीय-पञ्चम-सप्तमस्थाने जः (।ऽ।) न भवति। समगणेषु अर्थात् द्वितीय-चतुर्थ-षष्ठस्थानेषु यथेष्टं स्थापनीयाः न तु विषमे इति भावः। मात्रावृत्तेषु आर्यायाः षष्ठः मात्रागणः **नलघू** भवेत् नाम नश्च लघुश्च - नलघू इति। नगणः लघुश्च (न-।।। लघुः।) भवेत् अर्थात् चत्वारो लघवो भवन्ति। अथवा जगणः (।ऽ।) भवेत् - इति आर्यायाः पूर्वार्धस्य लक्षणम्।।

१ गणः	२ गणः	३ गणः	४ गणः	५ गणः	६ गणः	७ गणः	गुरुः
ऽ।।	।ऽ।	ऽऽ	।।।।	ऽऽ	।ऽ।	ऽऽ	ऽ
हन्त वि	**रहः स**	**मन्तात्,**	**ज्वलयति**	**दुर्वा**	**रतीव्र-**	**संवे**	**गः।**
।।ऽ	।।।।	ऽ।।	।ऽ।	ऽऽ	।	ऽ।।	।
अरुण	**स्तपनशि**	**लामिव,**	**पुनर्न**	**मां भ**	**स्म**	**तां नय**	**ति।।**

1. वृ.र. पृ. १६

गोवर्धनाचार्यस्य आर्यासप्तशत्याः ६९१ तम आर्यावृत्तस्थश्लोकः। तत्र आर्यायाः समन्वयः इत्थम्-

१. अस्याः पूर्वार्धे सप्तमात्रागणाः सन्ति। तथा अन्ते गुरुः वर्तते।

२. प्रथमपादः तृतीये मात्रागणे समाप्यते। तत्र च द्वादश (१२) मात्राः एव सन्ति।

३. तृतीये पादे (१८) अष्टादशमात्राः सन्ति।

४. विषममात्रागणेषु (प्रथम-तृतीय-पञ्चमगणेषु) जगणः (।ऽ।) नास्ति .

तत्र विषमेषु मात्रागणेषु **जगणः** न भवेत् इति नियमः। तन्नियमानुसारं प्रथमः गणः आदिगुरुः (ऽ।।), तृतीयः सर्वगुरुगणः (ऽऽ) पञ्चमः, सप्तमश्च सर्वगुरुगण एव। अतः नियमानुसारं विषमगणेषु जगणः नास्ति। समस्थानेषु (द्वितीय-चतुर्थ-षष्ठगणेषु) जगणः वर्तते। अतः इयम् आर्या षष्ठं स्थानं जगणयुक्ता वर्तते।

षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः।। २.२।।[1]

अधुना आर्यायां यतिनियमं वर्णयति - यतिः पदविरामः भवति। आर्याछन्दसि कुत्र कुत्र पदविरामस्य त्रयः नियमाः अत्र दीयन्ते - १. आर्यायाः पूर्वार्धे षष्ठस्थाने (न-लघू -।।।।) चतुर्लघौ गणे कृते सति द्वितीयलात् पूर्वमेव विरामः नाम यतिः भवति।

२. यदि षष्ठस्थानात् परम् अर्थात् सप्तमे स्थाने (न्ल) न-लगणौ भवतः तर्हि प्रथमलघ्वोः पूर्वस्मिन् पदे यतिः भवति। अर्थात् षष्ठगणस्य अन्तिमे यतिः इति।

३. यदि उत्तरार्धस्य पञ्चमगणस्थाने न-लघू भवतः तत्रापि प्रथमलघ्वोः पूर्वमेव यतिः भवति।

एवं यति नियमानामनन्तरम् आर्यायाः उत्तरार्धस्य लक्षणं वक्ति - **इह भवति षष्ठो लघुः** इति। अर्थात् पूर्वार्ध इव उत्तरार्धेऽपि सप्तगणाः अन्ते एकः गुरुः भवति। पूर्वार्ध-उत्तरार्धयोः अयमेव भेदः अस्ति यत् - पूर्वार्धे षष्ठगणस्थाने न-लघू (।।।।) चत्वारः लघुवर्णाः भवन्ति। उत्तरार्धे तु षष्ठगणस्थाने केवलम् एक एव लघुः भवति।

एवं च पूर्वार्धे ३० मात्राः भवन्ति। उत्तरार्धे तु २७ मात्राः एव भवन्ति।

1. वृ.र. पृ. १७

छन्दोमञ्जरीतः पूर्वोक्तनियमानुसारम् एकम् उदाहरणम् -

१ गणः	२ गणः	३ गणः	४ गणः	५ गणः	६ गणः	७ गणः	गुरुः
ऽऽ	।ऽ।	ऽऽ	ऽऽ	।।ऽ	।।।।	।।ऽ	ऽ
वृन्दा	**वने स**	**लीलं**	**वल्गु**	**द्रुमका**	**ण्डनिहित**	**तनुय**	**ष्टिः। = 30**
ऽ।।	ऽ।।	ऽऽ	ऽऽ	।।।।	।	ऽऽ	ऽ
स्मेरमु	**खार्पित**	**वेणुः**	**कृष्णो**	**यदि मन**	**सि**	**कः स्व**	**र्गः।। = 27**

आर्यायाः सरलतरं लक्षणं श्रुतबोधे समुपलभ्यते तद्यथा-

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।।[1] इति।

त्रिंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।
पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन।। ३।।[2]

अत्र आर्यायाः प्रधानभेदः कथ्यते - यस्याः आर्यायाः पूर्व-उत्तरार्धयोः आद्येषु त्रिषु गणेषु पादः दृश्यते तस्याः नाम पिङ्गलाचार्येण **पथ्या** इति प्रकीर्तितम्। यस्याम् आर्यायां द्वादशमात्रात्मकौ प्रथम-तृतीयौ पादौ भवतः सा पथ्या इत्यभिधीयते। यथा छन्दोमञ्जर्याम् -

१ गणः	२ गणः	३ गणः	४ गणः	५ गणः	६ गणः	७ गणः	गुरुः
।।।।	।।ऽ	।। ऽ	ऽ।।	ऽऽ	। ऽ।	ऽऽ	ऽ
जयजय	**जगदी**	**श विभो,**	**केशव**	**कंसा**	**न्त माध**	**वान**	**न्त।**
।।।।	ऽ।।।।ऽ		ऽऽ	।। ऽ	।	ऽऽ	ऽ
कुरु करु	**णामिति भणितिः,**		**पथ्या**	**भवरो**	**ग**	**दुःस्था**	**नाम्।।**

आर्यायाः भेदाः हलायुधः सङ्क्षेपेण एकेनैव श्लोकेन कथयति -

एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः।।[3] इति।

अपि च **विपुला, चपला, मुखचपला, जघनचपला,** इति **आर्यायाः** प्रधानभेदाः।

तत्र विपुलायां - १. मुखविपुला, २. जघनविपुला, ३. उभयविपुला इति।

चपलायां च - मुखचपला, जघनचपला, महाचपला इति भेदाः सन्ति।

1. वृ.र. पृ. १८, २०   2. वृ.र. पृ. २०   3. वृ.र. पृ. २३

इत्थं षोडश भेदाः आर्यायाः -

१. पथ्या	२. मुखविपुला	३. जघनविपुला
४. उभयविपुला	५. मुखचपलापथ्या	६. मुखचपलामुखविपुला,
७. मुखचपलाजघनविपुला	८. मुखचपलोभयविपुला	९. जघनचपलापथ्या
१०. जघनचपलामुखविपुला	११. जघनचपलाजघनविपुला	१२. जघनचपलोभयविपुला,
१३. महाचपलापथ्या	१४. महाचपलामुखविपुला	१५. महाचपलाजघनविपुला
१६. महाचपलोभयविपुला - चेति।		

❁ २. गीतिप्रकरणम् ❁

अपि च मात्राच्छन्दसि गीतिप्रकरणे १. गीतिः, २. उपगीतिः, ३. उद्गीति, ४. आर्यागीतिः इति चतुर्विधभिदाः प्रोक्ताः। तत्र गीतेः उपभेदान् इत्थं वर्णयति हलायुधः -

गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकारं स्यात्।
साकल्येनार्याणामशीतिरेवं विकल्पाः स्युः।। २.८।।[1] इति।

❁ ३. वैतालीयप्रकरणम् ❁

वैतालीयप्रकरणे एते वृत्तभेदाः विलसन्ति। तद्यथा -

१. वैतालीयम् :- विषमपादे - १४ मात्राः, समपादे १६ मात्राः भवन्ति।

२. औपच्छन्दसिकम् :- विषमपादे - १६ मात्राः, समपादे १८ मात्राः भवन्ति।

३. आपातलिका, ४. दक्षिणान्तिका ५. उदीच्यवृत्तिः ६. प्राच्यवृत्तिः ७. प्रवृत्तकम् ८. अपरान्तिका ९. चारुहासिनी - इति।

❁ ४. वक्त्रप्रकरणम् ❁

वक्त्रप्रकरणे एते वृत्तभेदाः विलसन्ति। तद्यथा - १. वक्त्रम्, २. पथ्यावक्त्रम् ३. विपरीतपथ्यावक्त्रम् ४. चपलावक्त्रम् ५. युग्मविपुलावृत्तम् ६. भविपुलावृत्तम् ७. रविपुलावृत्तम् ८. नविपुलावृत्तम् ९. तविपुलावृत्तम् - इति।

---

1. वृ.र. पृ. २४

अथ मात्रासमप्रकरणम्

अस्मिन् मात्रासमप्रकरणे च एते भेदाः दृग्गोचरताम् आयान्ति। तद्यथा - १. अलचधृतिः २. मात्रासमकम् ३. विश्लोकः ४. वानवासिका ५. चित्रा ६. उपचित्रा ७. पादाकुलकम् - इति।

वृत्तैरेतैरतिरच्य - १. शिखावृत्तम् २. खञ्जावृत्तम् ३. अनङ्गक्रीडावृत्तम् ४. रुचिरा (चूलिका) वृत्तम् इत्यादि दृष्टिपथमायान्ति। इति मात्राछन्दः समाप्तः।।

२. वर्णच्छन्दः

२.१. समवृत्तप्रकरणम्

समवृत्तभेदाः - एकाक्षरपादात् आरभ्य एकैकस्य अक्षरस्य प्रत्येकस्मिन् पादे वर्धनेन षड्विंशति-संख्याकं प्रति गतं भवति तत्तद्भिन्नभिन्नछन्दसां निर्माणं भवति। एवं समवृत्ते २६ भेदाः भवन्ति। प्रथमप्रकारे पादे केवलं एकः एव वर्णः भवति।

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः।
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः।। १.१८।।[1]

षड्विंशत्यक्षरात्मकवृत्तात् ऊर्ध्वं सप्तविंशत्याद्यक्षरपादा यदि भवन्ति तदा ते **दण्डकाः** परिकीर्तिताः भवन्ति। तस्य भेदाः तद्यथा - चण्ड-वृष्टि-अर्णव इत्याद्यभिधानाः। दण्डकवृत्तेषु पादेषु एकैकाक्षरस्य वृद्धिः न भवति, अपि तु गणस्य वृद्धिः भवति। एभ्यः वृत्तेभ्यः शेषवृत्ताः त्रिभिः, षड्भिः, दशभिः पादैः उपलक्षिताः **गाथाः** भवन्ति।

अत्र पूर्वोक्तनामेकाक्षरपादादारभ्य २६ अक्षरपादानां छन्दसां सामान्यतो याः जातिसंज्ञाः भवन्ति

1. वृ.र. पृ. १३

वर्णाः	छन्दः नाम	वर्णाः	छन्दः नाम	वर्णाः	छन्दः नाम
१.	उक्ता	२.	अत्युक्ता	३.	मध्या
४.	प्रतिष्ठा	५.	सुप्रतिष्ठा	६.	गायत्री
७.	उष्णिम्	८.	अनुष्टुप्	९.	बृहती
१०.	पङ्क्तिः	११.	त्रिष्टुप्	१२.	जगती
१३.	अतिजगती	१४.	शक्वरी	१५.	अतिशक्वरी
१६.	अष्टिः	१७.	अत्यष्टिः	१८.	वृत्तिः
१९.	अतिधृतिः	२०.	कृतिः	२१.	प्रकृतिः
२२.	आकृतिः	२३.	विकृतिः	२४.	संकृतिः
२५.	अतिकृतिः	२६.	उत्कृतिः - इति।		

❁ १. उक्ता (१) ❁

१. उक्ता :- गुः श्रीः। (ग)

एकम् अक्षरम् एकः पादः भवति। चतुर्षु पादेषु अपि एकैकगुरुवर्णः भवति। तदा श्रीवृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

ग	ग	ग	ग
ऽ	ऽ	ऽ	ऽ
वि—	**ष्णुं —**	**व —**	**न्दे।**

❁ २. स्त्री (२) ❁

१. स्त्री :- गौ स्त्री।। २।। (ग-ग)

द्वौ गुरु यदि पादे भवतः तदा **स्त्री** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

ग-ग	ग-ग	ग-ग	ग-ग
ऽऽ	ऽऽ	ऽऽ	ऽ
गोप	**स्त्रीभिः।**	**कृष्णो**	**रेमे।**

❁ ३. मध्या (३ वर्णाः) ❁

१. नारी :- मो नारी। (म-गणः)

यदि पादे मगणः भवति तर्हि तादृश**मध्या**जातिवृत्तस्य **नारी** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

म-गणः	म	म	म
ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ
गोपानां	**नीरीभिः।**	**श्लिष्टोऽव्यात्**	**कृष्णो वः।।**

२. मृगी :- रो मृगी। (र-गणः)

यदि पादे रगणः भवति तर्हि तादृश**मध्या**जातिवृत्तस्य **मृगी** नाम वृत्तं भवति। यथा छन्दोमञ्जर्याम्-

र-गणः	र	र	र
ऽ। ऽ	ऽ। ऽ	ऽ। ऽ	ऽ। ऽ
सा मृगी	**लोचना।**	**राधिका**	**श्रीपतेः।।**

❁ ४. प्रतिष्ठा (४ वर्णाः) ❁

१. कन्या :- म्गौ चेत् कन्या। (म-ग)।

यदि पादे मगण-गुरू चेत् तदा **कन्या** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

म-गणः ग	म-ग	म-ग	म-ग
ऽऽऽ - ऽ	ऽऽऽ - ऽ	ऽऽऽ - ऽ	ऽऽऽ - ऽ
भास्वत्कन्या	**सैका धन्या।**	**यस्याः कूले**	**कृष्णोऽखेलत्।।**

❁ ५. सुप्रतिष्ठा (५ वर्णाः) ❁

१. पङ्क्तिः :- भ्गौ गिति पङ्क्तिः।। (भ-ग.ग)।

यदि पादे भ-गणः अनन्तरं गुरू भवतः तर्हि **पङ्क्तिः** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

भ-ग.ग	भ-ग.ग	भ-ग.ग	भ-ग.ग
ऽ।। -ऽऽ	ऽ।। -ऽऽ	ऽ।। -ऽऽ	ऽ।। -ऽऽ
कृष्णसनाथा	**तर्णकपंक्तिः।**	**यामुनकच्छे**	**चारु चचार।**

❁ ६. गायत्री (६ वर्णाः) ❁

१. तनुमध्या :- त्यौ स्तस्तनुमध्या। (त-य)

यदि पादे त-यगणौ भवतः तर्हि **तनुमध्या** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

त	य	त	य	त	य	त	य
ऽऽ।	।ऽऽ	ऽऽ।	।ऽऽ	ऽऽ।	।ऽऽ	ऽऽ।	।ऽऽ
तेन प्र	**विभक्ता**	**कामं व**	**यसा सा।**	**तेन प्र**	**विलासं**	**धत्ते त**	**नुमध्या।।**

२. शशिवदना न्यौ। (न-य)

यदि पादे न-यगणौ भवतः तर्हि **शशिवदना** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

न	य	त	य	त	य	त	य
।।।	।ऽऽ	।।।	।ऽऽ	।।।	।ऽऽ	।।।	।ऽऽ
शशिव	**दनानां**	**व्रज त**	**रुणीनाम्।**	**अधर**	**सुधोर्मिं**	**मधुरि**	**पुरैच्छत्।।**

३. विद्युल्लेखा :- विद्युल्लेखा मो मः। (म-म)

यदि पादे म-मगणौ भवतः तर्हि **विद्युल्लेख** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

म	म	म	म	म	म	म	म
ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽ
गोपस्त्री	**णां मुख्या।**	**विद्युल्ले**	**खा रूपा।।**	**कालिन्दी**	**तीरे सा।**	**रेमे श्री**	**कृष्णेन।।**

४. वसुमती :- त्सौ चेद्वसुमती। (त-स)।

यदि पादे त-सगणौ भवतः तर्हि **वसुमती** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

त	स	त	स	त	स	त	स
ऽऽ।	।।ऽ	ऽऽ।	।।ऽ	ऽऽ।	।।ऽ	ऽऽ।	।।ऽ
राजीव	**नयना,**	**नूनं व**	**सुमती।**	**रामा भ**	**वति सा**	**नूनं व**	**सुमती।।**

❁ ७. उष्णिक् (७ वर्णाः) ❁

१. मदलेखा :- म्सौ गः मदलेखा। (म-स-ग)।

यदि पादे म-सगणौ ततः गुरुः भवति तर्हि **मदलेखा** नाम वृत्तं भवति। तद्यथा छन्दोमञ्जर्याम्-

म	स	ग.	म	स	ग.
ऽऽऽ	।।ऽ	ऽ	ऽऽऽ	।।ऽ	ऽ
रङ्गे बा	**हुविरु**	**ग्णात्,**	**दन्तीन्द्रा**	**न्मदले**	**खा।**
लग्नाभू	**न्मुरश**	**त्रौ,**	**कस्तूरी**	**रसच**	**र्चा।।**

❁ ८. अनुष्टुप् (८ वर्णाः) ❁

१. चित्रपदा :- भौ गिति चित्रपदा गः। (भ-भ-ग.ग)।

यदि पादे भ-भगणौ ततः गुरुद्वयं भवति तर्हि **चित्रपदा** नाम वृत्तं भवति। तं वृत्तं च अनुष्टुप् जातीयम् इत्यभिधीयते। अत्र नाना वृत्तानि सन्ति। तद्यथा छन्दोवृत्तौ-

भ	भ	ग.ग	भ	भ	ग.ग
ऽ।।	ऽ।।	ऽऽ	ऽ।।	ऽ।।	ऽऽ
यस्य मु	**खे प्रिय**	**वाणी,**	**चेतसि**	**सज्जन**	**ती च।**
चित्रप	**दाऽपि च**	**लक्ष्मी,**	**स्तं पुरु**	**षं न ज**	**हाति।।**

२. विद्युन्माला :- मो मो गो गो विद्युन्माला।। १३।।

यदि पादे म-मगणौ ततः गुरुद्वयं भवति तर्हि **विद्युन्माला** नाम अनुष्टुप् जातेः वृत्तं भवति। चतुर्भिश्च यतिः भवति। तद्यथा सुवृत्ततिलके -

म	म	ग.ग	म	म	ग.ग
ऽऽऽ	ऽऽऽ	ऽऽ	ऽऽऽ	ऽऽऽ	ऽऽ
मौनं ध्या	**नं भूमौ**	**शय्या,**	**गुर्वी त**	**स्याः कामा**	**वस्था।**
मेघोत्स	**ङ्गे नृत्ता**	**सङ्गा,**	**यस्मिन् का**	**ले विद्यु**	**न्माला।।**

३. माणवकम् :- माणवकं भात्तलगाः। (भ-त-ल.ग)।

यदि पादे भ-तगणौ ततः लघुः गुरुः च भवति तर्हि **माणवकं** नाम अनुष्टुप् जातेः वृत्तं भवति। चतुर्भिश्च यतिः भवति। पिङ्गलशास्त्रे इदं माणवकाक्रीडितम् इति नाम्ना प्रसिद्धम्। तद्यथा-

भ	त	ल.ग	भ	त	ल.ग
ऽ।।	ऽऽ।	।ऽ	ऽ।।	ऽऽ।	।ऽ
माणव	**काक्रीडि**	**तकं,**	**यः कुरु**	**ते वृद्ध**	**वयाः।**
हास्यम	**सौ याति**	**जने,**	**भिक्षुरि**	**व स्त्रीच**	**पलः।।**

४. समानिका :- र्जौ समानिका गलौ च।। १६।। (ज-र-ग.ल)।

यदि पादे ज-रगणौ ततः गुरुः लघुः च भवति तर्हि **समानिका** नाम अनुष्टुप् जातेः वृत्तं भवति। समान्येव समानिका। समानी इत्यपि व्यवहारः। तद्यथा छन्दोमञ्जर्याम् -

ज	र	ग.ल	ज	र	ग.ल
।ऽ।	ऽ।ऽ	ऽ।	।ऽ।	ऽ।ऽ	ऽ।
यस्य कृ	**ष्णपाद**	**पद्म,**	**मस्ति हृ**	**त्तडाग**	**सद्म।**
धीः समा	**निका प**	**रेण,**	**नोचिता**	**ऽत्र मत्स**	**रेण।।**

५. प्रमाणिका :- प्रमाणिका जरौ लगौ।। १७।। (ज-र-ल.ग)।

यदि पादे ज-रगणौ ततः लघुः गुरुः च भवति तर्हि **प्रमाणिका** नाम अनुष्टुप् जातेः वृत्तं भवति। प्रमाण्येव प्रमाणिका। प्रमाणी इत्यपि व्यवहारः। अनुष्टुपि प्रमाणी, समानी वृत्ताभ्यां भिन्नानां वृत्तानां वितानम् इति सामान्येन व्यवहारः। नारायणभट्टः वृत्तरत्नाकरस्य स्वटीयाम् अस्य वितानवृत्तस्य गुरु-लघुविचारः कृतवान्। सुवृत्ततिलके तद्यथा -

ज	र	ल.ग	ज	र	ल.ग
।ऽ।	ऽ।ऽ	।ऽ	।ऽ।	ऽ।ऽ	।ऽ
लघु श्रु	**तं मदो**	**द्धतं,**	**गुरु श्र**	**माय के**	**वलम्।**
न यत्प	**रोपका**	**रकृद्,**	**वृथैव**	**तत्प्रमा**	**ण्यपि।।**

महाकविना क्षेमेन्द्रेण स्व सुवृत्ततिलके अनुष्टुप् छन्दसः विषये मनोरञ्जककथनानि वर्णितानि।

☼ अनुष्टुप् समान्यलक्षणम् :-

चतुर्षु पादेषु पञ्चमाक्षरं लघुर्भवति। षष्ठमाक्षरं सर्वत्र गुरुर्भवति। द्वितीय-चतुर्थपादयोः सप्तमाक्षरं लघुर्भवति। एतत् वृत्तम् **अनुष्टुप्** इति उक्ता। अस्यैव वृत्तस्य **श्लोक** इति **पद्यम्** च नामान्तरे स्तः। एवं नाटकेऽस्मिन् प्रद्युम्नानन्दीये प्रथमाङ्के उदा-

I U I	**U I U**	**U U**	**U I U**	**U I U**	**I U**
उदार	**वीरशृ**	**ङ्गारो-**	**द्दीपकं**	**रूपकं**	**त्वया।**
U I U	**U I U**	**U I**	**U I U**	**U I U**	**I U**
नव्यम	**त्र प्रयो**	**क्तव्य-**	**मुत्तम**	**श्लोकना**	**यकम्।। १-३।।**

श्लोकेऽस्मिन् पञ्चमाक्षरं लघुः, षष्ठमाक्षरं च गुरुः। द्वितीय-चतुर्थपादयोः सप्तमाक्षरं लघुः भवति, अतः श्लोकोऽयम् **अनुष्टुप् छन्दः** भवति। अर्थात् सर्वेषु पादेषु पञ्चम-षष्ठाक्षरेषु क्रमशः लघु-गुर्वक्षरौ भवतः। द्वितीय-चतुर्थपादेषु तु सप्तमम् अक्षरं लघुः भवेत् इति नियमः। अन्यत्र स्थानेषु लघुः वा गुरुः वा भवतु नाम - श्लोकस्य हानिः न भवति।

लक्षणम्- **पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**
षष्ठं गुरुर्विजानीयात् एतत्पद्यस्य लक्षणम्।। इति। (श्रुतबोधः)

❀ ९. बृहती (९) ❀

बृहतीजातिछन्दसि नव वर्णाः (९) भवन्ति। अस्मिन् छन्दसि हलमुखी अन्यतमं वृत्तम् वर्तते।

१. हलमुखी :- **रान्नसाविह हलमुखी।। १९।।** (र-न-स)। त्रिभिः षड्भिश्च यतिः इति सम्प्रदायः।

२. भुजगशिभृता :- **भुजगशिशुभृता नौ मः।। २०।।** (न-न-म)। सप्तभिः द्वाभ्यां यतिः।

❀ १०. पङ्क्तिः (१०) ❀

पङ्क्तिजातिछन्दसि दश वर्णाः (९) भवन्ति।

१. शुद्धविराट् :- **म्सौ ज्गौ शुद्धविराडिदं मतम्।।२१।।** (म-स-ज-ग)। पादान्ते अत्र यतिः।

२. पणवनामकम् :- **म्नौ ज्गौ चेति पणवनामकम्।। २२।।** (म-न-ज-ग)। पञ्चभिः पञ्चभिः यतिः।

३. मयूरसारिणी :- **र्जौ रगौ मयूरसारिणी स्यात्।।२३।।** (र-ज-र-ग)। पादान्ते अत्र यतिः।

४. रुक्मवती :- **भ्मौ सगयुक्तौ रुक्मवतीयम्।। २४।।** (भ-म-स.ग)। पादान्ते अत्र यतिः। श्रुतबोधे चम्पकमाला इति व्यवहारः। अस्याः लक्षणम् इत्थम् -

तन्वि गुरुः स्यात् आद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम्।
इन्द्रियबाणैर्यत्र विरामः सा कथनीया चम्पकमाला।। इति।

५. मत्ता :- **मत्ता ज्ञेया मभसगयुक्ता।। २५।।** (म-भ-स-ग)। चतुर्भिः षड्भिश्च यतिः।

६. मनोरमा :- **नरजगैर्भवेन्मनोरमा।। २६।।** (न-र-ज-ग)। पादान्ते यतिः।

७. उपस्थिता :- **त्जौ जो गुरुणेयमुपस्थिता।। २७।।** (त-ज-ज-ग)।
पादान्ते यतिः। द्वाभ्याम् अष्टभिश्च इत्येके।

❀ ११. त्रिष्टुप् (११) ❀

त्रिष्टुप् जातिछन्दसि एकादशवर्णाः (११) भवन्ति। अस्मिन् छन्दसि भद्रिका अन्यतमं वृत्तम् वर्तते। त्रिष्टुपि -

१. इन्द्रवज्रा	***:- स्यादिन्द्रवज्रा यदि तौ जगौ गः।***	***(त-त-ज-ग.ग)।***
२. उपेन्द्रवज्रा	***:- उपेन्द्रवज्रा जतजास्ततो गौ।***	***(ज-त-ज-ग.ग)।***
३. उपजातिः	***:- अनन्तरोदीरित लक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः (इन्द्रवज्रा + उपेन्द्रवज्रा)***	
४. सुमुखी	:- **नजजलगैर्गदिता सुमुखी।**	(न-ज-ज-ल.ग)।

५. दोधकम्	:- **दोधकवृत्तमिदं भभभाद्गौ।**	(भ-भ-भ-ग.ग)।
६. शालिनी	***:- शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः।***	***(म-त-त-ग.ग)।***
७. वातोर्मी	:- **वातोर्मीयं कथिता म्भौ तगौ गः।**	(म-भ-त-ग.ग)।
८. श्रीछन्दः	:- **बाणरसैः स्याद्भतनगगैः श्रीः।**	(भ-त-न-ग.ग)।

अस्य एव **मौक्तिकमाला** इति अपरं नाम। **मौक्तिकमाला यदि भतनाद्गौ।**

९. भ्रमरविलसितम्	:- **म्भौ न्लौ गः स्याद् भ्रमरविलसितम्।**	(म-भ-न-ल.ग)।
१०. रथोद्धता	***:- रान्नराविह रथोद्धता लगौ।***	***(र-न-र-ल.ग)।***
११. स्वागता	***:- स्वागतेति रनभाद्गुरुयुग्मम्।***	***(र-न-भ-ग.ग)।***
१२. वृन्ता	:- **ननसगगुरुरचिता वृन्ता।**	(न-न-स-ग.ग)।
१३. भद्रिका	***:- ननरलगुरुभिश्च भद्रिका।***	***(न-न-र-ल.ग)।***
१४. श्येनिका	:- **श्येनिका रजौ रलौ गुरुर्यदा।**	(र-ज-र-ल.ग)।
१५. उपस्थितम्	:- **उपस्थितमिदं ज्सौ ताद्गकारौ।**	(ज-स-त-ग.ग)।

११.१. इन्द्रवज्रा[1] :-

लक्षणम् :- स्यादिन्द्रवज्रा यदि तौ जगौ गः। (वृत्तरत्नाकरः ३-१८) ***(त-त-ज-ग.ग)।***

यस्मिन् तौ= तगणद्वयं, जगौ - जगणं गुरु द्वयं च भवति सा इन्द्रवज्रा भवति। पादान्ते यतिः।

त	**त**	**ज**	**ग ग**
U U I	**U U I**	**I U I**	**U U**
संगेन	**सांगेष्टि**	**कृतामृ**	**षीणां**
सालोय	**मालोहि**	**तपल्ल**	**वाग्रौ।**
शाखाग्र	**जाग्रत्कु**	**सुमास**	**वाज्यै-**
राघार	**माघार**	**यतीति**	**मन्ये।। प्रद्यु. १.८९।।**

उदाहरणश्लोके प्रत्येकस्मिन् पादे तगणद्वयं, जगणं गुरुद्वयं च वर्तन्ते। उपर्युक्तश्लोके इन्द्रवज्रालक्षणं सम्यक् घटितम्। अतः श्लोकोऽयं इन्द्रवज्रा छन्दसि वर्तते।

1. वृ.र. पृ. ६३

११.२. उपेन्द्रवज्रा[1] :- उपेन्द्रवज्रा जतजास्ततो गौ। (वृ.र. ३-२७) इति।

यस्य प्रतिचरणं ज-त-ज-ग-ग इति गणोपेतः भवति तत् वृत्तं भवति उपेन्द्रवज्रा। उदा-

ज	**त**	**ज**	**ग.ग**	**ज**	**त**	**ज**	**ग.ग**
I U I	**U U I**	**I U I**	**U U**	**I U I**	**U U I**	**I U I**	**U U**
विजृम्भ	**माणां वि**	**टपाळि**	**मेव**	**समाश्र**	**यन्ते स**	**कला द्वि**	**जेन्द्राः।**
तथोचि	**तं विप्र**	**वरा व**	**ळीनां**	**विमान**	**रूपः क**	**लिकाल**	**योगः।। प्रद्यु.४६।।**

श्लोकोऽयं ज-त-ज-ग-ग इति गणोपेतः। प्रत्येकस्मिन् पादे एकादशाक्षराणि भवन्ति। अतः श्लोकोऽयं उपेन्द्रवज्रा।

११.३. उपजातिः[2] :-

अनन्तरोदीरित लक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः। ***(इन्द्रवज्रा + उपेन्द्रवज्रा)***

इन्द्रवज्रा-उपेन्द्रवज्रयोः सम्मेलनमुपजातिः। अर्थात् यस्मिन् छन्दसि कतिचित् चरणानि इन्द्रवज्रायाः कतिचिच्च उपेन्द्रवज्रायाः मेलनेन **उपजातिः** नामक **त्रिष्टुप्जाति**छन्दः भवतीति। इदानीं पुनः उदेति इन्द्रवज्रायाः कति पादाः ? उपेन्द्रवज्रायाः कतिपदाः इति। अस्योत्तरं भवति - न्यूनातिन्यूनं एकैकपादः तु अनयोः वृत्तयोः उपजातिवृत्ते भवितव्यः। यदि इन्द्रवज्रायाः एकः पादः उपेन्द्रवज्रायाश्च त्रयः पादाः, यदि च द्वयोः वृत्तयोः द्वौ द्वौ पादौ, यदि च त्रयः इन्द्रवज्रायाः एकश्च उपेन्द्रवज्रायाः पादः अथवा उपेन्द्रवज्रायाः त्रयः पादाः इन्द्रवज्रायाश्च एकः पादः – इत्येतादृशासु दशासु सर्वत्र उपजातिछन्दः एव भवति। यथा प्रद्युम्नानन्दीये -

ज	**त**	**ज**	**ग ग**	
I U I	**U U I**	**I U I**	**U U**	(इन्द्रवज्रा)
ततःप्र	**सन्नस्त**	**पसा गि**	**रीशो**	= 1
दयाळु	**रूचे द**	**यितां स्म**	**रस्य।**	= 2

1. वृ.र. पृ. ६४ 2. वृ.र. पृ. ६४-६७

त	**त**	**ज**	**ग ग**	
U U I	**U U I**	**I U I**	**U U**	(उपेन्द्रवज्रा)
अह्नाय	**जन्मान्त**	**रमाश्रि**	**तेन**	= 3
ज	**त**	**ज**	**ग ग**	
I U I	**U U I**	**I U I**	**U U**	(इन्द्रवज्रा)
प्रियेण	**योगं पु**	**नरेष्य**	**सीति**	= 4* **। प्रद्यु. १.३४।।**

श्रुतबोधे अस्य लक्षणम् यथा-

यत्र द्वयोरप्यनयोस्तु पादा, भवन्ति सीमन्तिनि चन्द्रकान्ते।
विद्वभिराद्यैः परिकीर्तिता सा, प्रयुज्यतामित्युपजातिरेषा।। इति।

महाकवि क्षेमेन्द्रः उपजातौ प्रथमपादौ उपेन्द्रवज्रा भवेत् इति सूत्रयति -

उपजातिविकल्पानां, सिद्धो यद्यपि सङ्करः।
तथापि प्रथमं कुर्यात्, पूर्वपादाक्षरं लघु।।

यथा तीक्ष्णमुखं सूत्रं सूच्यां प्रवेशति तद्वत् लघ्वक्षरेण आरब्धः श्लोकः अपि अनायासेन श्रोत्रेषु प्रविशति। क्षेमेन्द्रस्य मते सुन्दरनायिकायाः वर्णने, वसन्तर्तोः तथा तस्याङ्गीभूतपुष्पपत्रादीनां वर्णने उपजातिवृत्तं सुन्दरं भवति। तद्यथा -

शृङ्गारालम्बनोदार-नायिकारूपवर्णनम्।
वसन्तादि तदङ्गं च, सच्छायमुपजातिभिः।। इति।

महावैयाकरणः महर्षिपतञ्जलिः उपजातिवृत्तस्य प्रयोगे सिद्धहस्तः। क्षेमेन्द्र वचसि तद्यथा -

स्पृहणीयत्वचरितं पाणिनेरुपजातिभिः।
चमत्कारैकसाराभिरुद्यानस्येव जातिभिः।।

पाणिनिजाम्बवतीजयात् —

निरीक्ष्य विद्युन्नयनैः पयोजो, मुखं निशायामभिसारिकायाः।
धारानिपातैः सह किन्नु वान्तश्चन्द्रोऽयमित्यार्ततरं ररास।। इति।

यथा त्रिष्टुप् जातिछन्दसि इत्थम् इन्द्रवज्रा-उपेन्द्रवज्रयोः मेलनेन उपजातिः इति व्यवहरन्ति, तथा जगतीजातिछन्दसि अपि इन्द्रवंशा-वंशस्थवृत्तयोः मेलनेन उपजातिवृत्तं भवति इति विद्वज्जनैः चिन्तनीयम्।।

११. ६. शालिनी[1] :-

लक्षणम् - **मात्तौ गौ चेच्छालिनी वेदलोकैः।** (छन्दो मञ्जरी)।

यस्य प्रतिचरणं मगणम्, तगणं तगणं गगणं, गगणं च भवति। तद् वृत्तं शालिनी इति उक्ता। सप्तवर्णानन्तरं यतिः भवति। उदा –

म	**त**	**त**	**गग**
U U U	**U U I**	**U U I**	**U U**
अर्थो हि	**स्यादात्म**	**नो धर्म**	**पत्नी-**
त्याम्नाया	**र्थं दर्श**	**यल्लील**	**यैव[2]।**
चन्द्रापी	**डः पञ्च**	**बाणस्य**	**जेताऽ-**
प्यद्रेः पु	**त्रीमर्ध**	**गात्रीक**	**रोति।। प्रद्यु. १.३१।।**

श्लोकोऽयं म-त-त-ग-ग इति गणोपेतः। प्रत्येकस्मिन् पादे एकादशवर्णाः सन्ति। अतः इयं शालिनी। अन्यानि उदाहरणानि प्रद्युम्नानन्दीयछन्दसां पट्टिकातः ज्ञेयानि।

श्रुतबोधे शालिन्याः लक्षणम् -

ह्रस्वो वर्णो जायते यत्र षष्ठः, कम्बुग्रीवे तद्वदेवाष्टमान्त्यः।
विश्रामः स्यात्तन्वि वेदैस्तुरङ्गैः, तां भासन्ते शालिनीं छन्दसीयाः।।

क्षेमेन्द्रः सुवृत्ततिलके एवं शालिनीं वर्णयति -

शालिनी श्लथबन्धैव स्वभावेन विभाव्यते।
उत्तेजन्तां प्रयत्नेन मन्ददीपशिखामिव।।

शत्रन्ताक्षरसंयोगैः किञ्चित्कार्कश्यकारिभिः।
अन्ते विसर्जनीयैश्च शालिनी याति दीप्तताम्।। २।।

1. वृ.र. पृ. ६८-६९

श्लथबन्धा स्त्री स्वभावादेव सुन्दरी भवति। यथा मन्ददीपस्य शिखायाः अधिक्यकरणेन प्रकाशस्याधिक्यं भवति तद्वत् अत्र प्रयत्नपूर्वकतया उत्तेजः दातव्यः। अन्ते 'श-त्र'वर्णाभ्यां युक्तपदविन्यसनेन (ये कर्कशशब्दं सूचयन्ति ते वर्णाः) शालिन्याः दीप्तिः अधिका भवति। - इति।

११. १०. रथोद्धता[1] :-

लक्षणम् - रान्नराविह रथोद्धता लगौ। (वृ.र. ३-३८) (र-न-र-ल.ग)।

यस्य प्रतिचरणं र-न-र-ल-ग इति गणोपेतः भवति तत् वृत्तं रथोद्धता इति उक्ता। पादान्ते यतिः भवति।

र	न	र	ल ग
U I U	**I I I**	**U I U**	**I U**
वातशी	**त इव**	**लक्ष्यसे**	**पुनः**
पातकिन्	**क्षिपसि**	**पावकं**	**मयि।**
चोळभू	**परिच**	**यात्तवा**	**थवा**
कल्पते	**कपट**	**शीलताद्**	**ध्रुवम्।। प्रद्यु.२-२०।।**

श्लोकोऽयं र-न-र-ल-ग इति गणोपेतः प्रत्येकस्मिन् पादे एकादशाक्षराणि भवन्ति। अत श्लोकोऽयं रथोद्धता।

श्रुतबोधे अस्य वृत्तस्य लक्षणम् -

आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं तथान्तिमम्।
दीर्घमिन्दुमुखि यत्र जायते, तां वदन्ति कवयो रथोद्धताम्।।

कालिदासस्य रघुवंशमहाकाव्यस्य एकादशतमसर्गः सम्पूर्णतया अस्मिन् वृत्ते एव ग्रथितः विद्यते। यथा-

कौशिकेन न स किल क्षितीश्वरो, राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचितः, तेजसां हि न वयः समीक्षते।। ११.१।। इति।

1. वृ.र. पृ. ७१-७२

यथा लटभा स्वकलया प्रागल्भ्यं प्राप्नोति तथैव रथोद्धता पादान्ते आगतेन विसर्गेण युक्ता सति सुशोभते। अप्रार्थितायाः प्रणयिण्याः म्लानमुखमिव हीनविसर्गा रथोद्धताऽपि (सौन्दर्यबाह्या) शोभाहीना भवति। क्षेमेन्द्रः गदति तद्यथा -

विसर्गयुक्तैः पादान्तैः विराजति रथोद्धता।
कलापरिचयैर्याता लटभेव प्रगल्भताम्।।

अविसर्गैस्तु पादान्तैर्निष्प्रभैव रथोद्धता।
अप्रार्थनाप्रणयिनी म्लानमानेव मानिनी।। इति।

इदं छन्दः चन्द्रोदयादिविभावानां वर्णने अधिकम् उपयुक्तं भवति। तदा वृत्तेऽस्मिन् विभावानां वर्णनसौन्दर्यं रमणीयं च स्फुटो भवति।

११. ११. स्वागता[1] :- स्वागतेति रनभाद्गुरुयुग्मम्। (र-न-भ-ग.ग)।

रगण-नगण-भगणेभ्यः परं गुरुयुग्मं यदि तदा स्वगता नाम वृत्तं भवति। पादान्ते यतिः।

र	न	भ	ग.ग
U I U	**I I I**	**U I I**	**U U**
रक्तप	**ल्लववृ**	**तां मधु**	**पार्हा**
पुष्पिणीं	**तटव**	**नीं परि**	**रभ्य।**
निर्झरा	**स्तदनु**	**सानुश**	**यत्वात्,**
किं भृगोः	**पतन**	**मारच**	**यन्ति ?।। प्रद्यु.१.५१।।**

श्रुतबोधे स्वागतायाः लक्षणम् -

अक्षरं च नवमं दशमं चेत्, व्यत्ययाद्भवति यत्र विनीते।
प्रोक्तमेणनयने यदि सैव, स्वागतेति कविभिः कथिताऽसौ।। इति।

1. वृ.र. पृ. ७२-७३

क्षेमेन्द्रस्य अभिप्राये -

साकाराद्यैर्विसर्गान्तैः सर्वपादैः सविभ्रमा।
स्वागता स्वागता भाति, कविकर्मविलासिनी।। इति।

आद्यक्षरम् आकारेण सहितं अन्ते च विसर्गेण युक्तस्य एवं सर्वैः पादैः विलसितस्य स्वागताछन्दसः स्वागतं सर्वैः आद्रियते। यतः सर्वेषां प्रीतिभाजो भवति।

११.१३. भद्रिका[1] :-

एतेषु वृत्तेषु भद्रिकावृत्तम् अन्यतमम्। अस्य लक्षणं **ननरलगुरुभिश्च भद्रिका** इति। अस्मिन् वृत्ते **न-न-र-ल.ग-**गणाः भवन्ति। प्रस्तुतप्रद्युम्नान्दीये नाटके अस्मिन् छन्दसि प्रयुक्तश्लोकः -

न	**न**	**र**	**ल.ग**	
I I I	**I I I**	**U I U**	**I U**	**= 11**
विरहि	**जणक**	**दे वणं**	**पिओ**	**- भद्रिका**
न	ज	ज	र	
I I I	I U I	I U I	U I U	= 12
विसड	सरोव	अएंक	सूअओ। - मालती	
न	**न**	**र**	**ल.ग**	
I I I	**I I I**	**U I U**	**I U**	**= 11**
सुदिसु	**हसुह**	**गाणदं**	**खिणो**	**- भद्रिका**
न	ज	ज	र	
I I I	I U I	I U I	U I U	= 12
पविस	दि पंव	दकाण	णतर।।	- मालती।। १-१९।।

1. वृ.र. पृ. ७४

❃ १२. जगती (१२) ❃

जगतीजातिछन्दसि द्वादशवर्णाः (१२) भवन्ति। अस्मिन् छन्दसि **मालती** अन्यतमं वृत्तम् वर्तते। जगतीछन्दसि -

१. चन्द्रवर्त्म	**:- चन्द्रवर्त्म निगदन्ति रनभसैः।**	(र-न-भ-स)।
२. वंशस्थम्	***:- जतौ तु वंशस्थमुदीरितं जरौ।***	***(ज-त-ज-र)।***
३. इन्द्रवंशा	:- **स्यादिन्द्रवंशा ततजै रसंयुतैः।**	(त-त-ज-र)।
४. तोटकम्	:- **इह तोटकमम्बुधिसैः प्रथितम्।**	(स-स-स-स)।
५. द्रुतविलम्बितम्	***:- द्रुतविलम्बितमाह नभौ भरौ।***	***(न-भ-भ-र)।***
६. पुटः	:- **मुनिशरविरतिर्नौ म्यौ पुटोऽयम्।**	(न-न-म-य)।
७. प्रमुदितवदना	:- **प्रमुदितवदना भवेन्नौ च रौ।**	(न-न-र-र)।
८. कुसुमचित्रा	:- **नयसहितौ न्यौ कुसुमविचित्रा।**	(न-य-न-य)।
९. जलोद्धतगतिः	:- **रसैर्जसजसा जलोद्धतगतिः।**	(ज-स-ज-स)।
१०. मौक्तिकदाम	:- **चतुर्जगणं वद मौक्तिकदाम।**	(ज-ज-ज-ज)।
११. भुजङ्गप्रयातम्	:- **भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः।**	(य-य-य-य)।
१२. स्रग्विणी	:- **रैश्चतुर्भिर्युता स्रग्विणी सम्मता।**	(र-र-र-र)।
१३. प्रयंवदा	:- **भुवि भवेन्नभजरैः प्रियंवदा।**	(न-भ-ज-र)।
१४. मणिमाला	:- **त्यौ त्यौ मणिमाला च्छिन्ना गुहवक्त्रैः।**	(त-य-त-य)।
१५. ललिता	**:- धीरैरभाणि ललिता तभौ जरौ।**	(त-भ-ज-र)।
१६. प्रमिताक्षरा	**:- प्रमिताक्षरा सजससैरुदिता।**	(स-ज-स-स)।
१७. उज्ज्वला	**:- ननभरसहिता महितोज्ज्वला।**	(न-न-भ-र)।
१८. वैश्वदेवी	**:- पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ।**	(म-म-य-य)।
१९. जलधरमाला	**:- अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ।**	(म-भ-स-म)।
२०. नवमालिका	**:- इह नवमालिका नजभयैः स्यात्।**	(न-ज-भ-य)।
२१. प्रभा	**:- स्वरशरविरतिर्ननौ रौ प्रभा।**	(न-न-र-र)।
२२. मालती	***:- भवति नजावथ मालती जरौ।***	***(न-ज-ज-र)।***
२३. पञ्चचामरम्	:- **जभौ जरौ वदति पञ्चचामरम्।**	(ज-भ-ज-र)।
२४. अभिनवतामरसम्	:- **अभिनवतामरसं नजजाद्याः।**	(न-ज-ज-य)।

१२.२. वंशस्थम् :- जतौ तु वंशस्थमुरीरितं जरौ। (वृत्तरत्नाकरः ३-४६)

यस्मिन् ज-त-ज-र इति गणाः पादान्ते च यतिर्भवति तद् वंशस्थमिति।

ज	त	ज	र
I U I	**U U I**	**I U I**	**U I U**
विहाय	**वेदिस्त**	**रणोचि**	**तान् कुशान्**
इहाह	**रन्ते तृ**	**णमेण**	**शाबकाः।**
शकुन्त	**डिम्भास्स**	**कुतूह**	**लं बृह-**
द्रथन्त	**रादीनि**	**शनैर**	**धीयते।। प्रद्यु. १.८८।।**

अस्मिन् श्लोके चतुर्षु पादेषु ज-त-ज-र इति गणाः सन्ति। पादान्ते च यतिः वर्तते। अतः इदं वंशस्थम्। श्रुतबोधे अस्य वृत्तस्य लक्षणम् -

उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवः परे कृताः।
मदोल्लसद्भ्रूजितकामकार्मुके वदन्ति वंशस्थविलं बुधास्तदा।। इति।

संस्कृतसाहित्ये कालिदास-भारवि-श्रीहर्षादिमहाकवयः अत्यधिकतया अस्य प्रयोगः अकुर्वन्। श्रीहर्षस्तु नैकेसर्गेषु सम्पूर्णतया अस्मिन् छन्दसि एव रचना कृता। क्षेमेन्द्रः स्वसुवृत्ततिलके-

अस्मिन् छन्दसि यदा दीर्घसमासयुक्ता पदावली, प्रत्येकस्मिन् पादे सन्धिविच्छेदः, विसर्गेण युक्ता च भवति तदा तद्वृत्तम् अत्यन्तसौन्दर्यं वहति। वंशस्थरचनायां संस्कृतकविषु भारविः निपुणः।

ससमस्तपदैः पादसन्धिविच्छेदसुन्दरम्।
सर्वपादैर्विसर्गान्तैः वंशस्थं यात्यनर्घताम्।।

षाड्गुण्ययुक्तराजनीतिवर्णने अस्य वंशस्थस्य प्रयोगः समुचितो भवति[1]।

षाड्गुण्यप्रगुणा नीतिर्वंशस्थेन विराजते।। इति।

1. वृ.र. पृ. ७६-७७

१२.५. द्रुतविलम्बितम्[1] :- द्रुतविलम्बितमाह नभौ भरौ। (वृ.र. ३-४७)

यस्य प्रतिचरणं न-भ-भ-र इति गणोपेतं भवति तत् वृत्तं द्रुतविलम्बितम् इति उक्ता। पादान्ते विरामः। उदा-

न	भ	भ	र
I I I	U I I	U I U	U I U
मधु नि	**पीय प**	**रिभ्रम**	**तो वने**
मदजु	**षस्सत**	**तं मलि**	**नात्मनः।**
सुमन	**सां मध**	**नैरुद**	**रम्भरे-**
र्भ्रमर!	**कस्य प**	**रोपकृ**	**तिः कुतः।। प्रद्यु. ३.३०।।**

श्लोकोऽयं न-भ-भ-र इति गणोपेतः। प्रत्येकस्मिन् पादे द्वादश अक्षराणि भवन्ति। अतः इयं द्रुतविलम्बितम्। श्रुतबोधे अस्य लक्षणम् -

अयि कृशोदरि! यत्र चतुर्थकं, गुरु च सप्तमकं दशमं तथा।
विरतिगं च तथैव विचक्षणैः, द्रुतविलम्बितमित्युपदिश्यते।।

महाकविः कालिदासः स्वरघुवंशे नवमे सर्गे द्रुतविलम्बितवृत्तस्य प्रयोगः सुन्दरतया ग्रथितवान्। कविलोके अस्य बहुलप्रयोगः वर्तते यतः अस्मिन् वृत्ते यमकालङ्कारः सम्यग्युज्यते। अस्य वृत्तस्य नाम द्रुतविलम्बितम् इति। अर्थात् प्रथमं द्रुतगतिः - शीघ्रेण गतिः, अनन्तरं विलम्बः च भवेत् तदा एव अस्य वृत्तस्य सौन्दर्यं वर्धते। क्षेमेन्द्रेणापि -

प्रारम्भे द्रुतविन्यासं, पर्यन्तेषु विलम्बितम्।
विच्छित्या सर्वपादानां, भाति द्रुतविलम्बितम्।। इत्युक्तम्।

यद्यपि कुत्रापि क्षेमेन्द्रेण न प्रकटितम्, तथापि कविपरम्परावलोकनेन इदमनुमातुं शक्यते यत् अस्मिन् वृत्ते षड्ऋतूणां वर्णनम् उचितमाभाति - इति। कालिदास-भारवि-माघादिकविवर्णनेषु अस्मिन् द्रुतविलम्बितवृत्ते षड्ऋतुवर्णनं दरीदृश्यते।

1. वृ.र. पृ. ७९-८०

१२.२२. मालती[1] :-

एतेषु वृत्तेषु मालतीवृत्तम् अन्यतमम्। अस्य लक्षणं **भवति नजावथ मालती जरौ** इति। अस्मिन् वृत्ते **न-ज-ज-र-**गणाः भवन्ति। प्रस्तुतप्रद्युम्नान्दीये नाटके अस्मिन् छन्दसि प्रयुक्तश्लोकः -

न	न	र	ल.ग	
I I I	I I I	U I U	I U	= 11
विरहि	जणक	दे वणं	पिओ	- भद्रिका
न	**ज**	**ज**	**र**	
I I I	**I U I**	**I U I**	**U I U**	**= 12**
विसड	**सरोव**	**अएंक**	**सूअओ। - मालती**	
न	न	र	ल.ग	
I I I	I I I	U I U	I U	= 11
सुदिसु	हसुह	गाणदं	खिणो	- भद्रिका
न	**ज**	**ज**	**र**	
I I I	**I U I**	**I U I**	**U I U**	**= 12**
पविस	**दि पंव**	**दकाण**	**णतर।। - मालती।।प्रद्यु. १-१९।।**	

❁ १३. अतिजगती (१३) ❁

अतिजगतीजातिछन्दसि त्रयोदशवर्णाः (१३) भवन्ति। अस्मिन् छन्दसि **मत्तमयूरम्** अन्यतमं वृत्तम् वर्तते। अतिजगतीछन्दसि-

१. क्षमा **:- तुरगरसयतिर्नौ ततौ गः क्षमा।** (न-न-त-त-ग)।

२. प्रहर्षिणी :- म्नौ ज्रौ गः त्रिदशयतिः प्रहर्षिणीयम्। (म-न-ज-र-ग)।

३. अतिरुचिरा :- चतुर्ग्रहैरतिरुचिरा जभस्जगाः। (ज-भ-स-ज-ग)।

४. मत्तमयूरम् **:- वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम्।** (म-त-य-स-ग)।

५. उपस्थितम् **:- उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत्।** (ज-स-त-स-ग)।

६. मञ्जुभाषिणी :- सजसा जगौ भवति मञ्जुभाषिणी। (स-ज-स-ज-ग)।

७. चन्द्रिका **:- ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः।** (न-न-त-त-ग)।

---

1. वृ.र. पृ. ८८

१३.२. प्रहर्षिणी[1] :-

म्नौ ज्रौ गः त्रिदशयतिः प्रहर्षिणीयम्। (वृ.र. ३-७०) इति वृत्तरत्नाकरोक्तलक्षणात् यस्मिन् म्नौ-मगणं, नगणम्, ज्रौ-जगणं रगणं गुरुश्च भवति तद्वृत्तं प्रहर्षिणी भवति। त्रीभिः दशभिश्च यतिः।

म	**न**	**ज**	**र**	**गु**
U U U	**I I I**	**I U I**	**U I U**	**U**
गोदुग्ध	**व्यतिक**	**रलब्ध**	**सौभग**	**श्री-**
धूमोऽयं	**दुरित**	**हरो वि**	**गाहते**	**द्याम्।**
संदातुं	**हविर**	**नलेन**	**देवता**	**ना-**
मुच्चैरु	**द्धृत इ**	**व बाहु**	**रुज्जिहा**	**नः।। ९४।।**

अस्मिन् श्लोके चतुर्षुपादेषु म-न-ज-र इति गणाः सगुरुणा सन्ति। त्रीभिः दशभिश्च विरामः वर्तते। प्रत्येकः पादः त्रयोदशाक्षरयुक्तः। अतः प्रहर्षिणी छन्दसि लक्षणसमन्वयः।

श्रुतबोधस्थ प्रहर्षिणीवृत्तस्य लक्षणम् -

आद्यं चेत् त्रितयमथाटमं नवान्त्यं, द्वावन्त्यौ गुरुविरतौ सुभाषिते स्यात्।
विश्रामो भवति महेशनेत्रदिग्भिः, विज्ञेया ननु सुदति प्रहर्षिणी सा।। इति।

क्षेमेन्द्रस्तु -अस्मिन् वृत्ते प्रत्येकस्मिन् पदे त्रिवर्णानामनन्तरम् आकारस्य विधानं भवेत् शेषवर्णाश्च द्रुततराः (ह्रस्वाः) भवेयुः। एवं प्रहर्षिणी हर्षम् आनन्दं ददाति तद्यथा तस्योक्तिषु -

आकारमन्तरैः प्रायः पादे पादेऽक्षरैस्त्रिभिः।
शेषाक्षरैर्द्रुततरैः प्रहर्षाय प्रहर्षिणी।। २.१९।। इति।

१३.३. अतिरुचिरा[2] :- चतुर्ग्रहैरतिरुचिरा जभस्जगाः। (ज-भ-स-ज-ग)।

यस्य प्रतिचरणं जगण-भगण-सगण-जगणैः गुरुवर्णेन च युक्तं भवति तद् अतिरुचिरा नाम वृत्तं भवति। अत्र चतुः-ग्रहैः नाम चतुर्णां नवानां वर्णानाम् अनन्तरं विराम इति ज्ञेयः।

1. वृ.र. पृ. ९०   2. वृ.र. पृ. ९१

ज	भ	स	ज	ग
I U I	**U I I**	**I I U**	**I U I**	**U**
विधौ प	**रं विम**	**लसरो**	**रुहास**	**ने**
सुशोभ	**नाभ्युद**	**यविशे**	**षपूजि**	**ते।**
न मातृ	**शव्यस**	**नविधा**	**यितोचि**	**ता**
सुशीत	**ले कुव**	**लयस**	**म्मते त्व**	**यि।। प्रद्यु. ३.२६।।**

श्लोकोऽयं ज-भ-स-ज-ग इति गणैरुपेतः भवति। प्रत्येकस्मिन् पादे त्रयोदश अक्षराणि च सन्ति। अतः इदम् अतिरुचिरा नाम छन्दः भवति।

१३.६. मञ्जुभाषिणी[1] :-

लक्षणम् - सजसा जगौ भवति मञ्जुभाषिणी। (वृ.र. ३-७४)। (स-ज-स-ज-ग)।

यस्य प्रतिचरणं स-ज-स-ज-ग इति गणोपेतं भवति तत् वृत्तं **मञ्जुभाषिणी** इति उक्ता। अत्र पञ्चभिः अष्टभिः च यतिः भवति। उदा-

स	**ज**	**स**	**ज**	**ग**
IIU	**IUI**	**IIU**	**IUI**	**U**
पटलं	**क्षणेन**	**तमसां**	**पलाय**	**ते**
भजते	**विकास**	**मपि मा**	**नसाम्बु**	**जम्।**
अतुलं	**प्रहर्ष**	**मकलङ्**	**किताश**	**यो**
न बिभ	**र्ति को नु**	**सति मि**	**त्रदर्श**	**ने।। प्रद्यु. १.२६।।**

श्लोकोऽयं स-ज-स-ज-ग इति गणोपेतः भवति। प्रत्येकस्मिन् पादे त्रयोदश अक्षराणि भवन्ति। अतः इयं मञ्जुभाषिणी इति उक्ता।

1. वृ.र. पृ. ९२

❀ १४. शक्वरी (१४) ❀

शक्वरीजातिछन्दसि चतुर्दशवर्णाः (१४) भवन्ति। अस्मिन् छन्दसि **वसन्ततिलका** अन्यतमं प्रसिद्धं वृत्तं वर्तते। शक्वरीछन्दसि-

१. असम्बाधा	**:- म्तौ न्सौ गावक्षग्रहविरतिरसम्बाधा।**	(म-त-न-स-ग-ग)।
२. अपराजिता	**:- ननरसलघुगैः स्वरैरपराजिता।**	(न-न-र-स-ल.ग)।
३. प्रहरणकलिता	**:- ननभनलघुगैः प्रहरणकलिता।**	(न-न-भ-न-ल.ग)।
४. वसन्ततिलका	***:- उक्ता वसन्ततिलका तभजाजगौगः।***	***(त-भ-ज-ज-ग.ग)।***
५. इन्दुवदना	**:- इन्दुवदना भजसनैः सगुरुयुग्मैः।**	(भ-ज-स-न-ग-ग)।
६. अलोला	**:- द्विः सप्तच्छिदलोला म्सौ म्भौ चरणे चेत्।**	(म-स-म-भ-ग.ग)।

१४.४. वसन्ततिलका[1] :-

लक्षणम् :- उक्ता वसन्ततिलका तभजाजगौगः। (त-भ-ज-ज-ग.ग)।

अष्टभिः सप्तभिः च यतिः। श्रुतबोधे अस्य लक्षणमित्थम् -

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं,
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम्।
अष्टभिरिन्दुवदने! विरतिश्च षड्भिः,
कान्ते वसन्ततिलकां किल तां वदन्ति।। इति।

कालिदासस्य रघुवंशपञ्चमसर्गे १०-१५ श्लोकेषु वसन्ततिलकायाः प्रयोगः अत्यन्तरमणीयः संस्कृतसाहित्ये प्रसिद्धः च। तद्यथा-

रात्रिर्गतामतिमतां वर मुञ्च शय्यां,
धात्रा द्विधैव ननु धूर्जगतो विभक्ता।
तामेकतस्तव बिभर्ति गुरुर्विनिद्रः,
तस्या भवानपरधुर्यपदावलम्बी।।

1. वृ.र. पृ. ९५-९७

क्षेमेन्द्रस्य वसन्ततिलकायाः लक्षणम् :-

वसन्ततिलकास्याग्रे साकारे प्रथमाक्षरे।
ओजसा जायते कान्तिः सविकासविलासिनी।। २.४०।।

वसन्ततिलकायाः प्रथमाक्षरे आकारो भवेत्। अस्मिन् छन्दसि ओजोगुणहेतोः अस्याः वसन्ततिलकायाः कान्त्याः विकासः भवति - इत्यस्य श्लोकस्य भावः।

क्षेमेन्द्रस्य **वसन्ततिलकं भाति संकरे वीर-रौद्रयोः** इत्युक्त्यनुसारं वीर-रौद्ररसवर्णनसमयेषु अस्य अधिकः उपयोगः भवति इति ज्ञायते। अपि च क्षेमेन्द्रः **रत्नाकरः वसन्ततिलकायाः संरचने सिद्धहस्त** इति च कथयति। **सिंहोन्नतेयमुदिता मुनिकाश्यपेन।** इयं वसन्ततिलकैव **सिंहोन्नता** इत्युक्ता। उद्धर्षिणीयमुदिता मुनिसैतवेन। सैतवाचार्येण तु इयं वसन्ततिलकैव **उद्धर्षिणी** इति अपरया नाम्ना गदिता।

त	**भ**	**ज**	**ज**	**ग ग**
U U I	**U I I**	**I U I**	**I U I**	**U U**
मान्यं मु	**कुन्दगृ**	**हिणीम**	**करध्व**	**जांशं**
लोकोत्त	**रं सुत**	**मसूय**	**त रुक्मि**	**णी सा।**
प्रद्युम्न	**मेनम**	**हरद्ध**	**वनाद**	**रिष्टात्**
षष्ठे दि	**ने सप**	**दि शम्ब**	**रदान**	**वेन्द्रः।। १.३७।।**

श्लोकोऽयं त-भ-ज-ज-गु इति गणैरुपेतः। अष्टम-षष्ठवर्णयोः यतिः। प्रत्येकऽस्मिन् पादे चतुर्दश वर्णाः सन्ति। अतः इयं वसन्ततिलका।

❀ १५. अतिशक्वरी (१५) ❀

अथ अतिशक्वरी नामकजातिछन्दः भवति। अस्याः जातेः प्रत्येकस्मिन् पादे पञ्चदश (१५) **वर्णाः** भवन्ति। अस्यां जातौ मालिनी प्रसिद्धा अस्ति। कवयः स्वकाव्येषु अस्य वृत्तस्य प्रयोगः अधिकतया अकुर्वन्।

१. शशिकला	:- **द्विहतहयलघुरथ गिति शशिकला।**		(न-न-न-न-स)
२. मालिनी	***:- ननमयययुतेयं मालिनी भोगिलोकैः।***		***(न-न-म-य-य)***
३. प्रभद्रकम्	:- **भवति नजौ भजौ रसहितौ प्रभद्रकम्।**		(न-ज-भ-ज-र)
४. एला	:- **सजना नयौ शरदशयतिरियमेला।**		(स-ज-न-न-य)
५. चन्द्रलेखा	:- **म्रौ म्यौ यान्तौ भवेतां सप्ताष्टरभिश्चन्द्रलेखा।**		(म-र-म-य-य)

१५.१. शशिकला :- **द्विहतहयलघुरथ गिति शशिकला।** (न-न-न-न-स)।

यस्मिन् वृत्ते चतुर्दशाक्षराणि (१४) लघवः भवन्ति तथा अन्तिमम् एकमक्षरं गुरुः भवति, सा शशिकला इति गीयते। यतिः विरामः सप्तभिः अष्टभिश्च भवति।

स्त्रगिति भवति रसनवकयतिरियम्। इयं शशिकलैव रस-नव= षट्सु नवसु अक्षरस्थानेषु यतौ सत्यां तदा स्रगिति संज्ञिता भवति। स्रक् = मालेत्यर्थः। **वसुहय-यतिरिह मणि-गुण-निकरः।** अष्टसु सप्तसु च अक्षरस्थानेषु यतौ सत्याम् इयं शशिकला एव मणिगुणनिकरा इति नाम्ना व्यवह्रियते।

१५. २. मालिनी[1] :- ननमयययुतेयं मालिनी भोगिलोकैः। (न-न-म-य-य)।

न-न-म-य-य इति गणोपेतं, भोगिभिः - अष्टभिः, लोकैः सप्तभिश्च यतियुतं वृत्तं **मालिनी** इति कथ्यते। अर्थात् मालिनीवृत्तौ न-न-म-य-य इति गणाः भवन्ति. अष्टवर्णे अनन्तरं सप्तमवर्णे च यतिः नाम विरामः भवति। **उदाहरणम्-**

न	**न**	**म**	**य**	**य**
I I I	**I I I**	**U U U**	**I U U**	**I U U**
यतिप	**तिमत**	**धुर्यो य**	**स्य सिंहा**	**सनस्थ-**
क्षितिप	**तिगुरु**	**रुच्चैर**	**द्धुतौदा**	**र्यधैर्यः।**
अजनि	**विमल**	**शीलो मा**	**तुलो भू**	**तलोद्यत्-**
कुमत	**तिमिर**	**सूर्यस्ता**	**तयाचा**	**र्यवर्यः।। १-७।।**

श्लोकेऽस्मिन् न-न-म-य-य इति गणाः, पञ्चदशवर्णाः वर्तन्ते। अष्ट सप्त च यति(विराम)स्थाने स्तः। अतः इयं मालिनीवृत्तम्। श्रुतबोधे अस्य छन्दसः लक्षणम् -

1. वृ.र. पृ. १००-१०४.

प्रथममगुरुषट्कं विद्यते यत्र कान्ते!
तदनु च दशमं चेदक्षरं द्वादशान्त्यम्।
करिभिरथ तुरङ्गैर्यत्र कान्ते! विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा।।

मालिनीवृत्तस्य प्रयोगः संस्कृतसाहित्ये अनुष्टुप् छन्दसःपरम् अत्यधिकतया कविभिः सुन्दरतया क्रियते। कालिदास-भवभूति-भारव्यादिमहाकवयः स्वकाव्येषु मालिनीवृत्तं प्रयुज्य अस्य गौरवं स्थानं ददुः। माघः शिशुपालवधे एकादशसर्गे (समस्तसर्गे) प्रभातवर्णनाय अस्य प्रयोगः अकारि। तद्यथा -

अनुनयमगृहीत्वा व्याजसुप्ता पराची,
रुतमथकृकवाकोस्तारमाकर्ण्य कल्ये।
कथमपि परिवृत्ता निन्द्रयान्धा किलस्त्री
मुकुलितनयनैवाऽश्लिष्यति प्राणनाथम्।। इति।

क्षेमेन्द्रः कथयति -**विसर्गहीनपर्यन्ता मालिनी न विराजते।**
चमरी छिन्नपुच्छेव वल्लीवालूनपल्लवा।। २.२२।।

यथा "अपर्णैः लता, छिन्नपुच्छेन चमरीमृगः न शोभां जनयतः" तथा विसर्गेण हीना मालिनी न शोभां जनयति - इति। यदि मालिनी तृतीय-चतुर्थपादयोः दीर्घसमासेन युक्ता तर्हि श्रेष्ठा मन्यते। किन्तु प्रथम-द्वितीयपादयोः समासदैर्घ्यं वर्तते सा अवरा निम्नकोटीया इति भाव्यते।

द्वितीयार्धे समस्ताभ्यां पादाभ्यां मालिनी वरा।
प्रथमार्धे समस्ताभ्यां पादाभ्यामवरा मता।। २.२३।।

मालिन्याः मनोरमतां प्रति वदन् क्षेमेन्द्रः मूर्खोऽपि मालिनीश्लोकम् आस्वादयन् तद्गतविस्वरं जानन् उद्वेगम् आप्नोति। किन्तु अक्षरज्ञानरहितत्वात् वाचा वक्तुं न पारयति। तद्यथा-

अज्ञोऽप्यलक्ष्यं मालिन्यां वीणायामिव विस्वरम्।
श्रुत्वैवोद्वेगमायाति वाचा वक्तुं न वेत्ति तम्।। २.२४।।

यथा संगीतस्यान्ते शीघ्र(द्रुत)तालस्य प्रयोगः भवति तथा अस्य छन्दसः विधानं सर्गान्ते कर्तव्यम्। यथा- **कुर्यात् सर्गस्य पर्यन्ते मालिनीं द्रुततालवत्।** -इति।

माघस्य स्तुतिं करोति क्षेमेन्द्रः स्व-सुवृत्ततिलकाख्यग्रन्थे- मालिनीवृत्तस्य प्रयोगे निपुणः माघमहाकविः अनेन सदृशः नान्यः कश्चिदस्ति। यद्यपि बहवः कवयः अस्य छन्दसः प्रयोगं कृतवन्तः तथापि तान् सर्वान् माघः अतिशेते। अपरमुदाहरणम् -

चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः।
अपरिचलितगात्राः कुर्वते न प्रियाणां
अशिथिलभुजचक्राश्लेषभेदं तरुण्यः।।

❀ १६. अष्टिः (१६ वर्णाः) ❀

१. ऋषभगजविलसितम् :- **भ्रत्रिनगैः स्वरात्खमृषभगजविलसितम्।**। ९१।। (भ-र-न-न-न.ग)। स्वरात् खम् - सप्तस्वराः अर्थात् सप्तमवर्णे पादस्यान्ते च विरामः यतिः भवति।

२. वाणिनी :- नजभजरैः सदा भवति वाणिनी गयुक्तैः।। ९२।। (न-ज-भ-ज-र-ग)।

❀ १७. अत्यष्टिः (१७ वर्णाः) ❀

अत्यष्टिजातौ - शिखरिणी-पृथ्वी-मन्दाक्रान्तावृत्तानि प्रसिद्धानि।

१. शिखरिणी :- रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी। *(य-म-न-स-भ-ल.ग)*
२. पृथ्वी :- जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। *(ज-स-ज-स-य-ल.ग)*
३. वंशपत्रपतितम् :- **दिङ्मुन वंशपत्रपतितं भरनभनलगैः।** (भ-र-न-भ-न-ल.ग)
४. हरिणी :- रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा। *(न-स-म-र-स-ल.ग)*
५. मन्दाक्रान्ता :- मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्। *(म-भ-न-त-त-ग.ग)*
६.१. नर्कुटकम् :- हयदशभिर्नजौ भजजला गुरुनर्कुटकम्। *(न-ज-भ-ज-ज-ल.ग)*
६.२. कोकिलकम् :- मुनिगुहकार्णवैः कृतयति वद कोकिलकम्। *(न-ज-भ-ज-ज-ल.ग)*
कोकिलकम् इत्यस्यैव नर्कुटकम् इति नाम।

१. शिखरिणी[1] :- रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी। (य-म-न-स-भ-ल.ग)

यस्य प्रतिचरणं यमनसभलगाः= यगण-मगण-नगण-सगण-भगणलघवः, गः= गुरुश्च भवति, तद्वृतं "शिखरिणी" नाम भवति। रसैः= षड्भिः, रुद्रैः= एकादशभिः छिन्ना यतिमती च सा भवति।

I U U	**U U U**	**I I I**	**I I U**	**U I I**	**I U**	
य	**म**	**न**	**स**	**भ**	**ल ग**	
अमी ती	**र्थस्नान**	**प्रयत**	**मुनिह**	**स्ताम्बुज**	**पुट-**	**=17**
प्रकीर्णा	**ऽर्घ्यासार**	**प्रसृम**	**रकणा**	**कर्षशि**	**शिराः।**	
विलुम्प	**न्ति क्लान्तिं**	**मृदुल**	**तुलसी**	**सौरभ**	**भर-**	
प्रसन्ना	**स्सञ्छिन्न**	**प्रबल**	**सृजिना**	**मन्दप**	**वनाः।। १-२१।।**	

अस्मिन् श्लोके प्रत्येकऽस्मिन्पादे सप्तदश वर्णानि सन्ति। प्रत्येकऽस्मिन् चरणे य-म-न-स-भ-लग इति गणाः वर्तन्ते। अर्थात् षष्ठमस्थाने, एकादशमस्थाने च यतिः वर्तते। अतः श्लोकोऽयं शिखरिणीवृत्तसम्बद्धः। श्रुतबोधे अस्य छन्दसः लक्षणम् -

यदि प्राच्यो ह्रस्वः कमलनयने पञ्चगुरवः,
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः।
त्रयोऽन्ये चोपान्त्याः सुतनु जघनाभोगसुभगे
रसैरुद्रैर्यस्यां भवति विरतिः सा शिखरिणी।।

मालिनीवत् शिखरिणी अपि संस्कृतकवीनां प्रियवृत्तं विद्यते। क्षेमेन्द्रेण शिखरिणीवृत्तस्य वर्णनं कुर्वन् शिखरिण्याः (पर्वतस्य) आरोहणे सहजतया ओजगुणः (शक्तिः) आवश्यकः। अर्थात् शिखरिण्यां समस्तपदावलिः गढबन्धता च स्यात्। अन्ते विसर्गस्य लोपे अत्यन्तोन्नताम् उत्कृष्टतां प्राप्यते। इति वदति। तद्यथा-

शिखरिण्याः समारोहात् सहजैवोजसः स्थितिः।
सैव लुप्तविसर्गान्तैः प्रयात्यत्यन्तमुन्नतिम्।। २.३१।।

1. वृ.र. पृ. १०७-११०.

यदा अस्मिन् छन्दसि पदानि व्यस्तानि भवन्ति अर्थात् असमस्तपदावली भवति तदा अस्य वृत्तस्य स्वरूप एव नष्टो भवति। यथा मौक्तिकमाला सूत्रनष्टेन विशोभां याति तद्वित् इति। तद्यथा क्षेमेन्द्रस्य वचने -

शिखरिण्याः पदैश्छिन्नैः स्वरूपं परिहीयते।
मुक्तालतायाः निःसूत्रमुक्तैर्मुक्ताफलैरिव।। २.३३।। इति।

शिखरिण्याः प्रयोगे संस्कृतकविषु भवभूतिरेव सर्वश्रेष्ठः इति रोजशेखरो मनुते। अपि भवभूतिशिखरिणी स्वच्छन्दनदीप्रवाहवत्, मेघानां दर्शनेन मयूरीव घनैः समासपदावलीभिः युक्ता शिखरिणी अधिकसौन्दर्यं पौषयति।

भवभूतेः शिखरिणी निरर्गलतरङ्गिणी।
रुचिरा घनसन्दर्भे या मयूरीव नृत्यति।। ३.३३।। इति।

२. पृथ्वी[1] :- जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। (ज-स-ज-स-य-ल.ग)।

यस्य प्रतिचरणं ज-स-ज-स-य-ल-ग गणाः भवन्ति तद्वृत्तं 'पृथ्वी' इति उक्ता। वसुभिः - अष्टभिः, ग्रहैः नवभिश्च यतिः विरामः भवति। तद्यथा -

ज	स	ज	स	य	ल ग
IUI	IIU	IUI	IIU	IUU	IU
भ्रमद्ग	रुडप	क्षतिप्र	विपुला	तपत्र	च्छटा
निराकृ	तदुरा	तपस्स्व	पिति भो	गिसार्थ	स्सुखम्।
गभीर	गिरिका	ननाक्र	मणजं	च पङ्क्रा	ननाः
श्रमं प्र	शमय	न्त्यमी च	टुलद	न्तिकर्णा	निलैः।। प्रद्यु. १.२२।।

श्लोकोऽयं ज-स-ज-स-य-ल-ग इति गणोपेतः प्रत्येकस्मिन् पादे सप्तदशाक्षराणि भवन्ति। अत इयं पृथ्वी। श्रुतबोधे अस्य लक्षणम् -

द्वितीयमलिकुन्तले गुरुषडष्टमद्वादशं,
चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे।
सपञ्चदशमान्तिमं तदनु यत्र कान्ते यति-
र्गिरीन्द्रफणिभृत् कुलैर्भवति सुभ्रु पृथ्वी हि सा।। इति।

1. वृ.र. पृ. ११०-११२.

क्षेमेन्द्रस्तु - **असमासः पदैर्भाति पृथ्वी पृथ्वी पृथक् स्थितैः।**
समासग्रन्थिभिः सैव याति संकोचखर्वताम्।। २.२७।।

अपि च पृथ्वीछन्दः आकारेण गम्भीरम् ओजोगुणवर्धनवर्णैः असमासैः युक्तमपि दीर्घतां प्राप्नोति।

पृथ्वी साकारगम्भीरैः ओजः सर्जिभिरक्षरैः।
समासग्रन्थियुक्तापि, याति प्रत्युत दीर्घताम्।। २.२८।।

पुनः श्च क्षेमेन्द्रः कथयति - पृथ्वीछन्दसः प्रयोगः आक्षेपेण सह क्रध-धिक्कारादिषु उपयुक्तो भवति। **साक्षेपक्रोधधिक्कारे, परं पृथ्वीभरक्षमा।। ३.२१।।** इति।

४. हरिणी[1] :- रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा। ३-९६। (न-स-म-र-स-ल.ग)

छन्दसः प्रतिचरणं न्सौ= नगण-सगणौ, म्रौ= मगण-रगणौ, स्लौ= सगणो लघुश्च, गः गुरुश्च यदा, तदा **हरिणी** इति नाम वृत्तं भवति। रसैः षड्भिः, युगैः चतुर्भिहयैः सप्तभिः, यतिरिति शेषः।

न	**स**	**म**	**र**	**स**	**लग**
I I I	**I I U**	**U U U**	**U I U**	**I I U**	**I U**
परुष	**तपन**	**द्योताश्ले**	**षोन्मिषद्**	**घृणिम**	**द्रुष-**
ज्ज्वलन	**चकितो**	**भल्लूकोऽ**	**यं प्रवि**	**श्य लता**	**गृहम्।**
रटति	**कठिनं**	**श्रुत्वा त**	**द्रन्ध्रनि**	**र्गतगू**	**ढपान्**
मकुट	**मणिषु**	**ज्वालामो**	**हात्ततोऽ**	**पि पला**	**यते।। प्रद्यु. १.६०।।**

श्लोकोऽयं न-स-म-र-स-ल-ग इति गणाोपेतः, प्रत्येकः पादः सप्तदशाक्षरयुक्तः। षट्सु, चतुर्षु, सप्तषु च त्रिषु स्थानेषु यतिः विराजते। अतोऽयं श्लोकः हरिणी। श्रुतबोधे अस्य वृत्तस्य लक्षणम् -

1. वृ.र. पृ. ११२-११४.

सुमुखि लघवः पञ्च प्राच्यास्ततो दशमान्तिकम्,
तदनु ललितालापे! वर्णौ तृतीय-चतुर्थकौ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे !
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा।।

क्षेमेन्द्रस्तु- शीघ्रतायाः कारणेन चाञ्चल्ययुक्तता, असमितैः लघुलघुपदैश्च हरणी मनोहरणी भवति। किन्तु यदा मन्दगतिः अस्य तदा जीवनरहितमिव असुन्दरं भाति। इति लक्षयत्यत्र-

त्वरा तरलविच्छेदैर्विभाति हरिणी पदैः।
मन्थरैर्ग्रन्थिबद्धेव याति निःस्पन्दसङ्गताम्।। इति। अपि च-

त्रिषु पादेषु विश्रान्तविलासैर्ललितापदैः।
अन्ते तरङ्गितगतिर्हरिणी हारिणीतराम्।।

यदि त्रिषु पादेषु विश्रान्तत्वेन ललितैः पदैः भूत्वा चतुर्थपादे शीघ्रता अथवा तरङ्गवद्चाञ्चल्यं भवति तर्हि तादृशी हरिणी अत्यन्तमनोहारिणी भवति - इति।

हरिणीवृत्तस्य प्रयोगः उदारतायाः रुचिर-औचित्यविचारे समुचितं भवति इति क्षेमेन्द्रः लिखति- **औदार्यरुचिरौचित्यविचारे हरिणी वरा। ३.२०।।** इति।

५. मन्दाक्रान्ता[1] :-

मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्। (म-भ-न-त-त-ग.ग)।

यदिम्भौ= मगण-भगणौ, नतौ= नगण-तगणौ, तात्= तगणात्, ऊर्ध्वमिति शेषः, गुरु- गुरुद्वयं, प्रतिचरणं स्यात्, तदा "मन्दाक्रान्ता" इति नाम छन्दो भवति। मन्दाक्रान्तायां चतुर्थ-षष्ठ-सप्तमाक्षराणि यतिस्थानानि भवन्ति।

1. वृ.र. पृ. ११४-११७.

म	**भ**	**न**	**त**	**त**	**ग ग**
U U U	**U I I**	**I I I**	**U U I**	**U U I**	**U U**
फाले य	**स्य स्फुर**	**ति तिल**	**कः प्रज्व**	**लत्पाव**	**कात्मा**
कण्ठोद्दे	**शे कटु**	**विषम**	**यी भाति**	**कस्तूरि**	**का च।**
अङ्गे भू	**षाविष**	**धरप**	**टल्यम्म**	**यी मूर्ध्नि**	**माला**
तस्मिन् भ	**स्मीकृत**	**मनसि**	**जे विस्म**	**यः कस्य**	**न स्यात्।। प्रद्यु.१.२९।।**

प्रस्तुतश्लोके प्रत्येकस्मिन् पादे सप्तदश वर्णाः सन्ति। प्रत्येकऽस्मिन् चरणे म-भ-न-त-त-ग-ग इति गणाः सन्ति। श्रुतबोधे अस्य लक्षणम् -

चत्वारः प्राक्सुतनु गुरवो द्वादशैकादशौ चे-
मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां सङ्गिरन्ते।।

मन्दाक्रान्ताछन्दोऽपि संस्कृतकविप्रियछन्दः वर्तते। महाकविः कालिदासः मेघदूताख्ये खण्डकाव्ये सम्पूर्णतया अस्मिन् वृत्ते एव रचना जाता। एतेन जानीमः यत् कालिदासः मन्दाक्रान्ताप्रयोगे सुनिपुणः इति। एकस्मिन् वृत्ते ग्रन्थपूरणं तु यस्य कस्यापि कवेः किञ्चित् दुष्करमेव। किन्तु कालिदासः अलौकिकप्रतिभया मधुर-भावमय-चित्ताकर्षकरूपरचनां व्यधात्सीत्। मन्दाक्रान्तायाः सौन्दर्यविषये क्षेमेन्द्रः -

मन्थराक्रान्तविस्रब्धैश्चतुर्भिः प्रथमाक्षरैः।
मध्यषट्केऽतिचतुरे मन्दाक्रान्ता विराजते।।

मन्देन आक्रन्दनम् मान्दाक्रान्ता इति। अतः प्रथमं वर्णविन्यासः मन्दगत्या भवेत् अनन्तरगतिः तु शीघ्रं भवेत्। मन्दाक्रान्तायाः प्रयोगः वर्षा-प्रवासव्यसनादिविरहेबाधावर्णने सूपयोगः - **प्रावृट् प्रवासव्यसने मन्दाक्रान्ता विराजते।** इति। काम्बोजदेशाश्ववत् सुशिक्षकस्य (कालिदासस्य) हस्ते पतिता सती सुन्दरगत्या चलति। क्षेमेन्द्रः सुवृत्ततिलकाख्ये ग्रन्थे प्रकटयति -

सुवशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति।
सदश्वदमकस्येव काम्बोजतुरगाङ्गना।। ३.३४।। इति।

१६. नर्कुटकम्[1] :- **हयदशभिर्नजौ भजजला गुरुनर्कुटकम्।। ३-९८।।** यस्य प्रतिचरणं न-ज-भ-ज-ज-ल-ग इति गणोपेतं भवति तत् वृत्तं नर्कुटकम् इति उक्ता। उदा-

न	ज	भ	ज	ज	ल ग
I I I	**I U I**	**U I I**	**I U I**	**U I I**	**I U**
गहन	**गुहावि**	**हारिह**	**रिगर्ज**	**नजर्ज**	**रित-**
स्तिमित	**शयान**	**कायम**	**पि सिन्धु**	**रबृन्द**	**मिदम्।**
क्षणम	**ळयो वि**	**लम्ब्य पृ**	**थुलोप**	**लसंश**	**यतः**
पुनर	**भितः प**	**तन्ति म**	**दगन्ध**	**गळद्वि**	**शयाः।।प्रद्यु.१.४८।।**

श्लोकोऽयं न-ज-भ-ज-ज-ल-ग इति गणोपेतः प्रत्येकस्यिन् पादे सप्तदशाक्षराणि भवन्ति। अतः श्लोकोऽयं नर्कुटकम्।

❁ १८. धृतिः (१८ वर्णाः) ❁

१. कुसुमलतावेल्लिता :- स्याद्भूतर्त्वश्वैः कुसुमलतावेल्लिता म्तौ नयौ यौ।। १००।।

(म-त-न-य-य-य)। भूतानि - पञ्च, ऋतवः - षट्, अश्वाः - सप्त इति यतिनियमः।

1. वृ.र. पृ. ११७-११८.

❁ १९. अतिधृतिः (१९ वर्णाः) ❁

अतिधृतिः इति नामकजातौ एकमेव छन्दः वर्तते। शार्दूलविक्रीडितम् इति नाम्ना सुप्रसिद्धः। वृत्तेऽस्मिन् प्रत्येकस्मिन् पादे एकोनविंशतिवर्णाः भवेयुः। संस्कृतसाहित्ये अस्य प्रयोगः अत्यन्तप्रसिद्धः विद्यते।

१९.१. शार्दूलविक्रीडितम्[1] (छन्दः/वृत्तम्) **सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।** (३-१०१) इति। (म-स-ज-स-त-त-ग)

यस्य प्रतिचरणं सगुरुः = एकेन गुरुणा सहिताः, मसजसततगाः= मगणः, सगणः, जगणः, सगणः, तगणः तगणः गुरुश्च स्युः। प्रत्येकस्मिन् पादे एकोनविंशतिवर्णाः भवेयुः। सूर्यैः = (१२) द्वादशभिः, अश्वैः = (७) सप्तभिः, च **यतिः** भवति। अर्थात् सप्तम द्वादशतमवर्णानन्तरं यतिः नाम विरामः भवति। एतादृशलक्षणैर्लक्षितं वृत्तं **'शार्दूलविक्रीडितम्'** इत्युच्यते। श्रुतबोधे अस्य वृत्तस्य लक्षणमित्थं वर्तते -

आद्यं यत्र गुरुत्रयं प्रियतमे! षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः।
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितम्।। ४२।।

संस्कृतसाहित्ये शार्दूलविक्रीडितं वृत्तं सुप्रसिद्धमस्ति। यत्र युद्धवर्णनप्रसङ्गः भवति, यत्र च निराशाजनेषु आशाजननावश्यकता वर्तते तत्र समासगर्भया समसितपदावल्या च अभीष्टस्य अस्य वृत्तस्य प्रयोगः कविगणैः क्रियते। संस्कृतसाहित्ये भवभूतिः-राजशेखर-भट्टनारायण-श्रीहर्षादिमहाकवयः अस्य छन्दसः व्यवहारः स्वनाटकेषु काव्येषु सुन्दरतया अकुर्वन्। क्षेमेन्द्रेण शार्दूलविक्रीडितस्य गुण-दोषविवेचनं स्वग्रन्थे सुवृत्ततिलके विस्तृततया कृतम्। तद्यथा-

साकाराद्यक्षरैः पादपर्यन्तैः सवसर्गकैः।
शार्दूलक्रीडितं धत्ते तेजो जीवितमूर्जितम्।। २-३५।। इति।

---

1. वृ.र. पृ. ११९-१२३.

अनेन ज्ञायते यत् - अस्मिन् शार्दूलविक्रीडितवृत्ते यदि आद्यक्षरम् आकारेण युक्तः पादस्यान्तिमवर्णश्च विसर्गेण सह युक्तः तर्हि तादृशं अत्यन्तम् ओजोगुणविशिष्टं भवति। पुनश्च क्षेमेन्द्रः वक्ति-

विसर्जनीयस्योत्वेन, पदैर्निम्नोन्नतैरिव।
शार्दूलक्रीडितं याति, पाठे सायासतामिव।। २-३६।। इति।

अस्मिन् वृत्ते यदि विसर्गं सन्धिवशात् ओत्वं कुर्यामः तर्हि तत् परुषतया उच्चारणीयो भवेत्। अतः एतादृशगुणैर्युक्तः अत्युत्तमश्लोको भवति। अपि च -

विच्छिन्नपादं पूर्वार्द्धे, द्वितीयार्धे समासवत्।
शार्दूलक्रीडितं भाति विपरीतमतोधमम्।। २-३७।।

क्षेमेन्द्रः कथयति - यदि शार्दूलविक्रीडितवृत्ते पूर्वार्द्धश्लोकः अर्थात् प्रथमपादद्वये विविक्तपदत्वं अर्थात् पदेषु, पादेषु च विच्छिन्नत्वं (पृथक्त्वं) उत्तरार्धे च समासेन युक्तत्वं पादयोः सम्भवति तर्हि तादृशं वृत्तम् अत्यन्तं सुन्दरं मनोरञ्जकं च भवति। एतादृशलक्षण-वीपरीतम् अधमं भवति - इति।

आद्यन्तयोर्गुणोत्कर्षकान्त्या सर्वातिशायिनोः।
शार्दूलक्रीडितं धत्ते, मन्ये तद्गौरवोन्नतिम्।। ३-३८।।

आद्यन्तयोः पादयोः गुणस्य उत्कर्षः भवति चेत् शार्दूलविक्रीडतवृत्तस्य गौरवं द्विगुणोन्नतं भवति।

आद्यन्ताकारविरहात् पर्यन्ते चाविसर्गतः।
शार्दूलक्रीडितं स्वस्य रूपं नैवोपलभ्यते।। ३-३९।।

अत्र च कथयति यदि अस्मिन् वृत्ते आदौ अन्ते च आकारस्य अभावः दृश्यते तथैव आदौ अन्ते च विसर्गाभावः तर्हि स्ववास्तविकस्वरूपमेव न प्राप्नोति। अर्थात् असुन्दरं भवति। अपि च नृपादीनां वीरतायाः प्रशंसायाम् इदं छन्दः अत्यन्तसुन्दरं भवति तद्यथा -

शौर्यस्तवे नृपादीनां शार्दूलविक्रीडितं मतम्। इति।

संस्कृतसाहित्ये कविषु राजशेखरस्य तादृशीकीर्तेः कारणं शार्दूलविक्रीडितछन्दसः प्रयोगः एव इति द्रढीयं विश्वासं प्रकटयति -

शार्दूलविक्रीडितैरेव प्रख्यातो राजशेखरः।
शिखरीव परं वक्रैः सोल्लेखैरुच्चशेखरः।। इति।

अथ श्रीमद्वेङ्कटाध्वरिविरचितस्य प्रद्युम्नान्दीयनाटकस्य मङ्गलश्लोके -

	म	स	ज	स	त	त	ग
	U U U	**I I U**	**I U I**	**I I U**	**U U I**	**U U I**	**U**
१.	**श्रीमद्धा**	**मसमा**	**मनन्ति**	**कमलं**	**तष्टान्ध**	**वं वा य**	**यो-**
	U U U	**I I U**	**I U I**	**I I U**	**U U I**	**U U I**	**U**
२.	**रक्षीन्दी**	**वररू**	**पमाहु**	**रथवा**	**तष्टन्धु**	**रूपं बु**	**धाः।**
	U U U	**I I U**	**I U I**	**I I U**	**U U I**	**U U I**	**U**
३.	**सावर्ण्यं**	**तटिता**	**वपुश्शु**	**भतरं**	**धत्तेऽथ**	**वा तद्व**	**ता**
	U U U	**I I U**	**I U I**	**I I U**	**U U I**	**U U I**	**U**
४.	**भूयास्तां**	**भुजगे**	**न्द्रशैल**	**वसती**	**तौ दम्प**	**ती सम्प**	**दे।। १-१।।**

उदाहरणश्लोके चतुर्षु पादेषु क्रमशः म-स-ज-स-त-त-ग इति गणाः सन्ति। प्रत्येकस्मिन्नपि पादे द्वादशवर्णेषु यति स्थानं वर्तते। प्रत्येकचरणे एकोनविंशति-अक्षराणि भवन्ति। अत इदं शार्दूलविक्रीडितम्।

एवं नाटकेऽस्मिन् प्रद्युम्नानन्दीये प्रथमाङ्के ५, ६, ८, १०, ११, १२, १४, १५, २० इत्यादि अत्रैव अन्ते दत्तपट्टिकायां (पृष्ठसंख्या ३९, ४० च) द्रष्टव्यः।

❀ २०. कृतिः (२० वर्णाः) ❀

१. सुवदना :- **ज्ञेया सप्ताश्वषड्भिर्मरभनययुताभ्लौ गः सुवदना।** (म-र-भ-न-य-भ-ल-ग)।

यत्र मगण-रगण-भगण-नगण-यगण-भगणैः लघुगुरुभ्यां च सुवदना नाम वृत्तं भवति। सप्तभिः षड्भिः च यतिः भवति। प्रद्युम्नानन्दीये द्वितीयमङ्गलश्लोके स्रग्धरा यथा-

२. वृत्तम् :- **त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्त नाम।** (र-ज-र-ज-र-ज-ग.ल)

त्रिवारं रगण-जगणैः गुरुलघुभ्यां च विलसितं वृत्तं **"वृत्तम्"** इति नाम्ना व्यवह्रियते। अस्मिन् वृत्तनामकवृत्ते पादान्ते एव यतिः विरामः भवति।

❁ २१. प्रकृतिः (२१ वर्णाः) ❁

१. स्रग्धरा[1] :- म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्। (म-र-भ-न-य-य-य)।

यत्र मगण-रगण-भगण-नगण-यगण त्रयं विद्यते, एवमेव **प्रति सप्तमाक्षरे** यतिः च भवेत्, तत् स्रग्धरा नाम छन्द इति भावः। प्रत्येकस्मिन् पादे एकविंशत्यक्षराणि भवन्ति।

प्रद्युम्नानन्दीये द्वितीयमङ्गलश्लोके स्रग्धरा यथा-

म	र	भ	न	य	य	य
U U U	**U I U**	**U I I**	**I I I**	**I U U**	**I U U**	**I U U**
कृष्णेन	**स्नानके**	**ळौ वस**	**नमप**	**हृतं या**	**चमाना**	**स्सलज्जं**
कालिन्द्यां	**गोपक**	**न्याः प्रह**	**सितुम**	**परास्वा**	**गतास्व**	**ङ्गनासु।**
तं दृष्ट्वा	**लोभनी**	**यं स्मर**	**विवश**	**तया स्र**	**स्तवस्त्रा**	**सु तौल्यात्**
सानन्दाः	**पश्यत**	**स्ताः कल**	**यतु कु**	**शलं त**	**स्य मन्द**	**स्मितं नः।। प्रद्यु. १.२।।**

अस्मिन् श्लोके चतुर्षु पादेषु एकविंशति वर्णाः सन्ति। प्रत्येकऽस्मिन् चरणे म-र-भ-न-य-य-य इति गणाः वर्तन्ते। एवमेव प्रति सप्तमाक्षरे यति स्थानं भवति। अतः श्लोकोऽयं स्रग्धरा।

❁ २२. आकृतिः (२२ वर्णाः) ❁

१. भद्रकम् :- **भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिति।** (भ-र-न-र-न-र-न-ग)।

यत्र भगण-रगण-नगण-रगण-नगण-रगण-नगणैः गुरुणा च भद्रकं नाम वृत्तं भवति। दिशसु अर्काः नाम द्वादशसु च यतिः भवति।

1. वृ.र. पृ. १२५

❁ २३. विकृतिः (२३ वर्णाः) ❁

१. अश्वललितम् :- **यदिह नजौ भजौ भ्जभलगास्तदश्वललितं हरार्कयतिमत्।**
(न-ज-भ-ज-भ-ज-भ-ल.ग)।

यत्र नगण-जगण-भगण-जगण-भगण-जगण-भगणैः लघु-गुरुभ्यां च अश्वललितं नाम वृत्तं भवति। दिशसु अर्काः नाम द्वादशसु च यतिः भवति।

२. मत्ताक्रीडा :- **मत्ताक्रीडा मौ त्नौ नल्गिति भवति वसुशरदशयतियुता।**
(म-म-त-न-न-न-न-ल.ग)।

यत्र मगण-मगण-तगण-नगण-नगण-नगण-नगणैः लघु-गुरुभ्यां च मत्ताक्रीडा नाम वृत्तं भवति। वसवः- अष्टौ, शराः - पञ्च दश च तेषु विरामयुक्ता मत्ताक्रीडा नाम वृत्तं भवति।

❁ २४. सङ्कृतिः (२४ वर्णाः) ❁

१. तन्वी :- **भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी।**
(भ-त-न-स-भ-भ-न-य)।

यत्र भगण-तगण-नगण-सगण-भगण-भगण-नगण-यगणैः युक्ता **तन्वी** नाम वृत्तं भवति। भूतानि - पञ्च, मुनयः - सप्त, इनाः - द्वादश सूर्याः। अतः एतेषु (५-७-१२) वर्णेषु यतिः भवति।

❁ २५. अतिकृतिः (२५ वर्णाः) ❁

१. क्रौञ्चपदा :- **क्रौञ्चपदाभ्मौ स्भौ ननना न्गाविषुशरवसुमुनि विरतिरिह भवेत्।**
(भ-म-स-भ-न-न-न-न-ग)।

यत्र भगण-मगण-सगण-भगण-नगण-नगण-नगण-नगणैः गुरुणा युक्ता **क्रौञ्चपदा** नाम वृत्तं भवति। इषवः - पञ्च, शराः - पञ्च, वसवः - अष्ट, मुनयः - सप्त। अतः एतेषु (५-५-८-७) वर्णेषु विरामः भवति।

२. भुजङ्गविजृम्भितम् :- **वस्त्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम्।**
(म-म-त-न-न-न-र-स-ल.ग)

यत्र मगण-मगण-तगण-नगण-नगण-नगण-रगण-सगणैः लघ-गुरुभ्यां युक्तं **भुजङ्गविजृम्भितम्** नाम वृत्तं भवति। वसवः - अष्ट, ईशाः - एकादश, अश्वाः - सप्त। अतः एतेषु (८-११-७) वर्णेषु विरामः भवति।

३. अपवाहकम् :- **मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम्।**
(म-न-न-न-न-न-न-स-ग-ग)

यत्र मगण-नगण-नगण-नगण-नगण-नगण-नगण-सगणैः गुरुद्वयेन युक्तम् **अपवाहकम्** नाम वृत्तं भवति। नवभिः षड्भिः, पुनः षड्भिः पञ्चभिः च (९-६-६-५) वर्णेषु विरामः भवति।

४. दण्डकः :- **यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रतापो भवेद्दण्डकः।** (न-न-र-र-र-र-र-र-र) यत्र नगण-नगण-रगण-रगण-रगण-रगण-रगण-रगण-रगणैः युक्तम् **दण्डकः** नाम वृत्तं भवति। एतादृशगणोपेतं वृत्तं दण्डकम् इति उक्ता। उदा–

प्रचलि	तकरि	कृत्तिप	र्यन्तय	च्यन्नखा	घातभि	न्नन्दु	नि ष्यन्दया	नाभृत श्रये	
III	**III**	**UIU**	**UIU**	**UIU**	**UIU**	**UIU**	**UIU**	**UIU**	
न	**न**	**र**	**र**	**र**	**र**	**र**	**र**	**र**	(५-२३)

श्लोकोऽयं न-न-र-र-र-र-र-र-र इति गणोपेतः। प्रत्येकस्मिन पादे सप्तविंशत्यक्षराणि भवन्ति। अतः श्लोकोऽयं दण्डकम् इति उक्ता।

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः।

दण्डकवृत्ते प्रत्येकस्मिन् पादे द्वौ नगणौ ततः एकैकस्य रगणस्य वृद्धिः स्यात्। यस्मिन् वृत्ते द्वौ नगणौ अष्टरगणाः च विद्यन्ते तं वृत्तम् **अर्णाख्यः** भवति। यस्मिन् वृत्ते द्वौ नगणौ नवरगणाः च विद्यन्ते तं वृत्तम् **अर्णवः** इति कथ्यते। यस्मिन् वृत्ते द्वौ नगणौ दशरगणाः च विद्यन्ते तं वृत्तम् **व्यालः** भवति।

यस्मिन् वृत्ते द्वौ नगणौ एकादश रगणाः च विद्यन्ते तं वृत्तं **जीमूतः** भवति। यस्मिन् वृत्ते द्वौ नगणौ द्वादशरगणाः च विद्यन्ते तं वृत्तं **लीलाकरः** भवति। यस्मिन् वृत्ते द्वौ नगणौ त्रयोदश रगणाः च विद्यन्ते तं वृत्तम् **उद्दामः** भवति। यस्मिन् वृत्ते द्वौ नगणौ चतुर्दश रगणाः च विद्यन्ते तं वृत्तं **शंखः** इति गीयते।

१. द्वौ नगणौ + सप्त रगणाः	= दण्डकः
२. द्वौ नगणौ + अष्टौ रगणाः	= अर्णाख्यः
३. द्वौ नगणौ + नव रगणाः	= अर्णवः
४. द्वौ नगणौ + दश रगणाः	= व्यालः
५. द्वौ नगणौ + एकादश रगणाः	= जीमूतः
६. द्वौ नगणौ + द्वादश रगणाः	= लीलाकरः
७. द्वौ नगणौ + त्रयोदश रगणाः	= उद्दामः
८. द्वौ नगणौ + चतुर्दश रगणाः	= शंखः

२. वर्णच्छन्दसि

२.२. अर्धसमवृत्तप्रकरणम्

तृतीयाध्याये समवृत्तान्यभिधाय साम्प्रतमर्धसमवृत्तानि वर्णयति श्रीकेदारभट्टः।

१. उपचित्रा :- **विषमे यदि सौ सलगा दले भौ युजि भाद् गुरुकावुपचित्रम्।**

यदि विषमपादयोः नाम प्रथम-तृतीयपदयोः **स-स-स-ल.ग-**गणाः भवेयुः, समपादयोः अर्थात् द्वितीय-चतुर्थपादयोः **भ-भ-भ-ग.ग-**गणाः च भवेयुः तर्हि तादृशं वृत्तम् उपचित्रा इति नाम्नाऽभिधीयते।

२. द्रुतमध्या :- **भत्रयमोजगतं गुरुणी चेत् युजि च नजौ ज्ययुतौ द्रुतमध्या।**

यदि ओजगतं नाम विषमपादगतं **भ-भ-भ-ग.ग-**गणाः स्युः, समपादयोः **न-ज-ज-य-**गणाः स्युः तर्हि द्रुतमध्या नाम वृत्तं भवति।

३. वेगवती :- **सयुगात् सगुरू विषमे चेत् भाविह वेगवती युजि भाद् गौ।**

यदि विषमपादयोः **स-स-स-ग-**गणाः (१० वर्णाः) स्युः, समपादयोः च **भ-भ-भ-ग.ग-**गणाः (११ वर्णाः) स्युः तर्हि तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे वेगवती नाम्ना अभिधीयते।

४. भद्रविराड् :- **ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ ग् भद्रविराड् भवेदनोजे।**

यदि विषमपादयोः **त-ज-र-ग-**गणाः (१० वर्णाः) स्युः, समपादयोः च **म-स-ज-ग.ग-**गणाः (११ वर्णाः) स्युः तर्हि तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे भद्रविराट् नाम्ना अभिधीयते।

५. केतुमती :- **असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः।**

यदि असमे अर्थात् विषमपादयोः **स-ज-स-ग-**गणाः (१० वर्णाः) स्युः, समपादयोः च **भ-र-न-ग.ग-**गणाः (११ वर्णाः) स्युः तर्हि तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे केतुमती नाम्ना अभिधीयते।

६. आख्यानकी :- **आख्यानकी तौ जगुरु ग ओजे जतावनोजे जगुरू गुरुश्च।**

यदि ओजे अर्थात् विषमपादयोः **त-त-ज-ग.ग-**गणाः (११ वर्णाः) स्युः, समपादयोः च **ज-त-ज-ग.ग-**गणाः (११ वर्णाः) स्युः तर्हि तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे आख्यानकी इति नाम्ना अभिधीयते। इत्थं प्रथम-तृतीयपादयोः इन्द्रवज्रा (त-त-ज-ग.ग), द्वितीय-तृतीयपादयोः उपेन्द्रवज्रा (ज-त-ज-ग.ग) यदि स्यातां तर्हि आख्यानकी इति वक्तुं शक्यते। एतद्वृत्तम् उपजातेः एव भेदः अस्ति। किन्तु विशेषसंज्ञायै अर्धसमवृत्तप्रकरणे उल्लेखितः।

७. विपरीतपूर्वा :- **जतौ जगौ गो विषमे समे चेत् तौ ज्गौ ग एषा विपरीतपूर्वा।**

यदि विषमपादयोः **ज-त-ज-ग.ग-**गणाः (११ वर्णाः) स्युः, समपादयोः च **त-त-ज-ग.ग-**गणाः (११ वर्णाः) स्युः तर्हि तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे विपरीतपूर्वाख्यानकी (विपरीताख्यानकी) इति नाम्ना अभिधीयते। इत्थं प्रथम-तृतीयपादयोः उपेन्द्रवज्रा (ज-त-ज-ग.ग), द्वितीय-तृतीयपादयोः इन्द्रवज्रा (त-त-ज-ग.ग) यदि स्यातां तर्हि विपरीताख्यानकी इति वक्तुं शक्यते। एतद्वृत्तम् उपजातेः एव भेदः अस्ति। किन्तु विशेषसंज्ञायै अर्धसमवृत्तप्रकरणे उल्लेखितः।

८. हरिणप्लुता :- **सयुगात् सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता।**

यदा विषमपादयोः **स-स-स-ल.ग-**गणाः (११ वर्णाः) भवन्ति, समपादयोः च **न-भ-भ-र-**गणाः (१२ वर्णाः) भवन्ति तदा तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे हरिणप्लुता इति नाम्ना व्यवह्रियते।

९. अपरवक्त्रम् :- अयुजि ननरला गुरुः समे न्जमपरवक्त्रमिदं ततो जरौ।

यदा अयुजि अर्थात् विषमपादयोः **न-न-र-ल.ग-**गणाः (११ वर्णाः) भवन्ति, युजि नाम समपादयोः च **न-ज-ज-र-**गणाः (१२ वर्णाः) भवन्ति तदा तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे अपरवक्त्रम् इति नाम्ना व्यवह्रियते। वैतालीयस्य अन्तर्गतं भवत्यपि प्रत्येकसंज्ञाकरणाय अत्र उल्लेखः।

प्रस्तुतप्रद्युम्नानन्दीये नाटके अस्मिन् छन्दसि प्रयुक्तश्लोकः -

	न	**न**	**र**	**ल.ग**	
	I I I	**I I I**	**U I U**	**I U**	**= 11**
१.	**विरहि**	**जणक**	**दे वणं**	**पिओ**	**- भद्रिका**
	न	**ज**	**ज**	**र**	
	I I I	**I U I**	**I U I**	**U I U**	**= 12**
२.	**विसड**	**सरोव**	**अएंक**	**सूअओ। - मालती**	
	न	**न**	**र**	**ल.ग**	
	I I I	**I I I**	**U I U**	**I U**	**= 11**
३.	**सुदिसु**	**हसुह**	**गाणदं**	**खिणो**	**- भद्रिका**
	न	**ज**	**ज**	**र**	
	I I I	**I U I**	**I U I**	**U I U**	**= 12**
४.	**पविस**	**दि पंव**	**दकाण**	**णतर।। - मालती।। १-१९।।**	

९.१०. पुष्पिताग्रा[1] :- अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।

यदा अयुजि अर्थात् विषमपादयोः **न-न-र-य-**गणाः (१२ वर्णाः) भवन्ति, युजि नाम समपादयोः च **न-ज-ज-र-ग-**गणाः (१३ वर्णाः) भवन्ति तदा तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे **पुष्पिताग्रा** इति नाम्ना आख्यायते। **इदमत्रावधेयम्।** इदं वृत्तम् अर्धसमवृत्तं भवति। अर्थात् अस्मिन् श्लोके प्रथमतृतीयपादौ, द्वितीय-चतुर्थपादौ च समानाः भवन्ति। तदसमवृत्तमिति च कथ्यते। प्रथमतृतीयपादयोः न-न-र-य, द्वितीयचतुर्थपादयोः न-ज-ज-र-गु इति गणाः भवन्ति। पुष्पिताग्रा छन्दसि प्रथमतृतीयपादयोः द्वादशवर्णाः द्वितीयचतुर्थपादयोः त्रयोदशवर्णाः भवन्ति। इति।

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा।।

विद्वासः अपरवक्त्राख्यं वृत्तं वैतालीयं वदन्ति। तथा केचन पण्डिताः पुष्पिताग्राभिधं औपच्छन्दसिकं वदन्ति - इति अस्य भावः।

1. वृ.र. पृ. १३८.

	न	**न**	**र**	**य**	
	I I I	**I I I**	**U I U**	**I U U**	
१.	**कमल**	**विशिख**	**देवसि**	**द्धिमन्त्रः**	
	न	**ज**	**ज**	**र**	**ग**
	I I I	**I U I**	**I U I**	**U I U**	**U**
२.	**कमपि**	**रसं कि**	**ल कर्ण**	**योर्दुहा**	**नः।**
	न	**न**	**र**	**य**	
	I I I	**I I I**	**U I U**	**I U U**	
३.	**कबळ**	**यति हृ**	**दा सहै**	**व कोऽयं**	
	न	**ज**	**ज**	**र**	**ग**
	I I I	**I U I**	**I U I**	**U I U**	**U**
४.	**कलव**	**लयध्व**	**निरध्व**	**नि क्रमं**	**न :।। ६५।।**

श्लोकेऽस्मिन् प्रथमतृयतीयोः न-न-र-य द्वितीयचतुर्थयोः न-ज-ज-र-गु इति गणाः सन्ति। प्रथमतृतीयापादयोः द्वादशवर्णाः, द्वितीयचतुर्थपादयोः त्रयोदशवर्णाः सन्ति। उपर्युक्तपुष्पिताग्रा लक्षणं अस्मिन् श्लोके घटितम्। अतः इयं पुष्पिताग्रा।

११. यवमती :- स्यादयुग्मके रजौ रयौ समे चेत् जरौ जरौ गुरुर्यवात्परा मतीयम्।

यदा अयुग्मके अर्थात् विषमपादयोः **र-ज-र-य-**गणाः (१२ वर्णाः) भवन्ति, युग्मके च नाम समपादयोः च **ज-र-ज-र-ग-**गणाः (१३ वर्णाः) भवन्ति तदा तद्वृत्तम् अस्मिन् छन्दश्शास्त्रे **यवमती** इति नाम्ना अभिधीयते।

१२. मालभारिणी (वसन्तमालिका) (वृत्तरत्नाकरे नास्ति।)

लक्षणम् :- विषमे ससजा गुरु समे चेत् सभरा येन तु मालभारिणीयम्।

प्रथमतृतीयपादयोः एकादशवर्णानि, स-स-ज-ग-ग इति गणाः, द्वितीयचतुर्थपादयोः द्वादशवर्णानि स-भ-र-य इति गणाः, द्वितीयचतुर्थपादयोः द्वादश वर्णानि स-भ-र-य इति गणाः यत्र भवन्ति। अतः इयं तद्वृत्तं मालभारिणी इति कथ्यते।

स	**स**	**ज**	**ग ग**	**- इन्द्रवज्रा**
I I U	**I I U**	**I U I**	**U U**	**= 11**
परम	**प्रभयाऽ**	**तुलो क**	**लङ्कः**	**= 1 पादः**
स	**भ**	**र**	**य**	
I I U	**U I I**	**U I U**	**I U U**	**= 12**
कृतदा	**नश्च म**	**हाच्छवि**	**प्रहस्ते।**	**= 2**
स	**ज**	**ज**	**ग ग**	**- इन्द्रवज्रा**
I I U	**I I U**	**I U I**	**U U**	
भुवि भा	**ति विधू**	**तदूष**	**णश्री-**	**= 3**
स	**भ**	**र**	**य**	
I I U	**U I I**	**U I U**	**I U U**	
रघुना	**थार्यम**	**खी यथा र्थनामा**		**= 4*। १-९।।**

श्लोकेऽस्मिन् प्रथमतृतीयपादयोः एकादशाक्षराणि स-स-ज-ग-ग इति गणाः, द्वितीय-चतुर्थपादयोः द्वादशाक्षराणि स-भ-र-य इति गणाश्च सन्ति। अतः इदं वृत्तं मालभारिणीवृत्तम्।

अथ अनन्तरपुटे अङ्कशः श्लोकगतछन्दस्सूची दीयते।।

३. अङ्कशः श्लोकगतछन्दस्सूची

१. शार्दूलविक्रीडितम् :-

अङ्कः - I = १, ५, ६, ८, १०, ११, १२, १४, १५, २०, ३६, ३८, ४५, ५०, ५४, ६१, ७०, ७१, ७२, ७४, ७९, ८१, ८२, ९१.

अङ्कः - II = २८.

अङ्कः - III = ९, १४, १५, १६, १८, ३३, ४१, ५० ५१, ५२, ६७, ७३, ७४

अङ्कः - IV = **१,** ७, ११, १६, १७, २२, २७, ४२, ४४, ५४, ५५, ५६, ६२, ६३, ६८, ७१, ७३, ७४, ७८, ८४, ९१.

अङ्कः - V = ६, १०, १६, २४, २५, ३१, ३२, ३७, ३८, ४८, ५५, ५६, ६०, ६८, ७०, ७१, ७४, ७७, ८१, ८६, ८७, ८८, ९७.

अङ्कः - VI = १, ३, ४, ७, ३३, ३४

२. स्रग्धरा :-

अङ्कः - I = २, १६, ३५.

अङ्कः - III = २२, ७५.

अङ्कः - IV = २५, ३७, ३८, ३९, ४०, ९७, ९८, १०१

अङ्कः - V = २२, ४४, ७९.

अङ्कः - VI = ११, २२, २९, ३२.

३. अनुष्टुप् :-

अङ्कः - I = ३,४, २३, २४, ३३, ४०, ४१, ७७, ८४.

अङ्कः - II = ११, १२, १३, १४, १५, १६, १७, २३, ३२.

अङ्कः - III = ५३.

अङ्कः - IV = ९, १२, १५, १९, २६, २८, ३५, ४३, ४९, ५३, ८२.

अङ्कः - V = २८, ४२, ४६, ७३, ८५

अङ्कः - VI = २, १२, १३, ३०, ३५.

४. मालिनी :-

अङ्कः - I = ७, ४२, ५२, ५७, ६७, ९२.

अङ्कः - II = १, ९.

अङ्कः - III = ११, ४६, ५५, ६४, ७२.

अङ्कः - IV = ६, २९, ५२, ६४.

अङ्कः - V = १९, २७.

अङ्कः - VI = १५, २१, २३.

५. शिखरिणी :-

अङ्कः - I = १७, २१, ४३, ४४, ६२, ६९.

अङ्कः - III = २, ३६, ५९.

अङ्कः - IV = १८, ३१, ६६, ७५, ७६, ७७, ८८, ९०, ९३, १००.

अङ्कः - V = १, २, ५९, ६१, ६३, ६६.

अङ्कः - VI = ६, १०, १७, २६.

६. वसन्ततिलका :-

अङ्कः - I = १८, ३७, ३९, ५५, ५६, ७५, ८५, ८६, ९०.

अङ्कः - II = ३, ४, २४, २७, २९, ३४.

अङ्कः - III = ३, ४, ५, १२, २१, २७, २९, ३८, ४३, ४७, ७०.

अङ्कः - IV = ८, १३, २४, २१, ३४, ६७, ८६.

अङ्कः - V = ५, ७, १८, २०, २३, ४५, ५७, ६९, ७५, ८९, ९३, ९६.

अङ्कः - VI = ५, ९, १६, १९, २०.

७. अपरवक्त्रम् :-

अङ्कः - I = १९

अङ्कः - III = ४८, ५८.

८. पृथ्वी :-

अङ्कः - I = २२, २८, ३२, ४७

अङ्कः - II = ३०

अङ्कः - III = २३, २५.

अङ्कः - IV = ५, ३६, ८९, ९६.

अङ्कः - V = १३, ३३, ३५, ९२.

अङ्कः - VI = ३१.

९. मञ्जुभाषिणी :-
अङ्कः - I = २६
अङ्कः - II = २
अङ्कः - III = ३२, ६३.
अङ्कः - V = ४७

१०. मन्दाक्रान्ता :-
अङ्कः - I = २९, ६३, ८०.
अङ्कः - II = १८, १९, २१, २५, ३१, ३३
अङ्कः - III = ४९, ५६, ७१.
अङ्कः - IV = २०, २३, ५१, ६०.
अङ्कः - V = ९, ५८.

११. शालिनी :-
अङ्कः - I = ३१, ५८.
अङ्कः - III = २०, ६८.
अङ्कः - IV = ५७.

१२. उपजातिः :-
अङ्कः - I = ३४, ७३.
अङ्कः - III = ८, १३.
अङ्कः - IV = ४६, ४७, ८३.
अङ्कः - V = ३९, ८४, ९५, ९९.
अङ्कः - VI = २४.

१३. उपेन्द्रवज्रा :-
अङ्कः - I = ४६.
अङ्कः - IV = ७९.

१४. नर्कुटकम् / कोकिलकम् :-
अङ्कः - I = ४८, ५९.
अङ्कः - IV = ८७.
अङ्कः - V = ९०.

१५. स्वागता :-
अङ्कः - I = ५१.
अङ्कः - IV = ३, ६५.
अङ्कः - V = ४१.

१६. हरिणी :-
अङ्कः - I = ६०, ६८.
अङ्कः - II = **१,** १७, १९, २८, ३७, ४२, ६५, ६६.
अङ्कः - III = १, १७, १९, २८, ३७, ४२, ६५, ६६.
अङ्कः - IV = ७२, ९२, ९४.
अङ्कः - V = ४०, ६२, ६५, ७८.

१७. पुष्पिताग्रा :-
अङ्कः - I = ६५, ८७.
अङ्कः - IV = ४१, ४८.
अङ्कः - V = ३६, ८३.

१८. वंशस्थम् :-
अङ्कः - I = ८८. अङ्कः - V = ५०.

१९. इन्द्रवज्रा :-
अङ्कः - I = ८९, ९३.
अङ्कः - III = ६१.
अङ्कः - IV = ८५.
अङ्कः - V = २१.

२०. प्रहर्षिणी :-
अङ्कः - I = **९४.**
अङ्कः - III = ७, ६९.
अङ्कः - V = ८, १४, ८२.

२१. रथोद्धता :-
अङ्कः - II = २०.
अङ्कः - III = ४०.
अङ्कः - IV = ८०.
अङ्कः - V = ९८.

२२. द्रुतविलम्बितम् :-
अङ्कः - III = ३०.
अङ्कः - IV = २४, ५८.
अङ्कः - V = ९१.

२३. अतिरुचिरा :-
अङ्कः - V = ६४.

२४. अतिरुचिरा :-
अङ्कः - III = २६.

२५. मालभारिणी / वसन्तमालिका :-
अङ्कः - I = ९. अङ्कः - III = ३४.

२६. मत्तेभम् :-
अङ्कः - IV = २.

२७. अतिजगती :-
अङ्कः - IV = ३०.

२८. अतिजगती :-
अङ्कः - V = ४९, ७२.

२९. इन्दुवदना :-
अङ्कः - V = ५३.

अनुबन्धः - १

नाटकमूलकथाः

श्रीमद्भागवतम्

दशमस्कन्धः - उत्तरार्धम्

శ్రీవేదవ్యాసమహర్షికృత శ్రీమద్భాగవతము దశమస్కంధము - 3,
తెనుగు అనువాదము - శ్రీ జన్నాభట్ల వాసుదేవశాస్త్రి,
ముద్రణమ్ - శ్రీ గౌడీయమఠము, గుంటూరు - 3, 1983.

भागवतं परिशीलयामश्चेत् -

अध्याये-

५०. जरासन्धयवनागमनादिकथा
५१. मुचुकुन्दस्य श्रीकृष्णदर्शनादिकथारम्भघट्टः
५२. रुक्मिणीविवाहकथारम्भघट्टः
५३. रुक्मिणीविवाहकथारम्भघट्टः
५४. रुक्मिणीविवाहकथारम्भघट्टः
५५. प्रद्युम्नजननशम्बरवधादिवृत्तान्तः
५६. स्यमन्तोपाख्यानारम्भः
५७. स्यमन्तोपाख्यानारम्भः
५८. काळिन्दीमित्रविन्दाप्रभृतीनां विवाहघट्टः
५९. नरकासुरवधारम्भः
६०. श्रीरुक्मिणी-कृष्णयोः परस्परनर्मोक्तिघट्टः
६१. श्रीरुक्मिणी-कृष्णयोः परस्परनर्मोक्तिघट्टः
(भगवत्सन्तानवर्णनम्)
६२. अनिरुद्धस्य विवाहे बलरामकृत-रुक्मिवधकथारम्भः
६३. श्रीकृष्ण-बाणासुरयुद्धकथारम्भः
६४. नृगोपाख्यानारम्भः
६५. बलरामस्य पुनर्नन्दव्रजागमनकथा
६६. श्रीकृष्णकृत-पौण्ड्रक-काशीराज-वधादिकथारम्भः
६७. बलरामकृतद्विविधकथारम्भघट्टः
६८. बलरामकृतहस्तिनपुराकर्षणादिघट्टः
६९. श्रीकृष्णं प्रति नारदागमनकथा
७०. श्रीकृष्णं प्रति नारदागमनकथा
७१. युधिष्ठिरानुष्ठीयमानराजसूयार्थं श्रीकृष्णप्रस्थानघट्टः
७२. दिग्विजयजरासन्धवधादिघट्टः
७३. दिग्विजयजरासन्धवधादिघट्टः
७४. शिशुपालवधघट्टः
७५. शिशुपालवधघट्टः

अथ पञ्चपञ्चाशोऽध्यायः

प्रद्युम्नजनन-शम्बरवधादिवृत्तान्तः

श्रीशुक उवाच :-

कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना।
देहोपपत्तये भूयस्तमेव प्रत्यपद्यत।। १।।

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः।
प्रद्युम्न इति विख्यातस्सर्वतोऽनवमः पितुः।। २।।

तं शम्बरः कामरूपी हृत्वा तोकमनिर्दशम्।
स विदित्वाऽऽत्मनश्शत्रुं प्रास्योदन्वत्यगाद्गृहम्।। ३।।

तं निर्जगार बलवान् मीनस्सोऽप्यपरैस्सह।
वृतो जालेन महता गृहीतो मत्स्यजीविभिः।। ४।।

तं शम्बराय कैवर्ता उपाजह्रुरुपायनम्।
सूदा महानसं नीत्वाऽवध्यन् स्वधितिनाऽद्भुतम्।।५।।

दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन्।
नारदोऽकथयत् सर्वं तस्याश्शङ्कितचेतसः।।
बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम्।। ६।।

सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी।
पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती।। ७।।

निरूपिता शम्बरेण सा सूदौदनसाधने।
कामदेवं शिशुं मत्वा चक्रे स्नेहं तदाऽर्भके।। ८।।

नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः।
जनयामास नारीणां वीक्षन्तीनां च विभ्रमम्।। ९।।

सा तं पतिं पद्मदळायतेक्षणं
प्रलम्बबाहुं नरलोकसुन्दरम्।
सव्रीळहासोत्तभितभ्रुवेक्षती
प्रीत्योपतस्थे रतिरङ्गसौरतैः।। १०।।

तामह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा।
मातृभावमतिक्रम्य वर्तसे कामिनी यथा।। ११।।

रतिरुवाच -

भवान्नारायणसुतश्शम्बरेणाहृतो गृहात्।
अहं ते दयिता पत्नी रतिः कामो भवान् प्रभो!।।१२।।

एष त्वाऽनिर्दशं सिन्धौ प्राक्षिपच्छम्बरोऽसुरः।
मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान् प्रभो।। १३।।

तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः।
मायाशतविदं त्वं च मायाभिर्मोहनादिभिः।। १४।।

परिशोचति ते माता कुरङ्गीव हतप्रजा।
पुत्रस्नेहाकुला दीना विवत्सा गौर्यथाऽऽतुरा।। १५।।

प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने।
मायावती महामायां सर्वमायाविनाशनीम्।। १६।।

स च शम्बरमभ्येत्य संयुगाय समाह्वयत्।
अविषह्यैस्तमाक्षेपैः क्षिपन् सञ्जनयन् कलिम्।। १७।।

सोऽधीक्षिप्तो दुर्वचोभिः पादाहत इवोरगः।
निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः।। १८।।

गदामाविध्य तरसा प्रद्युम्नाय महात्मने।
प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम्।। १९।।

तामापतन्तीं गदया प्रद्युम्नस्तरसा गदाम्।
अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्वगदामं नदन्।।२०।।

स च मायां समाश्रित्य दैतेयीं मयदर्शिताम्।
मुमुचेऽश्ममयं वर्षं कार्ष्णौ वै हायसोऽसुरः।। २१।।

बाध्यमानोऽश्मवर्षेण रौक्मिणेयो महाबलः।
सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम्।। २२।।

ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः।
प्रयुष्ट शतशो दैत्यः कार्ष्णिर्व्यधमयत् स्म ताः।। २३।।

निशातमपि मुद्यम्य सकिरीटं सकुण्डलम्।
शम्बरस्य शिरः कायात्ताम्रश्मश्रोर्जहार तत्।। २४।।

आकीर्यमाणो विबुधैः स्तुवद्भिः कुसुमोत्करैः।
भार्ययाऽम्बरचारिण्या पुरीं नीतो विहायसा।। २५।।

अन्तःपुरवरं राजन् ललनारत्नसङ्कुलम्।
विवेश पत्न्याः गगनाद्विद्युतेव बलाहकः।। २६।।

तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम्।
प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम्।। २७।।

अलङ्कृतमुखाम्बोजं नीलवक्रालकाळिभिः।
कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र ह।। २८।।

अवधार्य शनैरीषद् वैलक्षण्येन योषितः।
उपजग्मुः प्रमुदितास्सस्त्रीरत्नं शुचिस्मिताः।। २९।।

अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी।
अस्मरत् स्वसुतं नष्टं स्नेहात् स्नुतपयोधरा।। ३०।।

कोऽन्वयं नरवैदूर्यः कस्य वा कमलेक्षणः।
धृतः कया वा जठरे क्वेयं लब्धा त्वनेन वा।। ३१।।

ममासावात्मजो नष्टो नीतो यस्सूतिकालयात्।
एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित्।। ३२।।

कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः।
आकृत्याऽवयवैर्गत्या स्वरहासावलोकनैः।। ३३।।

स एव भगवान् नूनं यो मे गर्भगतोऽर्भकः।
अमुष्मिन् प्रीतिरधिका वामस्फुरति मे भुजः।। ३४।।

एवं मीमांसमानाया वैदर्भ्या देवकीसुतः।
देवक्यानकदुन्दुभ्यामुत्तमश्लोक आगमत्।। ३५।।

विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः।
नारदोऽकथयत् सर्वं शम्बराहरणादिकम्।। ३६।।

तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः।
अभ्यनन्दन् बहूनब्दान् नष्टं पुनरिवागतम्।। ३७।।

देवकी-वसुदेवश्च कृष्णरामौ तथा स्त्रियः।
दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम्।। ३८।।

नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः।
अहो मृत इहायातो बलो दिष्ट्येति चाब्रुवन्।। ३९।।

यं वै मुहुः पितृसरूपनिजेशभावा-
स्तन्मातरो यदभजन् रह ऊढभावाः।
चित्रं न तत् खलु रमास्पदबिम्बबिम्बे
कामे स्मरेऽक्षिविषये किमुतान्यनार्यः।। ४०।।

।। इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे पञ्चपञ्चाशोऽध्यायः।।

अथ नवतितमोऽध्यायः

श्रीकृष्णस्य वंशानुक्रमाभिवर्णनघट्टः

श्रीशुक उवाच :-

इति दृशेन भावेन कृष्णे योगीश्वरेश्वरे।
क्रियमाणेन माधव्यो लेखिरे वैष्णवीं गतिम्।। २७।।

श्रुतमात्रोऽपि यस्त्रीणां प्रसह्याकर्षते मनः।
उरुगायोऽनुगीतो वा पश्यन्तीनां कुतः पुनः।। २८।।

यास्तं पर्यचरन् प्रेम्णा पादसंवाहनादिभिः।
जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः।। २९।।

एवं वेदोदितं कर्म स्वनुतिष्ठन् रमापतिः।
गृहान् धर्मार्थकामानां मुहुश्चादर्शयत् पदम्।। ३०।।

आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनाम्।
आसन् षोडशसाहस्रा महिष्योऽष्टशताधिकाः।। ३१।।

तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः।
रुक्मिणीप्रमुखा राजन् सहपुत्राश्च सर्वशः।। ३२।।

एकैकस्यां दश दश कृष्णोऽजीजनदात्मजान्।
यावत्य आत्मनो भार्या अमोघगतिरीश्वरः।। ३३।।

तेषामुद्दामवीर्याणामष्टादश महारथाः।
आसन्नुदारयशसस्तेषां नामानि मे शृणु।। ३४।।

प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान् भानुरेव च।
साम्बो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः।। ३५।।

पुष्करो देवबाहुश्च श्रुतदेवस्सुनन्दनः।
चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च।। ३६।।

त्रिवक्राया उपक्रोशः पुत्रः कृष्णमनुव्रतः।
शिष्यस्साक्षान्नारदस्य दधौ व्रतमखण्डितम्।। ३७।।

तेनोक्तं सात्वतं तन्त्रं यज्ज्ञात्वा मुक्तिमान् भवेत्।
यत्र स्त्रीरुद्रदासानां संस्कारो वैष्णवस्स्मृतः।। ३८।।

एतेषामपि राजेन्द्र!
तनूजानां मधुद्विषः।
प्रद्युम्न आसीत् प्रथमः
पितृवद्रुक्मिणीसुतः।। ३९।।

स रुक्मिणो दुहितरमुपयेमे महारथः।
तस्मात् सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः।। ४०।।

न चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः।
वज्रस्तस्यामभूद्यस्तु मौसलादवशेशितः।। ४१।।

प्रतिबाहुरभूत् तस्मात् सुबाहुस्तस्य चात्मजः।
सुबाहोर्धर्मसेनोऽभूच्छ्रुतसेनस्तु तत्सुतः।। ४२।।

न ह्येतस्मिन् कुले जाता अधना अबहुप्रजाः।
अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे।। ४३।।

यदुवंशप्रसूतानां पुंसां विख्यातकर्मणाम्।
संख्यानं शक्यते कर्तुमपि वर्षायुतैरपि।। ४४।।

तिस्रः कोट्यस्सहस्राणामष्टाशीतिश्शतानि च।
आसन् यदुकुलाचार्याः कुमाराणामिति श्रुतम्।। ४५।।

संख्यानं यादवानां कः करिष्यति महात्मनाम्।
यत्रायुतानामयुतलक्षपुत्रस्स आहुकः।। ४६।।

देवासुराहवहता ये दैतेया स्सुदारुणाः।
ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे।। ४७।।

तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले।
अवतीर्णाः कुलशतमेषामेकाधिकं नृप।। ४८।।

तेषां प्रमाणं भगवान् प्रभुत्वेनाभवद्धरिः।
ये चानुवर्तिनस्तस्य ववृधुस्सर्वयादवाः।। ४९।।

शय्यासनाटनालापक्रीडास्नानाशनादिषु।
न विदुस्स्वान्तरात्मानं वृष्णयः कृष्णदेवताः।। ५०।।

तीर्थं चक्रे नृपोनं यदजनि
यदुषु स्वस्सरित्पादशौचम्।
विद्विट् स्निग्धास्स्वरूपं ययु-
रजितपदाश्रीर्यदर्थेऽन्ययत्नः।। ५१।।

यन्नामामङ्गळघ्नं श्रुतमथ
गदितं यत्कृतो गोत्रधर्मः।
कृष्णस्यैतन्न चित्रं क्षिति-
भरहरणं कालचक्रायुधस्य।। ५२।।

जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषद्भिर्दोर्भिरस्यन्नधर्मम्।
स्थिरचरवृजिनघ्नस्सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्धयन् कामदेवम्।। ५३।।

इत्थं परस्य निजधर्मरिरक्षयाऽऽत्त-
लीलातनोस्तदनुरूपविडम्बनानि।
कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्यपदयोरनुवृत्तिमिच्छन्।। ५४।।

मर्त्यस्तथा ननुसमेधितया मुकुन्द-
श्रीमत्कथाश्रवणकीर्तनचिन्तयैति।
तद्धाम दुस्त्यजकृतान्तजनापवर्गं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः।। ५५।।

।। इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे नवतितमोऽध्यायः।।

।। दशमस्कन्धस्समाप्तः।।

एकषष्ठितमोऽध्यायः

श्रीमद्भागवते महापुराणे एकषष्ठितमे अध्याये प्रोक्तभगवतः श्रीकृष्णस्य

सन्तानपट्टिका

श्रीकृष्णस्य षोडशसहस्रपत्न्यः आसन्। एकैकास्ताः दश पुत्राः अजीजनन्। तत्र अष्टौ महिष्यः तेषां प्रद्युम्नादिपुत्राणां नामानि च कथ्यन्ते -

तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिता।

अष्टो महिष्यस्तत्पुत्रान् प्रद्युम्नादीन् गृणामि ते।। (भागवतम्, ६१ अध्यायः, श्लो. ७)

१. श्रीकृष्णात् - रुक्मिण्याम्

१. प्रद्युम्नः २. चारुदेष्णः ३. सुदेष्णः ४. चारुदेहः ५. सुचारुः

६. चारुगुप्तः ७. भद्रचारुः ८. चारुचन्द्रः ९. विचारुः १०. चारुः

२. श्रीकृष्णात् - सत्यभामायाम्

१. भानुः २. सुभानुः ३. स्वर्भानुः ४. प्रभानुः ५. भानुमान्

६. चन्द्रभानुः ७. बृहद्भानुः ८. अतिभानुः ९. श्रीभानुः १०. प्रतिभानुः

३. श्रीकृष्णात् - जाम्बवत्याम्

१. साम्बः २. सुमित्रः ३. पुरुजित् ४. शतजित् ५. सहस्रजित्

६. विजयः ७. चित्रकेतुः ८. वसुमान् ९. द्रविडः १०. क्रतुः

४. श्रीकृष्णात् - नाग्नजित्याम्

१. वीरः २. चन्द्रः ३. अश्वसेनः ४. चित्रगुः ५. वेगवान्

६. वृषः ७. आमः ८. शङ्कुः ९. वसुः १०. कुन्तिः

५. श्रीकृष्णात् - कालिन्द्याम्

१. श्रुतः २. कविः ३. वृषः ४. वीरः ५. सुबाहुः

६. भद्रः ७. शान्तिः ८. दर्शः ९. पूर्णमासः १०. सोमकः

६. श्रीकृष्णात् - माद्र्याम्

१. प्रघोषः २. गात्रवान् ३. सिंहः ४. बलः ५. प्रबलः

६. ऊर्ध्वगः ७. महाशक्ती ८. सहः ९. ओजः १०. अपराजितः

७. श्रीकृष्णात् - मित्रविन्दायाम्

१. वृकः २. हर्षः ३. अनिलः ४. गृध्रः ५. वर्धनः

६. अन्नादः ७. महांसः ८. पावनः ९. वह्निः १०. क्षुधिः

८. श्रीकृष्णात् - भद्रायाम्

१. सङ्ग्रामजित् २. बृहत्सेनः ३. शूरः ४. प्रहरणः ५. अरिजित्

६. जयः ७. सुभद्रः ८. वामः ९. आयः १०. सत्यकः

९. श्रीकृष्णात् - रोहिण्याम्

१. दीप्तिमान् २. ताम्रतप्तः - इत्यादयः।

रुक्मिणः पुत्र्याम् रुक्मवत्याम् **प्रद्युम्नात् -** महाबलः **अनिरुद्धः** सञ्जातः।

श्रीकृष्णस्य पुत्रेभ्यः कतिचित् सहस्रकोटिपुत्राः पौत्राः च अजायन्त। कृष्णपुत्रेभ्यः षोडशसहस्राधिकमातारः सन्ति।

क्षेमराजश्रीकृष्णदासेन सम्पादितस्य मुम्बई श्रीवेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

श्रीविष्णुमहापुराणम्

दिल्लीविश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य,
डा. राजेन्द्रनाथशर्मणा भूमिकापाठशोधनाभ्यां परिष्कृतम्
नागशरणसिंह सम्पादितश्लोकानुक्रमण्या सहितं
नाग पब्लिशर्स्
११, एयू.ए. जवाहर नगर, दिल्ली - ११० ००७ (भारत)

षड्विंशोऽध्यायः

श्रपराशर उवाचः-

भीष्मकः कुण्डिने राजा विदर्भविषयेऽभवत्।
रुक्मी तस्याभवत् पुत्रो रुक्मिणी च वरानना।। १।।
रुक्मिणीं चकमे कृष्णस्सा च तं चारुहासिनी।
न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे।। २।।
ददौ च शिशुपालाय जरान्धप्रचोदितः।
भीष्मको रुक्मिणा सार्धं रुक्मिणीमुरुविक्रमः।। ३।।
विवाहार्थं ततः सर्वे जरासन्धमुखा नृपाः।
भीष्मकस्य पुरं जग्मश्शिशुपालप्रियैषिणः।। ४।।
कृष्णोऽपि बलभद्राद्यैर्यदुभिः परिवारितः।
प्रययौ कुण्डिनं द्रष्टुं विवाहं चैद्यभूभृतः।। ५।।
श्वो भाविनि विवाहे तु तां कन्यां हृतवान् हरिः।
विपक्षभारमासज्य रामादिष्वथ बन्धुषु।। ६।।
ततश्च पौण्ड्रकश्श्रीमान् दन्तवक्रो विदूरथः।
शिशुपालजरासन्धशाल्वाद्याश्च महीभृतः।। ७।।
कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमम्।
निर्जिताश्च समागम्य रामाद्यैर्यदुपुङ्गवैः।। ८।।
कुण्डिनं न प्रवेक्ष्यामि ह्यहत्वा युधि केशवम्।
कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमनुद्रुतः।। ९।।
हत्वा बलं सनागाश्वं पत्तिस्यन्दनसङ्कुलम्।
निर्जितः पातितश्चोर्व्यां लीलयैव च चक्रिणा।। १०।।
निर्जित्य रुक्मिणं सम्यगुपयेमे च रुक्मिणीम्।
राक्षसेन विवाहेन सम्प्राप्तां मधुसूदनः।। ११।।
तस्यां जज्ञे च प्रद्युम्नो मदनांशस्स वीर्यवान्।
जहार शम्बरो यं वै यो जघान च शम्बरम्।। १२।।

इति श्रीविष्णुमहापुराणे पञ्चमांशे षड्विंशोऽध्यायः।।

सप्तविंशोऽध्यायः

श्रीमैत्रेय उवाचः-

शम्बरेण हतो वीरः प्रद्युम्नः स कथं मुने!।
शम्बरः स महावीर्यः प्रद्युम्नेन कथं हतः।। १।।

यस्तेनापहृतः पूर्वं स कथं विजघान तम्।
एतद्विस्तरतः श्रोतुमिच्छामि सकलं गुरो!।। २।।

श्रीपराशर उवाचः-

षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात्।
ममैष हन्तेति मुने हृतवान् कालशम्बरः।। ३।।

हत्वा चिक्षेप चैवैनं ग्राहोग्रे लवणार्णवे।
कल्लोलजनितावर्त्ते सुघोरे मकरालये।। ४।।

पातितं तत्र चैवैको मत्स्यो जग्राह बालकम्।
न ममार च तस्यापि जठराग्निप्रदीपितः।। ५।।

मत्स्यबन्धैश्च मत्स्योऽसौ मत्स्यैरन्यैस्सह द्विज!।
घतितोऽसुरवर्याय शम्बराय निवेदितः।। ६।।

तस्य मायावती नाम पत्नी सर्वगृहेश्वरी।।
कारयामास सूदानामाधिपत्यमनिन्दिता।। ७।।

दारिते मत्स्यजठरे सा ददर्शातिशोभनम्।
कुमारं मन्मथतरोर्दग्धस्य प्रथमाङ्कुरम्।। ८।।

कोऽयं कथमयं मत्स्यजठरे प्रविवेशितः।
इत्येवं कौतुकाविष्टां तन्वीं प्राहाथ नारदः।। ९।।

अयं समस्तजगतः स्थितिसंहारकारिणः।
शम्बरेण हतो विष्णोस्तनयः सूतिकागृहात्।। १०।।

क्षिप्तस्समुद्रे मत्स्येन निगीर्णस्ते गृहं गतः।
नररत्नमिदं सुभ्रु! विस्रब्धा परिपालया।। ११।।

श्रीपराशर उवाचः-

नारदेनैवमुक्ता सा पालयामास तं शिशुम्।
बाल्यादेवातिरागेण रूपातिशयमोहिता।। १२।।

स यदा यौवनाभोगभूषितोऽभून्महामते!।
साभिलाषा तदा साऽपि बभूव गजगामिनी।। १३।।

मायावती ददौ तस्मै मायास्सर्वा महामुने!।
प्रद्युम्नायानुरागान्धा तन्यस्तहृदयेक्षणा।। १४।।

प्रसज्जन्तीं तु तां प्राह स कार्ष्णिः कमलेक्षणाम्।
मातृत्वमपहायाद्य किमेवं वर्तसेऽन्यथा।। १५।।

सा तस्मै कथयामास न पुत्रस्त्वं ममेति वै।
तनयं त्वामयं विष्णोर्हृतवान् कालशम्बरः।। १६।।

क्षिप्तः समुद्रे मत्स्यस्य सम्प्राप्तो जठरान्मया।
सा हि रोदिति ते माता कांताऽद्याप्यतिवत्सला।।१७।।

श्रीपराशर उवाचः-

इत्युक्तश्शम्बरं युद्धे प्रद्युम्नः स समाह्वयत्।
क्रोधाकुलीकृतमना युयुधे च महाबलः।। १८।।

हत्वा सैन्यमशेषं तु तस्य दैत्यस्य यादवः।
सप्तमाया व्यतिक्रम्य मायां प्रयुयुजेऽष्टमीम्।। १९।।

तया जघान तं दैत्यं मायया कालशंबरम्।
उत्पत्त्य च तया सार्धमाजगाम पितुः पुरम्।। २०।।

अन्तःपुरे निपतितं मायावत्या समन्वितम्।
तं दृष्ट्वा कृष्णसङ्कल्पा बभूवुः कृष्णयोषितः।। २१।।

रुक्मिणी साभवत् प्रेम्णा सास्रदृष्टिरनिन्दिता।
धन्याया खल्वयं पुत्रो वर्तते नवयौवने।। २२।।

अस्मिन् वयसि पुत्रो मे प्रद्युम्नो यदि जीवति।
सभाग्या जननी वत्स! सा त्वया का विभूषिता।।२३।।

अथ वा यादृशः स्नेहो मम यादृग्वपुस्तव।
हरेरपत्यं सुव्यक्तं भवान् वत्स! भविष्यति।। २४।।

श्रीपराशर उवाचः -

एतस्मिन्नन्तरे प्राप्तस्सह कृष्णेन नारदः।
अन्तःपुरचरां देवीं रुक्मिणीं प्राह हर्षयन्।। २५।।

एष ते तनयः सुभ्रु! हत्वा शम्बरमागतः।
हतो येनाभवद्बालो भवत्यास्सूतिकागृहात्।। २६।।

इयं मायावती भार्या तनयस्यास्य ते सती।
शम्बरस्य न भार्येयं श्रूयतामत्र कारणम्।। २७।।

मन्मथे तु गते नाशं तदुद्भवपरायणा।
शम्बरं मोहयामास मायारूपेण रूपिणी।। २८।।

विहाराद्युपभोगेषु रूपं मायामयं शुभम्।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा।। २९।।

कामोऽवतीर्णः पुत्रस्ते तस्येयं दयिता रतिः।
विशङ्का नात्र कर्त्तव्या स्नुषेयं तव शोभने!।। ३०।।

ततो हर्षसमाविष्टौ रुक्मिणी-केशवौ तदा।
नगरी च समस्ता सा साधुसाध्वित्याभाषत।। ३१।।

चिरं नष्टेन पुत्रेण सङ्गतां प्रेक्ष्य रुक्मिणीम्।
अवाप विस्मयं सर्वो द्वारवत्यां तदा जनः।। ३२।।

इति श्रीविष्णुमहापुराणे पञ्चमांशे सप्तविंशोऽध्यायः।।

क्षेमरामश्रीकृष्णदासेन सम्पादितस्य मुम्बई श्रीवकटेश्वरस्टीम् मुद्रणालयेन प्रकाशितस्य पुर्नमुद्रणम्

श्रीहरिवंशपुराणम्

Śrīharivaṃśapurāṇa

दिल्ली विश्वविद्यालयस्थ हिन्दूमहाविद्यालयस्य डा० राजेन्द्रनाथशर्मणा भूमिका पाठशोधनाभ्यां परिष्कृतम्

नागशरणसिंहसम्पादितश्लोकानुक्रमण्या सहितम्

(Part - I)

Nag Publishers Jawaharnagar, Delhi - 7

हरिवंशपुराणकथानुक्रमणिका

हरिवंशपुराणे त्रीणि पर्वाणि सन्ति। तत्र प्रथमः **हरिवंशपर्व** अस्ति। तस्मिन् च पर्वे ५५ अध्यायाः विराजन्ते। द्वितीयः पर्वः भवति **विष्णुपर्व**। तृतीयश्च **भविष्यपर्व**। तत्र प्रथमे **हरिवंशपर्वणि–**

अध्याये

१. आदिसर्गकथनम्
२. दक्षोत्पत्तिवर्णनम्
३. मरुतोत्पत्तिवर्णनम्
....
५५. ब्रह्मवाक्यवर्णनम्

द्वितीये विष्णुपर्वणि–

१. नारदं प्रति कंसवाक्यवर्णनम्
२. विष्णोः योगनिद्रां प्रति कथनम्
३. आर्यास्तव
४. श्रीकृष्णजन्मवर्णनम्
५. व्रजगमनवर्णनम्
.....
११. कालियहृदवर्णनम्
३०. कंसवधवर्णनम्
४६. यमुनाकर्षणवर्णनम्
४७. रुक्मिणीस्वयंवरवर्णनम्
४८. सुनीथवाक्यवर्णनम्
४९. रुक्मिणीस्वयंवरवर्णनम्
५०. रुक्मिणीस्वयंवरे नृपाश्वासनवर्णनम्
५१. कृष्णाभिषेकवर्णनम्
५२. रुक्मिणीस्वयंवर्णनम्
५३. शाल्ववाक्यवर्णनम्
५४. कालयवनागमनवर्णनम्
५५. रुक्मिणीस्वयंवरमन्त्रोदाहरणवर्णनम्
५६. द्वारवहती प्रयाणवर्णनम्
५७. रुक्मिणीहरणे कालयवनवधवर्णनम्
५८. द्वारवहती निर्माणवर्णनम्
५९. रुक्मिणीहरणवर्णनम्
६०. रुक्मिणीहरणवर्णनम्
६१. रुक्मवाक्य–रुक्मवधवर्णनम्
६२. बलदेवमाहात्म्यवर्णनम्
६३. नरकवधवर्णनम्
६४. पारिजातहरणद्वारकाप्रवेशवर्णनम्

....
८२. षट्पुरवधवर्णनम्
......
८६. अन्धकवधवर्णनम्
८७. अन्धकवधवर्णनम्
८८. भानुमतीहरणवर्णनम्
८९. भानुमतीहरणे छालिक्यक्रीडावर्णनम्
९०. भानुमतीहरणे निकुम्भवधवर्णनम्
९१. वज्रनाभवाक्यवर्णनम्
९२. वज्रनाभं प्रति प्रद्युम्नोत्तरवर्णनम्
९३. वज्रनाभपुरं प्रति प्रद्युम्नगमनवर्णनम्
९४. प्रभावतीपाणिग्रहणवर्णनम्
९५. प्रद्युम्नभाषणम्
९६. प्रद्युम्नेन वज्रनाभस्य युद्धवर्णनम्
९७. वज्रनाभवधवर्णनम्
९८. द्वारकाविशेषनिर्माणवर्णनम्
९९. द्वारकाप्रवेशवर्णनम्
१००. सभाप्रवेशवर्णनम्
१०२. नारदवाक्यवर्णनम्
१०३. वृष्णिवंशानुकीर्तनम्
१०४. शम्बरवधवर्णनम्
१०५. शम्बरसैन्यभङ्गवर्णनम्
१०६. नारदवाक्यवर्णनम्
१०७. प्रद्युम्नेन शम्बरवधः
१०८. प्रद्युम्नेन रत्या सह द्वारकां प्रत्यागमनम्
१०९. बलदेवाह्निकवर्णनम्
११०. धन्योपाख्यानवर्णनम्
११६. बाणयुद्धवर्णनम्
....
१२८. उषाहरणसमाप्तिवर्णनम्

–0–

तृतीये भविष्यपर्वणि–
१. हरिवंशवर्णनम्, जनमेजयवंशवर्णनम्
२. भविष्यवर्णनम्
३. भविष्यवर्णनम्
....

१३५. हरिवंशश्रवणफलकीर्तनवर्णनम्

–0–

षष्ठितमोऽध्यायः

रुक्मिणीहरणम्, प्रद्युम्नोत्पत्तिः च

वैशम्पायन उवाच–

कृष्णेन ह्रियमाणां तां रुक्मी श्रुत्वा तु रुक्मिणीम्।
प्रतिज्ञामकरोत् क्रुद्धः समक्षं भीष्मकस्य ह।। १।।

रुक्म्युवाच–

अहत्वा युधि गोविन्दमनानीय च रुक्मिणीम्।
कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीम्यहम्।। २।।
आस्थाय स रथं वीरः समुद्रग्रायुधध्वजम्।
जवेन प्रययौ क्रुद्धो बलेन महता वृतः।। ३।।
तमन्वयुर्नृपाश्चैव दक्षिणापथवर्तिनः।
क्राथोंऽशुमाञ्छ्रुतर्वा च वेणुदारिश्च वीर्यवान्।।४।।
भीष्मकस्य सुताश्चान्ये रथेन रथिनां वराः।
क्रथकैशिकमुख्याश्च सर्व एव महारथाः।। ५।।
ते गत्वा दूरमध्वानं सरितं नर्मदामनु।
गोविन्दं ददृशुः क्रुद्धाः सहैव प्रियया स्थितम्।।६।।
अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः।
चिकीर्षुर्द्वै रथं युद्धमभ्ययान्मधुसूदनम्।। ७।।
स विव्याध चतुःषष्ट्या गोविन्दं निशितैः शरैः।
तं प्रत्यविध्यत् सप्तत्या बाणैर्युधि जनार्दनः।। ८।।
यतमानस्य चिच्छेद ध्वजं चास्य महाबलः।
जहार च शिरः कायात् सारथेस्तस्य वीर्यवान्।।९।।
तं कृच्छ्रगतमाज्ञाय परिवव्रुर्जनार्दनम्।
दाक्षिणात्या जिघांसन्तो राजानः सर्व एव हि।।१०।।

तमंशुमान् महाबाहुर्विव्याध दशभिः शरैः।
श्रुतर्वा पञ्चभिः क्रुद्धो वेणुदारिश्च सप्तभिः।।११।।
ततोंऽशुमन्तं गोविन्दो बिभेदोरसि वीर्यवान्।
निषसाद रथोपस्थे व्यथितः स नराधिपः।। १२।।
श्रुतर्वणो जघानाश्वांश्चतुर्भिश्चतुरः शरैः।
वेणुदारेर्ध्वजं छित्त्वा भुजं विव्याध दक्षिणम्।।१३।।
तथैव च श्रुतर्वाणं शरैर्विव्याध पञ्चभिः।
शिश्रिये स ध्वजं श्रान्तो न्यषीदच्च व्यथान्वितः।।१४।।
मुञ्चन्तः शरवर्षाणि वासुदेव ततोऽभ्ययुः।
क्रथकैशिकमुख्याश्च सर्व एव महारथाः।। १५।।
बाणैर्बाणांश्च चिच्छेद तेषां युधि जनार्दनः।
जघान चैषां संरब्धः पतमानश्च ताञ्छरान्।। १६।।
पुनरन्याश्चतुःषष्ट्या जघान निशितैः शरैः।
क्रुद्धानापततो वीरानाद्रवत् स महाबलः।। १७।।
विद्रुतं स्वबलं दृष्ट्वा रुक्मी क्रोधवशंगतः।
पञ्चभिर्निशितैर्बाणैर्विव्याधोरसि केशवम्।। १८।।
सारथिं चास्य विव्याध सायकैर्निशितैस्त्रिभिः।
आजघान शरेणास्य ध्वजं नतपर्वणा।। १९।।
केशवस्त्वरितं दृष्ट्वा क्रुद्धो विव्याध मार्गणैः।
धनुश्चिच्छेद चाप्यस्य यतमानस्य रुक्मिणः।। २०।।
अथान्यद्धनुरादाय रुक्मी कृष्णजिघांसया।
प्रादुश्चकार चान्यानि दिव्यान्यस्त्राणि वीर्यवान्।। २१।।
अस्त्रैरस्त्राणि संवार्य तस्य कृष्णो महाबलः।
पुनश्चिच्छेद तच्चापं रथेषां च त्रिभिः शरैः।। २२।।
स च्छिन्नधन्वविरथः खड्गमादाय चर्म च।
उत्पपात रथाद्वीरो गरुत्मानिव वीर्यवान्।। २३।।
तस्याभिपततः खड्गं युधि चिच्छेद केशवः।
नाराचैश्च त्रिभिः क्रुद्धो बिभेदैनमथोरसि।। २४।।
स पपात महाबाहुर्वसुधामनुनादयन्।
विसंज्ञो मूर्च्छितो राजा वज्रेणेव महासुरः।। २५।।
तांश्च राज्ञः शरैः सर्वान् पुनर्विव्याध माधवः।
रुक्मिणं पतितं दृष्ट्वा व्यद्रवन्त नराधिपाः।। २६।।
विचेष्टमानं तं भूमौ भ्रातरं वीक्ष्य रुक्मिणी।
पादयोर्न्यपतद्विष्णोर्भ्रातुर्जीवितकाङ्क्षिणी।। २७।।
तामुत्थाप्य परिष्वज्य सान्त्वयामास केशवः।
अभयं रुक्मिणे दत्त्वा प्रययौ स्वपुरीं ततः।। २८।।
वृष्णयोऽपि जरासन्धं भङ्क्त्वा तांश्चैव पार्थिवान्।
प्रययुर्द्वारकां हृष्टाः पुरस्कृत्य हलायुधम्।। २९।।
प्रयाते पुण्डरीकाक्षे श्रुतर्वाभ्येत्य संगरे।
रुक्मिणं रथमारोप्य प्रययौ स्वां पुरीं प्रति।। ३०।।
अनानीय स्वसारं तु रुक्मी मानमदान्वितः।
हीनप्रतिज्ञो नैच्छत् स प्रवेष्टुं कुण्डिनं पुरम्।। ३१।।
विदर्भेषु निवासार्थं निर्ममेऽन्यत् पुरं महत्।
तद्भोजकटमित्येव बभूव भुवि विश्रुतम्।। ३२।।
तवौजसा महातेजा दक्षिणं दिशमन्वशात्।
भीष्मकः कुण्डिने चैव राजोवास महाभुजः।। ३३।।
द्वारकां चापि सम्प्राप्ते रामे वृष्णिबलान्विते।
रुक्मिण्याः केशवः पाणिं जग्राह विधिवत्प्रभुः।। ३४।।
ततः सह तया रेमे प्रियया प्रीयमाणया।
सीतयेव पुरा रामः पौलम्येव पुरन्दरः।। ३५।।
सा हि तस्याभवज्ज्येष्ठा पत्नी कृष्णस्य भामिनी।
पतिव्रतागुणोपेता रूपशीलगुणान्विता।। ३६।।
तस्यामुत्पादयामास पुत्रान् दश महारथान्।
चारुदेष्णं सुदेष्णं च प्रद्युम्नं च महाबलम्।। ३७।।
सुषेणं चारुगुप्तं च चारुबाहुं च वीर्यवान्।
चारुविन्दं सुचारुं च भद्रचारुं तथैव च।। ३८।।
चारुं च बलिनां श्रेष्ठं सुतां चारुमतीं तथा।
धर्मार्थकुशलास्ते तु कृतास्त्रा युद्धदुर्मदाः।। ३९।।
महिषी सप्त कल्याणीस्ततोऽन्या मधुसूदनः।
उपयेमे महाबाहुर्गुणोपेताः कुलोद्भवाः।। ४०।।
कालिन्दीं मित्रविन्दां च
सत्यां नाग्नजितीमपि।
सुतां जाम्बवतश्चापि
रोहिणीं कामरूपिणीम्।।४१।।
मद्रराजसुतां चापि
सुशीलां शुभलोचनाम्।
सत्राजितीं सत्यभामां
लक्ष्मणां चारुहासिनीम्।।४२।।

शैब्यस्य च सुतां तन्वीं रूपेणाप्सरसोपमाम्।
स्त्रीसहस्राणि चान्यानि षोडशातुलविक्रमः।।
उपयेमे हृषीकेशः सर्वा भेजे स ताः समम्।। ४३।।
परार्घ्यवस्त्राभरणाः कामैः सर्वैः सुखोचिताः।
जज्ञिरे तासु पुत्राश्च तस्य वीराः सहस्रशः।। ४४।।
शास्त्रार्थकुशलाः सर्वे बलवन्तो महारथाः।
यज्वानः पुण्यकर्माणो महाभागा महाबलाः।। ४५।।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि
रुक्मिणीहरणं नाम षष्ठितमोऽध्यायः (६०)।।

एकषष्टितोऽध्यायः
रुक्मिवधो

वैशम्पायन उवाच :–
ततः काले व्यतीते तु रुक्मी महति वीर्यवान्।
दुहितुः कारयामास स्वयंवरमरिन्दम।। १।।
तत्राहूता हि राजानो राजपुत्राश्च रुक्मिणा।
समाजग्मुर्महावीर्यो नानादिग्भ्यः श्रियान्विताः।। २।।
तत्राजगाम प्रद्युम्नः कुमारैरपरैर्वृतः।
सा हि तं चकमे कन्या स च तां शुभलोचनाम्।।३।।
शुभाङ्गी नाम वैदर्भी कान्तिद्युतिसमन्विता।
पृथिव्यामभवत् ख्याता रुक्मिणस्तनया तदा।। ४।।
उविष्टेषु सर्वेषु पार्थिवेषु महात्मसु।
वैदर्भी वरयामास प्रद्युम्नमरिसूदनम्।। ५।।
स हि सर्वास्त्रकुशलः सिंहसंहननो युवा।
रुपेणाप्रतिमो लोके केशवस्यात्मजोऽभवत्।। ६।।
वयोरूपगुणोपेता राजपुत्री च साभवत्।
नारायणी चन्द्रसेना जातकामा च तं प्रति।। ७।।
वृत्ते स्वयंवरे जग्मू राजानः स्वपुराणि ते।
उपादाय च वैदर्भी प्रद्युम्नो द्वारकां ययौ।। ८।।
रेमे सह तया वीरो दमयन्त्या नलो यथा।
स तस्यां जनयामास देवगर्भोपमं सुतम्।। ९।।
अनिरुद्धमिति ख्यातं कर्मणाप्रतिमं भुवि।
धनुर्वेदे च वेदे च नीतिशास्त्रे च पारगम्।। १०।।
अभवत् स यदा राजन्ननिरुद्धो वयोऽन्वितः।
तदास्य रुक्मिणः पौत्रीं श्रीमतीं रुक्मिसन्निभाम्।।
पत्न्यर्थे वरयामास नाम्ना रुक्मवतीति सा।। ११।।
अनिरुद्धं गुणैर्दातुं कृतबुद्धिर्नृपस्ततः।
प्रीत्या हि रौक्मिणेयस्य रुक्मिण्याश्चाप्युपग्रहात्।।१२।।
विरुद्धन्नपि कृष्णेन वैरं त्यज्य महायशाः।
ददामीत्यब्रवीद्राजा प्रीतिमान् **जनमेजय!**।। १३।।
केशवः सह रुक्मिण्या पुत्रैः संकर्षणेन च।
अन्यैश्च वृष्णिभिः सार्द्धं विदर्भान् सबलो ययौ।। १४।।
संयुक्ता ज्ञातयश्चैव रुक्मिणः सुहृदश्च ये।
आहुता रुक्मिणा तेऽपि तत्राजग्मुर्नराधिपाः।। १५।।
शुभे तिथौ महाराज नक्षत्रे चाभिपूजिते।
विवाहः सोऽनिरुद्धस्य बभूव परमोत्सवः।। १६।।
पाणौ गृहीते वैद्भ्र्यास्त्वनिरुद्धेन तत्र वै।
वैदर्भयादवानां च बभूव परमोत्सवः।। १७।।
रेमिरे वृष्णयस्तत्र पूज्यमाना यथामराः।
अथाश्मकानामधिपो वेणुदारिरुदारधीः।। १८।।
अक्षः श्रुतर्वा चाणूरः क्रथश्चैवांशुमानपि।
जयत्सेनः कलिङ्गानामधिपश्च महाबलः।। १९।।
पाण्ड्यश्च नृपतिः श्रीमानृषीकाधिपतिस्तथा।
एते सम्मन्त्र्य राजानो दाक्षिणात्या महर्द्धयः।। २०।।
अभिगम्याब्रुवन्तसर्वे रुक्मिणं रहसि प्रभुम्।
भवानक्षेषु कुशलो वयं चापि रिरंसवः।
प्रियद्यूतश्च रामोऽसावक्षेष्वनिपुणोऽपि च।। २१।।
ते भवन्तं पुरस्कृत्य जेतुमिच्छाम तं वयम्।
इत्युक्तो रोचयामास रुक्मी द्यूतं महारथः।। २२।।
ते शुभां काञ्चनस्तम्भां कुसुमैर्भूषिताजिराम्।
सभामाविविशुर्हृष्टाः सिक्तां चन्दनवारिणा।। २३।।
तां प्रविश्य ततः सर्वे शुभ्रस्रगनुलेपनाः।
सौर्वेणष्वासनेष्वासांचक्रिरे विजिगीषवः।। २४।।
आहुतो बलदेवस्तु कितवैरक्षकोविदैः।
बाढमित्यब्रवीद्धृष्टः सह दीव्याम पण्यताम्।। २५।।
निकृत्या विजिगीषन्तो दाक्षिणात्या नराधिपाः।
मणिमुक्ताः सुवर्णं च तत्रानिन्युः सहस्रशः।। २६।।
ततः प्रावर्तत द्यूतं तेषां रतिविनाशनम्।
कलस्यास्पदं घोरं दुर्मतीनां क्षयावहम्।। २७।।

निष्काणां च सहस्राणि सुवर्णस्य दशादितः।
रुक्मिणा सह सम्पाते बलदेवो ग्लहं ददौ।। २८।।
तं जिगाय ततो रुक्मी यतमानं महाबलम्।
तावदेवापरं भूयो बलदेवं जिगाय सः।। २९।।
असकृज्जीयमानस्तु रुक्मिणा केशवाग्रजः।
सुवर्णकोटीर्जग्राह ग्लहं तस्य महात्मनः।। ३०।।
जितमित्येव हृष्टोऽथ तमाह्वतिरभाषत।
श्लाघ्यमानश्च चिक्षेप प्रहसन् मुशलायुधम्।। ३१।।
अविद्यो दुर्वलः श्रीमान् हिरण्यममितं मया।
अजेयो बलदेवोऽयमक्षद्यूते पराजितः।। ३२।।
कलिङ्गराजस्तच्छ्रुत्वा प्रजहास भृशं तदा।
दन्तान् सन्दर्शयन् हृष्टस्तत्राक्रुद्ध्यद्धलायुधः।। ३३।।
रुक्मिणस्तद्वचः श्रुत्वा पराजयनिमित्तजम्।
निगृह्यमाणस्तीक्ष्णाभिर्वाग्भिर्भीष्मकसूनुना।। ३४।।
रोषमाहारयामास जितरोषोऽपि धर्मवित्।
संक्रुद्धो धर्षणां प्राप्य रौहिणेयो महावलः।। ३५।।
धैर्यान् मनः सन्निधाय ततो वचनमब्रवीत्।
दशकोटिसहस्राणि ग्लह एको ममापरः।। ३६।।
एनं संपरिगृह्णीष्व पातयाक्षान्नराधिप।
कृष्णाक्षाँल्लोहिताक्षांश्च देशेऽस्मिंस्त्वधिपांसुले।।३७।।
इत्येवमाह्वयामास रुक्मिणं रोहिणीसुतः।
अनुक्त्वा वचनं किञ्चिद्बाढमित्यब्रवीत् पुनः।। ३८।।
अक्षान्रुक्मी ततो हृष्टः पातयामास पार्थिवः।
चातुरक्षे तु निवृत्ते निर्जितः स नराधिपः।। ३९।।
बलदेवेन धर्मेण नेत्युवाच ततो बलम्।
धैर्यान् मनः समाधाय स न किञ्चिदुवाच ह।। ४०।।
बलदेवं ततो रुक्मी मया जितमिति स्मयन्।
बलदेवस्तु तच्छ्रुत्वा जिह्मं वाक्यं नराधिप।। ४१।।
भूयः क्रोधसमाविष्टो नोत्तरं व्याजहार ह।
ततो गम्भीरनिर्घोषा वागुवाचाशरीरिणी।। ४२।।
बलदेवस्य तं क्रोधं वर्धयन्ती महात्मनः।
सत्यमाह बलः श्रीमान् धर्मेणैष पराजितः।। ४३।।
अनुक्त्वा वचनं किञ्चित् प्राप्तो भवति कर्मणा।
मनसा समनुज्ञातं तत् स्यादित्यवगम्यताम्।। ४४।।
इति श्रुत्वा वचस्तथ्यमन्तरिक्षात् सुभाषितम्।
संकर्षणस्तथात्थाय सौवर्णेनोरुणा बली।। ४५।।
रुक्मिण्या भ्रातरं ज्येष्ठं निजघान महीतले।
विवादे कुपितो रामः क्षेप्तारं किल रुक्मिणम्।
जघानाष्टापदेनैव प्रमथ्य यदुनन्दनः।। ४६।।
ततोऽपसृत्य संक्रुद्धः कलिङ्गाधिपतेरपि ।
दन्तान् बभञ्ज संरम्भादुन्ननाद च सिंहवत्।। ४७।।
खड्गमुद्यम्य तान् सर्वांस्त्रासयामास पार्थिवान्।
स्तम्भं सभायाः सौवर्णमुत्पाट्य बलिनां वरः।। ४८।।
गजेन्द्र इव संस्तम्भं कर्षन् संकर्षणस्ततः।
निर्जगाम सभाद्वारात् त्रासयामास कैशिकान्।। ४९।।
रुक्मिणं निकृतिप्रज्ञं स हत्वा यादवर्षभः।
वित्रास्य विद्विषः सर्वान् सिंहः क्षुद्रमृगानिव।। ५०।।
जगाम शिबिरं रामः स्वयमेव जनावृतः।
न्यवेदयत् स कृष्णाय तत्र सर्वं यथाभवत्।। ५१।।
नोवाच स तदा कृष्णः किञ्चिद्रामं महाद्युतिः।
निगृह्य च तदात्मानं कृच्छ्रादश्रूण्यवर्तयत्।। ५२।।
न हतो वासुदेवेन यः पूर्वं परवीरहा।
ज्येष्ठो भ्राताथ रुक्मिण्या रुक्मिणीस्नेहकारणात्।। ५३।।
स रामकरमुक्तेन निहतो द्यूतमण्डले।
अष्टापदेन बलवान् राजा वज्रधरोपमः।। ५४।।
तस्मिन् हते महावीर्ये नृपतौ भीष्मकात्मजे।
द्रुमभार्गवतुल्ये वै द्रुमभार्गवाशिक्षिते।। ५५।।
कृतौ च युद्धकुशले नित्ययाजिनि पातिते।
वृष्णयश्चान्धकाश्चैव सर्वे विमनसोऽभवन्।। ५६।।

वैशम्पायन उवाच :–

रुक्मिणी च महाभागा विलपन्त्यार्तया गिरा।
विलपन्तीं तथा दृष्ट्वा सान्त्वयामास केशवः।। ५७।।
एतत्ते सर्वमाख्यातं रुक्मिणो निधनं यथा।
वैरस्य च समुत्थानं वृष्णिभिर्भरतर्षभ।। ५८।।
वृष्णयोऽपि महाराज धनान्यादाय सर्वशः।
रामकृष्णौ समाश्रित्य ययुर्द्वारवतीं प्रति।। ५९।।

।। इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि
रुक्मिवधो नामैकषष्टितोऽध्यायः (६१)।।

अथ त्र्यधिकशततमोऽध्यायः

वृष्णिवंशानुकीर्तनम्

जनमेजय उवाच :–

बहूनां स्त्रीसहस्राणामष्टौ भार्याः प्रकीर्तिताः।
तासामपत्यान्यष्टानां भगवान् प्रब्रवीतु मे।। १।।

वेशम्पायन उवाच :–

अष्टौ महिष्यः पुत्रिण्य इति प्राधान्यतः स्मृताः।
सर्वा वीरप्रजाश्चैव तास्वपत्यानि मे शृणु।। २।।
रुक्मिणी सत्यभामा च देवी नाग्नजिती तथा।
सुदत्ता च तथा शैब्या लक्ष्मणा चारुहासिनी।। ३।।
मित्रविन्दा च कालिन्दी जाम्बवत्यथ पौरवी।
सुभीमा च तथा माद्री रुक्मिणीतनयान् शृणु।। ४।।
प्रद्युम्नः प्रथमं जज्ञे शम्बरान्तकरः शुभः।
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः।। ५।।
चारुभद्रश्चारुगर्भः सुदेष्णो द्रुम एव च।
सुषेणश्चारुदेष्णश्च चारुविन्दश्च वीर्यवान्।। ६।।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा।
जज्ञिरे सत्यभामायां भानुर्भीमरथस्तथा।। ७।।
रौहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः।
भानुर्भीमनिका चैव ताम्रपर्णी जलन्धमा।। ८।।
चतस्रो जज्ञिरे तेषां स्वसारो गरुडध्वजात्।
जाम्बवत्याः सुतो जज्ञे साम्बः समितिशोभनः।। ९।।
मित्रवान् मित्रविन्दश्च मित्रवत्यपि चाङ्गना।
मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजाः शृणु।। १०।।
भद्रकारो भद्रविन्दः कन्या भद्रवती तथा।
सुदत्तायां तु शैब्यायां सङ्ग्रामजिदजायत।। ११।।
सत्यजित्सेनजिच्चैव तथा शूरः सपत्नजित्।
सुभीमायाः सुतो माद्र्या वृकाश्वो वृकनिर्वृतिः।। १२।।
कुमारो वृकदीप्तिश्च लक्ष्मणायाः प्रजाः शृणु।
गात्रवान् गात्रगुप्तश्च गात्रविन्दश्च वीर्यवान्।। १३।।
जज्ञिरे गात्रवत्या च भगिन्यानुजया सह।
अश्रुतश्च सुतो जज्ञे कालिन्द्याः श्रुतसम्मतः।। १४।।
अश्रुतं श्रुतसेनायै प्रददौ मधुसूदनः।
तं प्रदाय हृषीकेशस्तां भार्यां मुदितो ब्रवीत्।। १५।।
एष वामुभयोस्तु दायादः शाश्वतीः समाः।
बृहत्यां तु गदस्याहुः शैब्यायामङ्गदं सुतम्।। १६।।
उत्पन्नं कुमुदं चैव श्वेतं श्वेता तथाङ्गना।
अगावहः सुमित्रश्च शुचिश्चित्ररथस्तथा।। १७।।
चित्रसेनः सुदेवायाश्चित्रा चित्रवती तथा।
वनस्तम्बश्च जज्ञात सुतः स्तम्बवनश्च ह।। १८।।
निवासनो वनस्तम्बः कन्या स्तम्बवती तथा।
उपसन्नश्च शङ्कुश्च वज्रांशुः क्षिप्र एव च।। १९।।
कौशिक्यां श्रुतसोमायां यौधिष्ठिर्यां युधिष्ठिरः।
कापाली गरुडश्चैव जज्ञाते चित्रयोधिनौ।। २०।।
एवमादीनि पुत्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुताः।। २१।।
अयुतानि तथा चाष्टौ शूरा रणविशारदाः।
जनार्दनस्य प्रसवः कीर्तितोऽयं तथा मया।। २२।।
प्रद्युम्नस्य सुतो जज्ञे दैवस्य राजसत्तम।
अनिरुद्धो रणेऽरुद्धो जज्ञे स मृगकेतनः।। २३।।
रेवत्यां बलदेवस्य जज्ञाते निशठोल्मुकौ।
भ्रातरौ देवसङ्काशावुभौ पुरुषसत्तमौ।। २४।।
सुतनुश्च सुतारा च शौरेरास्तां परिग्रहः।
पौण्ड्रकः कपिलश्चैव वसुदेवस्य तौ सुतौ।। २५।।
तारायां कपिलो जज्ञे पौण्ड्रश्च सुतनोः सुतः।
तयोर्नृपोऽभवत् पौण्ड्रः कपिलश्च वनं ययौ।। २६।।
तुर्यां समभवद्वीरो वसुदेवान्महाबलः।
जरा नाम निषादानां प्रभुः सर्वधनुष्मताम्।। २७।।
काश्यां सुपार्श्वं तनयं लेभे साम्बात्तरस्विनम्।
सानुर्जज्ञेऽनिरुद्धस्य वज्रः सानोरजायत।। २८।।
वज्राज्जज्ञे प्रतिरथः सुचारुस्तस्य चात्मजः।
अनमित्ताच्छिनिर्जज्ञे कनिष्ठाद् वृष्णिनन्दनात्।। २९।।
शिनेस्तु सत्यवाक् सत्यवाक् महारथः।
सत्यकस्यात्मनः शूरो युयुधानस्त्वजायत।। ३०।।
असङ्गो युयुधानस्य मणिस्तस्याभवत् सुतः।
मणेर्युगन्धरः पुत्र इति वंशः समाप्यते।। ३१।।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि वृष्णिवंशानुकीर्तने त्र्यधिकशततमोऽध्यायः (१०३)।।

चतुरधिकशततमोऽध्यायः

नारदवाक्यम्

जनमेजय उवाच :–

य एष भवता पूर्वं शम्बरघ्नेत्युदाहृतः।
प्रद्युम्नः स कथं जघ्ने **शम्बरं** तद्ब्रवीहि मे।। १।।

वैशम्पायन उवाच :–

रुक्मिण्यां वासुदेवस्य लक्ष्म्यां कामो धृतव्रतः।
शम्बरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः।।
सनत्कुमार इति यः पुराणे परिगीयते।। २।।
तं सप्तरात्रे सम्पूर्णे निशीथे सूतिकागृहात्।
जहार कृष्णस्य सुतं शिशुं वै कालशम्बरः।। ३।।
विदितं तस्य कृष्णस्य देवमायानुवर्तिनः।
ततो न निगृहीतः स दानवो युद्धदुर्मदः।। ४।।
स मृत्युना परीतायुर्मायया प्रजहार तम्।
दोर्भ्यामुत्क्षिप्य नगरं स्वं निनाय महासुरः।। ५।।
अनपत्या तु तस्यासीद्भार्या रूपगुणान्विता।
नाम्ना मायावती नाम मायेव शुभदर्शना।। ६।।
ददौ तं वासुदेवस्य पुत्रं पुत्रमिवात्मजम्।
तस्या महिष्या मादिन्या दानवः कालचोदितः।। ७।।
मायावती तु संदृष्ट्वा संप्रहृष्टतनूरुहा।
हर्षेण महता युक्ता पुनः पुनरुदैक्षत।। ८।।
अथ तस्य निरीक्षन्त्याः स्मृतिः प्रादुर्बभूव ह।
अयं स मम कान्तोऽभूत्स्मृत्वैवं चान्वचिन्तयत्।। ९।।
अयं स नाथो भर्ता मे यस्यार्थेऽहं दिवानिशम्।
चिन्ताशोकार्णवे मग्ना न विन्दामि रतिं क्वचित्।। १०।।
अयं भगवता पूर्वं देवदेवेन शूलिना।
खेदितेन कृतोऽनङ्गो दृष्टो जात्यन्तरे मया।। ११।।
कथमस्य स्तनं दास्ये मातृभावेन जानती।
भर्तुर्भार्या त्वहं भूत्वा वक्ष्ये वा पुत्र इत्युत।। १२।।
एवं संचिन्त्य मनसा धात्र्यास्तं सा समर्पयत्।
रसायनप्रयोगैश्च शीघ्रमेव व्यवर्धयत्।। १३।।
धात्र्याः सकाशात् स च तां शृण्वन् रुक्मिणिनन्दनः।
मायावतीमविज्ञानान्मेने स्वामेव मातरम्।। १४।।
सा च तं वर्द्धयामास कार्ष्णिं कमललोचनम्।
मायाश्चास्मै ददौ सर्वा दानवीः कामामोहिता।। १५।।
स यदा यौवनस्थस्तु प्रद्युम्नः कामदर्शनः।
चिकीर्षितज्ञो नारीणां सर्वास्त्रविधिपारगः।। १६।।
तं सा मायावती कान्तं कामयामास कामिनी।
इङ्गितैश्चापि वीक्षन्ती प्रालोभयत सस्मिता।
प्रसज्जन्तीं तु तां देवीं बभाषे चारुहासिनीम्।। १७।।

प्रद्युम्न उवाच :–

मातृभावं व्यतिक्रम्य किमेवं वर्तसेऽन्यथा।
अहो दुष्टस्वभावाऽसि स्त्रीत्वे चपलमानसा।। १८।।
या पुत्रभावमुत्सृज्य मयि लोभात् प्रवर्तसे।
न तु तेऽहं सुतः सौम्ये कोऽयं शीलविपर्ययः।। १९।।
तत्त्वमिच्छाम्यहं देवि कथितं कोऽन्वयं विधिः।
विद्युत्सम्पातचपलः स्वभावः खलु योषिताम्।। २०।।
या नरेषु प्रसज्जन्ते नगाग्रेषु घना इव।
यदि तेऽहं सुतः सौम्ये यदि वा नात्मजः शुभे।। २१।।
कथितं तत्त्वमिच्छामि किमिदं ते चिकीर्षितम्।
एवमुक्ता तु सा भीरुः कामेन व्यथितेन्द्रिया।। २२।।
प्रियं प्रोवाच वचनं विविक्ते केशवात्मजम्।
न त्वं मम सुतः कान्त नापि ते शम्बरः पिता।।२३।।
रूपवानसि विक्रान्तस्त्वं जात्या वृष्णिनन्दनः।
पुत्रस्त्वं वासुदेवस्य रुक्मिण्यानन्दवर्धनः।। २४।।
दिवसे सप्तमे बालो जातमात्रोऽपवाहितः।
सूतिकागारमध्यात्त्वं शिशुरुत्तानशायितः।। २५।।
मम भर्त्रा हृतोऽसि त्वं बलवीर्यप्रवर्तिना।
पितुस्ते वासुदेवस्य धर्षयित्वा गृहं महत्।। २६।।
पाकशासनकल्पस्य हृतस्त्वं शम्बरेण ह।
सा च ते करुणं माता त्वां बालमनुशोचती।। २७।।
अत्यर्थं तप्यते वीर विवत्सा सौरभा यथा।
सोऽपि शक्रादपि महान् पिता ते गरुडध्वजः।। २८।।
इह त्वां नाभिजानाति बालमेवोपवाहितम्।
कान्त वृष्णिकुमारस्त्वं न हि त्वं शम्बरात्मजः।। २९।।
वीर नैवंविधान् पुत्रान् दानवा जनयन्ति हि।
अतोऽहं कामयामि त्वां न हि त्वं जनितो मया।।३०।।
रूपं ते सौम्य पश्यन्ति सीदामि हृदि दुर्बला।
यन्मे व्यवसितं कान्त यत्तु मे हृदि वर्तते।। ३१।।

तन्मे मनसि वार्ष्णेय प्रतिसन्धातुमर्हसि।
एष ते कथितः सर्वः सद्भावस्त्वयि यो मम।। ३२।।
यथा न मम पुत्रस्त्वं न पुत्रः शम्बरस्य च।
श्रुत्वैवमखिलं सर्वं मायावत्या प्रभाषितम्।। ३३।।
चक्रायुधात्मजः क्रुद्धः शम्बरं स समाह्वयत्।
सर्वमायास्वभिज्ञोऽसौ नाम विश्राव्य चात्मनः।। ३४।।
अहो दानव दुष्टात्मा केशवस्यात्मजं शिशुम्।
हरते निर्भयश्चैव भयमद्य करोम्यहम्।। ३५।।
कथं वै क्रधमागच्छेद्वध्यते वा कथं मया।
प्रथमं किं करिष्यामि येन कुप्यति मदन्धीः।। ३६।।
अस्ति चास्य ध्वजं चित्रं सिंहकेतुविभूषितम्।
तोरणं गृहमासाद्य उच्छ्रितं मेरुशृङ्गात्।। ३७।।
एतदुन्मथ्य पातिष्ये भल्लेन निशितेन वै।
ध्वजच्छेदं विदित्वाथ शम्बरो निष्क्रमिष्यति।। ३८।।
ततो युद्धेन हत्वासौ गन्तास्मि द्वारकां प्रति।
इत्युक्त्वा सज्यमाचक्रे सशरं चापमोजसा।। ३९।।
चिच्छेद ध्वजरत्नं तु शम्बरस्य महाभुजः।
तच्छ्रुत्वा तु ध्वजच्छेदं प्रद्युम्नेन महात्मना।। ४०।।
क्रुद्धस्त्वाज्ञापयामास पुत्रान् वै कालशम्बरः।
जिघांसध्वं महावीरा रौक्मिणेयं त्वरान्विताः।। ४१।।
नैनं वै द्रष्टुमिच्छामि मम विप्रियकारकम्।
श्रुत्वा तु शम्बराद्वाक्यं सुतास्ते शम्बरस्य ह।। ४२।।
सन्नद्धा निर्ययुहृष्टाः प्रद्युम्नवधकाङ्क्षया।
चित्रसेनोऽतिसेनश्च विष्वक्सेनो गदस्तथा।। ४३।।
श्रुतसेनः सुषेणस्तु सोमसेनो वनस्तथा।
सेनानीः सैन्यहन्ता च सेनाहां सैनिकस्तथा।। ४४।।
सेनस्कन्धोऽतिसेनश्च सेनको जनकः सुतः।
सकालो विकलः शान्तः स शान्तान्तकरो विभुः।।४५।।
कुम्भकेतुः सुदंष्ट्रश्च केशिरित्येवमादयः।
चक्रतोमरशूलानि पट्टिशानि परश्वधान्।। ४६।।
गृहीत्वा निर्ययुर्हृष्टा मन्युना परमाप्लुताः।
आह्वयन्तममित्रं वै तस्थुः सङ्ग्रामसूर्द्धनि।। ४७।।
प्रद्युम्नस्तु महाबाहू रथमारुह्य सत्वरम्।
निर्ययौ चापमादाय सङ्ग्रामाभिमुखस्तदा।। ४८।।
ततः प्रवृत्तं युद्धं तुमुलं लोमहर्षणम्।
शम्बरस्य तु पुत्राणां केशवस्य च सूनुना।। ४९।।
ततो देवाः सगन्धर्वाः समहोरगचारणाः।
देवराजं पुरस्कृत्य विमानाग्रेषु धिष्ठिताः।। ५०।।
नारदस्तुम्बुरुश्चैव हाहा हूहूश्च गायकाः।
अप्सरोभिः परिवृतः सर्वे तत्रावतस्थिरे।। ५१।।
देवराजप्रतीहारो गन्धर्वाश्चित्रमद्भुतम्।
शंशस देवराजाय वज्रिणे तद्विचेष्टितम्।। ५२।।
शम्बरस्य शतं पुत्रा एकः कृष्णस्य चात्मजः।
बहूनां युध्यतामेषः कथं विजयमाप्नुयात्।। ५३।।
तच्छ्रुत्वा भाषितं तस्य प्रहस्य बलसूदनः।
उवाच वचनं चेदं शृणु योऽस्य पराक्रमः।। ५४।।
कामोऽयं पूर्वदेहे तु हरक्रोधाग्निना हतः।
रत्या प्रसादितो देवः कामपत्न्या त्रिलोचनः।
परितुष्टेन देवेन वरमस्याः प्रदीयते।। ५५।।
विष्णुर्मानुषदेहस्तु द्वारकायां भविष्यति।
तस्य पुत्रत्वमस्यैव भविष्यति न संशयः।। ५६।।
अनङ्ग इति विख्यातस्त्रैलोक्ये तु महायशाः।
तत्रोत्पन्नो महातेजाः शम्बरं घतयिष्यति।। ५७।।
सप्ताहे जातमात्रे तु रुक्मिण्याः क्रोडसंस्थितम्।
आस्थाय शम्बरो मायां प्रद्युम्नमपनेष्यति।। ५८।।
तद्गच्छ शम्बरगृहं भार्या मायावती भव।
मायारूपप्रतिच्छन्ना शम्बरं मोहयिष्यसि।। ५९।।
तत्र त्वमात्मनः कान्तं बालरूपं विवर्द्धय।
प्राप्तयौवनदेहस्तु शम्बरं निहनिष्यति।। ६०।।
ततस्त्वया सहानङ्गो द्वारकां वै गमिष्यति।
रमिष्यति त्वया सार्द्धं शैलपुत्र्या यथा ह्यहम्।। ६१।।
एवमादिश्य देवेशो जगाम पुरुषोत्तमः।
कैलासं मेरुसङ्काशं सिद्धचारणसेवितम्।। ६२।।
कामपत्नी प्रणम्याथ देवदेवमुमापतिम्।
जगाम शम्बरगृहं कालस्यान्त प्रतीक्षती।। ६३।।
एवमेष महाबाहुः शम्बरं निहनिष्यति।
सह पुत्रेण प्रद्युम्नो हन्ता तस्य दुरात्मनः।। ६४।।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि शम्बरवधे चतुरधिकशततमोऽध्यायः (१०४)।।

पञ्चाधिकशततमोऽध्यायः

शम्बरसैन्यभङ्गः

वैशम्पायन उवाच :–

ततः प्रवृद्धं युद्धं तु तुमुलं लोमहर्षणम्।
शम्बरस्य तु पुत्राणां रुक्मिण्या नन्दनस्य च।। १।।
ततः क्रुद्धा महादैत्याः शरशक्तिपरश्वधान्।
चक्रतोमरकुन्तानि भुशुण्डीर्मुशलानि च।। २।।
युगपत् पातयन्ति स्म प्रद्युम्नोपरि वेगिताः।
कार्ष्णायनिस्तु संक्रुद्धः सर्वास्त्रधनुषश्चुतैः।। ३।।
एकैकं पञ्चभिः क्रुद्धश्चिच्छेद रणमूर्द्धनि।
पुनरेवासुराः क्रुद्धाः सर्वे ते कृतनिश्चयाः।। ४।।
ववृषुः शरजालानि प्रद्युम्नवधकाङ्क्षया।
ततः प्रकुपितोऽनङ्गो धनुरादाय सत्वरः।। ५।।
शम्बरस्य जघनाशु दश पुत्रान् महौजसः।
ततोऽपरेण भल्लेन कुपितः केशवात्मजः।। ६।।
चिच्छेदाशु शिरस्तस्य चित्रसेनस्य वीर्यवान्।
ततस्ते हतशेषास्तु समेत्य समयुद्ध्यत।। ७।।
शरवर्षं विमुञ्चन्तो ह्यभ्यधावन् जिघांसितुम्।
ततः सन्धाय बाणांस्ते विमुञ्चन्तो रणोत्सुकाः।। ८।।
क्रीडन्निव महातेजाः शिरांस्येषामपातयत्।
निहत्य समरे सर्वान् शतमुत्तमधन्विनाम्।। ९।।
प्रद्युम्नः समराकाङ्क्षी तस्थौ सङ्ग्राममूर्द्धनि।
हतं पुत्रशतं श्रुत्वा शम्बरः क्रोधमादधे।। १०।।
सूतं सञ्चोदयामास रथं मे सम्प्रयोजय।
राज्ञो वाक्यं निशम्याथ प्रणम्य शिरसा भुवि।। ११।।
ससैन्यं नोदयामास रथं स सुसमाहितम्।
युक्तमृष्यसहस्रेण सर्पराजसकेतनम्।। १२।।
शार्दूलचर्मसंविष्टं किङ्किणीजालमालिनम्।
ईहामृगगणाकीर्णं पङ्क्तिभक्तिविराजितम्।। १३।।
ताराचित्रपिनद्धाङ्गं स्वर्णकूबरभूषितम्।
सुपताकमहोच्छ्रायं मृगराजाग्रकेतनम्।। १४।।
सुविभक्तवरूथं च लोहेषावज्रकूबरम्।
मन्दरोदग्रशिखरं चारुचामरभूषितम्।। १५।।
नक्षत्रमालापिहितं हेमदण्डसमाहितम्।
विराजमानं श्रीमन्तमारोहच्छम्बरो रथम्।। १६।।
काञ्चनं चित्रसन्नाहं धनुर्गृह्य शरांस्तथा।
प्रस्थितः समराकाङ्क्षी मृत्युना परिचोदितः।। १७।।
चतुर्भिः सचिवैः सार्द्धं सैन्येन महता वृतः।
दुर्धरः केतुमाली च शत्रुहन्ता प्रमर्दनः।। १८।।
एतैः परिवृतोऽमात्यैर्युयुत्सुः प्रस्थितो रणे।
दशनागसहस्राणि रथानां द्वे शते तथा।। १९।।
हयानां चाष्टसाहस्रैः प्रयुतैश्च पदातिनाम्।
एतैः परिवृतो योधैः शम्बरः प्रययौ तदा।। २०।।
प्रयातस्य तु सङ्ग्रामे उत्पाता बहवोऽभवन्।
गृध्रचक्राकुले व्योम्नि सन्ध्याकाराभ्रनादितम्।। २१।।
गर्जन्ति परुषं मेघा निर्घातश्चाम्बरात् पतत्।
शिवा विनेदुरशिवं सैन्यं सङ्कालयन्महत्।। २२।।
ध्वजशीर्षेऽपतद्गृध्रः काङ्क्षन् वै दानवासृजम्।
रथाग्रे पतितश्चास्य कबन्धो भुवि दृश्यते।। २३।।
वीचीकूचीति वाशन्ति शम्बरस्य रथोपरि।
स्वर्भानुग्रस्त आदित्यः परिघैः परिवेष्टितः।। २४।।
स्फुरते नयनं चास्य सव्यं भयनिवेदनम्।
बाहुः प्रकम्पते सव्यः प्रास्खलन् रथवाजिनः।। २५।।
ध्वाङ्क्षो मूर्ध्नि निपतितः शम्बरस्य सुरारिणः।
ववर्ष रुधिरं देवः शर्कराङ्गारमिश्रितम्।। २६।।
उल्कापातसहस्राणि निपेतू रणमूर्द्धनि।
प्रतोदो न्यपतद्धस्तात् सारथेर्हययायिनः।। २७।।
एतानिचिन्तयित्वा तु उत्पातान् समुपस्थितान्।
प्रययौ शम्बरः क्रुद्धः प्रद्युम्नवधकाङ्क्षया।। २८।।
भेरीमृदङ्गशङ्खानां पणवानकदुन्दुभेः।
युगपन्नाद्यमनानां पृथिवी समकम्पत।। २९।।
तेन शब्देन महता संत्रस्ता मृगपक्षिणः।
समन्ताद्दुद्रुवस्तस्माद्भयविक्लवचेतसः।। ३०।।
रणमध्ये स्थितः कार्ष्णिश्चिन्तयन्निधनं रिपोः।
सैन्यैः परिवृतोऽसङ्ख्यैर्युद्धाय कृतनिश्चयः।। ३१।।
क्रुद्धः शरसहस्रेण प्रद्युम्नं समताडयत्।
संप्राप्तांश्चैव तान् बाणांश्चिच्छेद कृतहस्तवत्।। ३२।।

प्रद्युम्नो धनुरादाय शरवर्षं मुमोच ह।
तस्मिन् सैन्ये न कोऽप्यस्ति यो न विद्धः शरेण वै।।३३।।
प्रद्युम्नशरपातेन तत्सैन्यं विमुखीकृतम्।
शम्बरस्य तथाभ्याशे स्थितं संहृत्य भीतवत्।। ३४।।
स्वबलं विद्रुतं दृष्ट्वा शम्बरः क्रोधमूर्च्छितः।
आज्ञापयामास तदा सचिवान् दानवेश्वरः।। ३५।।
गच्छध्वं मन्नियोगेन प्रहरध्वं रिपोः सुतम्।
नोपेक्षणीयः शत्रुर्वै वध्यतां क्षिप्रमेष वै।। ३६।।
उपेक्षित इव व्याधिः शरीरं नाशयेद्ध्रुवम्।
तदेष दुर्मतिः पापो वध्यतां मत्प्रियेप्सया।। ३७।।
ततस्ते सचिवाः क्रुद्धाः शिरसा गृह्य शासनम्।
शरवर्षं विमुञ्चन्तस्त्वरिता नोदयन् रथान्।। ३८।।
तान् दृष्ट्वा धावतः संख्ये क्रुद्धो मकरकेतनः।
चापमुद्यम्य संभ्रान्तस्तस्थौ प्रमुखतो बली।। ३९।।
दुर्धरं पञ्चविंशत्या शरैः सन्नतपर्वभिः।
बिभेद सुमहातेजाः केतुमालिं त्रिषष्टिभिः।। ४०।।
सप्तत्या शत्रुहन्तारं द्व्यशीत्या तु प्रमर्दनम्।
बिभेद परमामर्षी रुक्मिण्या नन्दिवर्धनः।। ४१।।
ततस्ते सचिवाः क्रुद्धाः प्रद्युम्नं शरवृष्टिभिः।
एकैकशो बिभेदाजौ षष्टिभिः शरैः।। ४२।।
तानप्राप्तान् शरान् बाणैश्चिच्छेद मकरध्वजः।
ततोऽर्द्धचन्द्रमादाय दुर्द्धरस्य स साथिम्।। ४३।।
जघान पश्यतां राज्ञां सर्वेषां सैनिकस्य वै।
चतुर्भिरथ नाराचैः सुपर्वैः कङ्कतेजितैः।। ४४।।
जघान चतुरः सोऽश्वान् दुर्द्धरस्य रथं प्रति।
एकेन योक्रं छत्र च ध्वजमेकेन बन्धुरम्।। ४५।।
षष्ठ्या च युगचक्राक्षं चिच्छेद मकरध्वजः।
अथापरं शरं गृह्य कङ्कपत्रं सुतेजितम्।। ४६।।
मुमोच हृदये तस्य दुर्द्धरस्याल्पजीविनः।
स गतासुर्गतश्रीको गतसत्त्वो गतप्रभः।। ४७।।
निपपात रथोपस्थात् क्षीणपुण्य इव ग्रहः।
दुर्द्धरे निहते शूरे दानवे दानवेश्वरः।। ४८।।
केतुमाली शरव्रातैरभिदुद्रावकृष्णजम्।
प्रद्युम्नमथ सङ्क्रुद्धो भ्रुकुटीभीषणाननः।। ४९।।
कृत्वाभ्यधावत् सहसा तिष्ठ तिष्ठेति चाब्रवीत्।
संक्रुद्धः कृष्णसूनुस्तुशरवर्षैरवाकिरत्।। ५०।।
पर्वतं वारिधाराभिः प्रावृषीव यथा घनः।
स विद्धो दानवामात्यः प्रद्युम्नेन धनुष्मता।। ५१।।
चक्रमादाय चिक्षेप प्रद्युम्नवधकांक्षया।
तं तु प्राप्तं सहस्रारं कृष्णचक्रसमद्युतिम्।। ५२।।
निपत्योत्पत्य सहसा सर्वेषामेव पश्यताम्।
तेनैव तस्य चिच्छेद केतुमालेः शिरस्तदा।। ५३।।
तद्दृष्ट्वा कर्म विपुलं रौक्मिणेयस्य देवराट्।
विस्मयं परमं प्राप्तः सर्वैर्देवगणैः सह।। ५४।।
गन्धर्वाप्सरसश्चैव पुष्पवर्षैरवाकिरन्।
केतुमालिं हतं दृष्ट्वा शत्रुहन्ता प्रमर्दनः।
महाबलसमूहेन प्रद्युम्नमथ दुद्रुवे।। ५५।।
ते गदां मुशलं चक्रं प्रासतोमरसायकान्।
भिन्दिपालान् कुठारांश्च भास्वरान् कूटमुद्गरान्।।५६।।
युगपत् सङ्क्षिपन्ति स्म वधार्थं कृष्णनन्दने।
सोऽपि तान्यस्त्रजालानि शस्त्रजालैरनेकधा।। ५७।।
चिच्छेद बहुधा वीरो दर्शयन् पाणिलाघवम्।
गजान् सोऽभ्यहनत् क्रुद्धो गजारोहान् सहस्रशः।। ५८।।
रथान् सारथिभिः सार्द्धं हयांश्चैव ममर्द ह।
पातयंस्तान् शरव्रातैर्नाविद्धः कश्चिदीक्ष्यते।। ५९।।
सर्वाणि सैन्यानि ममन्थ मकरध्वजः।
नदीं प्रावर्तयद्धोरां शोणिताम्बुतरङ्गिणीम्।। ६०।।
मुक्ताहारोर्मिबहुलां वसामेदोऽस्थिपङ्किनीम्।
छत्रद्वीपशरावर्तां रथैः पुलिनमण्डिताम्।। ६१।।
केयूरकुण्डलाकूर्मां ध्वजमत्स्यविभूषितम्।
नागग्राहवतीं रौद्रीं मत्स्यकूर्मविभूषिताम्।। ६२।।
केशशैवलसञ्छन्नां श्रोणिसूत्रमृणालिकाम्।
नराननसुपद्मां च हंसचामरवीजिताम्।। ६३।।
शिरस्तिमिसमाकीर्णां शोणितौघप्रवर्तिनीम्।
नदीं दुस्तरणीं भीमामनङ्गेन प्रवर्तिताम्।। ६४।।
दुष्प्रेक्ष्यां दुर्गमां रौद्रां हीनतेजः सुदुस्तराम्।
शस्त्रग्राहवतीं घोरां यमराष्ट्रविवर्द्धनीम्।। ६५।।
तत्र रुक्मिसुतः श्रीमान् विलोडयति धन्विनः।
शत्रुहन्तारमाश्रित्य शरानभ्यकिरन् बहून्।। ६६।।

शत्रुहन्ता पुनः क्रुद्धो मुमोच शरमुत्तमम्।
प्रद्युम्नस्य समासाद्य हृदये निपपात ह।। ६७।।
स विद्धस्तेन बाणेन प्रद्युम्नो न व्यकम्पत।
शक्तिं जग्राह बलवान् शत्रुहन्त्रे मुमूषवे।। ६८।।
सा क्षिप्ता रौक्मिणेयेन शक्तिर्ज्वालाकुला रणे।
पपात हृदयं भित्त्वा शक्राशनिसमस्वना।। ६९।।
स भिन्नहृच्च स्रस्ताङ्गो मुक्तमर्मास्थिबन्धनः।
पपात रुधिरोद्गारी शत्रुहन्ता महाबलः।। ७०।।
पतितं शत्रुहन्तारं दृष्ट्वा तस्थौ प्रमर्दनः।
जग्राह मुशलं सोऽथ वचनं चेदमाददे।। ७१।।
तिष्ठ किं प्राकृतैरेभिः करिष्यसि रणप्रियः।
मां योधयस्व दुर्बुद्धे ततस्त्वं न भविष्यसि।। ७२।।
वृष्णिवंशकुले जातः शत्रुरस्मत्पिता तव।
पुत्रं हन्ताऽस्म्यहं तस्य ततोऽसौ निहतो भवेत्।। ७३।।
मृतेन तेन दुर्बुद्धे सर्वदेवक्षयो भवेत्।
दैतेया दानवाः सर्वे मोदन्त हतशत्रवः।। ७४।।
हते त्वयि ममास्त्रेण त्वत्समुत्थैश्च शोणितैः।
शम्बरस्य तु पुत्राणां करोम्युदकसत्क्रियाम्।। ७५।।
अद्य सा भीष्मकसुता करुणं विलपिष्यति।
निहतं त्वां च श्रुत्वैव यौवनस्थं गतायुषम्।। ७६।।
स ते पिता चक्रधरो निष्फलाशो भविष्यति।
हतं त्वां स विदित्वाथ प्राणांस्त्यक्ष्यति मन्दधीः।।७७।।
इत्युक्त्वा परिघेणाशु ताडयद्रुक्मिणीसुतम्।
ताडितो हि महातेजा रौक्मिणेयः प्रतापवान्।। ७८।।
दोर्भ्यामुत्क्षिप्य तस्यैव रथं मह्यां व्यचूर्णयत्।
सौऽवप्लुत्य रथात् तस्मात् पदातिरवतस्थिवान्।। ७९।।
तां गदां गृह्य सहसा रौक्मिणेयमुपाद्रवत्।
तयैव गदया कामः प्रमर्दनमपोथयत्।। ८०।।
हते प्रमर्दने दैत्ये दृष्ट्वा सर्वे प्रदुद्रुवुः।
न शक्ताः प्रमुखे स्थातुं सिंहत्रासाद्गजा इव।। ८१।।
सारमेयं यथा दृष्ट्वाऽविगणो वै पलायते।
तथा सेना विषीदन्ती प्रद्युम्नस्य भयार्दिता।। ८२।।
क्षतजादिग्धवस्त्रा वै मुक्तकेशा विशोभना।
रचस्वलेव युवतिः सेना समवगूहते।। ८३।।

मदनशरविभिन्ना सैनिका नभ्ययाया-
द्युवतिसदृशवेषा साध्वसैः पीड्यमाना।
रतिसमरमशक्ता वीक्षितुं सोच्छ्वसन्ती
स्वगृहगमनकामा नेच्छते स्थातुमत्र।। ८४।।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि शम्बरसैन्यभङ्गो नाम पञ्चाधिकशततमोऽध्यायः (१०५)।।

षडधिकशततमोऽध्यायः

नारदवाक्यम्

वैशम्पायन उवाच :-

शम्बरस्तु ततः क्रुद्धः सूतमाहविशाम्पते।
शत्रुप्रमुखतो वीर रथं मे वाहय द्रुतम्।। १।।
यावदेनं शरैर्हन्मि मम विप्रियकारकम्।
ततो भर्तृवचः श्रुत्वा सूतस्तत्प्रियकारकः।। २।।
रथं सञ्चोदयामास चामीकरविभूषितम्।
तं दृष्ट्वा रथमायान्तं प्रद्युम्नः फुल्ललोचनः।। ३।।
सन्दग्धे चापमादाय शरं कनकभूषितम्।
तेनाहनत् सुसंक्रुद्धः कोपयन् शम्बरं रणे।। ४।।
हृदये ताडितस्तेन देवशत्रुः सुविक्लवः।
रथशक्तिं समाश्रित्य तस्थौ सोऽथ विचेतनः।। ५।।
स चेतनां पुनः प्राप्य धनुरादाय शम्बरः।
विव्याध कार्ष्णिं कुपितः सप्तभिर्निशितैः शरैः।। ६।।
तानप्राप्तान् शरान् सोऽथ सप्तभिः सप्तधाच्छिनत्।
शम्बरं च जघानाथ सप्तत्या निशितैः शरैः।। ७।।
पुनः शरसहस्रेण कङ्कबर्हिणवाससा।
अहनच्छम्बरं क्रोधाद्धाराभिरिव पर्वतम्।। ८।।
प्रदिशो विदिशश्चैव शरधारासमावृताः।
स दिशो विदिशश्चैव शरधारा समावृणोत्।। ९।।
अन्धकारीकृतं व्योम दिनकर्ता न दृश्यते।
ततोऽन्धकारमुत्सार्य वैद्युतास्त्रेण शम्बरः।। १०।।
प्रद्युम्नस्य रथोपस्थे शरवर्षं मुमोच ह।
तदस्त्रजालं प्रद्युम्नः शरेणानतपर्वणा।। ११।।

चिच्छेद बहुधा राजन् दर्शयन् पाणिलाघवम्।
हते तस्मिन् महावर्षे शराणां कार्ष्णिना तदा।। १२।।
द्रुमवर्षं मुमोचाथ मायया कालशम्बरः।
द्रुमवर्षोच्छ्रितं दृष्ट्वा प्रद्युम्नः क्रोधमूर्च्छितः।। १३।।
आग्नेयास्त्रं मुमोचाथ तेन वृक्षाननाशयत्।
भस्मीभूते वृक्षवर्षे शिलासङ्घातमुत्सृजत्।। १४।।
प्रद्युम्नस्तं तु वायव्यैः प्रोत्सारयत संयुगे।
ततो मायां परां चक्रे देवशत्रुः प्रतापवान्।। १५।।
सिंहान् व्याघ्रान् वराहांश्च तरक्षूनृक्षवानरान्।
वारणान् वारिदप्रख्यान् हयानुष्ट्रान् विशाम्पते।। १६।।
मुमोच धनुरायम्य प्रद्युम्नस्य रथोपरि।
गन्धर्वास्त्रेण चिच्छेद सर्वांस्तान् खण्डशस्तदा।। १७।।
प्रद्युम्नेन तु सा माया हता तां वीक्ष्य शम्बरः।
अन्यां मायां मुमोचाथ शम्बरः क्रोधमूर्च्छितः।। १८।।
गजेन्द्रान् भिन्नवदनान् षाष्टिहायनयौवनान्।
महामात्रोत्तमारूढान् कल्पितान् रणकोविदान्।। १९।।
तामापतन्तीं मायां तु कार्ष्णिः कमललोचनः।
सैंहीं मायां समुत्स्रष्टुं चक्रे बुद्धिं महामनाः।। २०।।
सा सृष्टा सिंहमाया तु रौक्मिणेयेन धीमता।
माया नागवती नष्टा आदित्येनेव शर्वरी।। २१।।
निहतां हस्तिमायां तु तां समीक्ष्य महासुरः।
अन्यां सम्मोहिनीं मायां सोऽसृजद्दानवोत्तमः।। २२।।
तां दृष्ट्वा मोहिनीं नाम मायां मयविनिर्मिताम्।
संज्ञास्त्रेण तु प्रद्युम्नो नाशयामास वीर्यवान्।। २३।।
शम्बरस्तु ततः क्रुद्धो हतया मायया तदा।
सैंहीं मायां महातेजाः सोऽसृजद्दानवेश्वरः।। २४।।
सिंहानापततो दृष्ट्वा रौक्मिणेयः प्रतापवान्।
अस्त्रं गान्धर्वमादाय शरभानसृजत् तदा।
तेऽष्टपादा बलोदग्रा नखदंष्ट्रायुधा रणे।। २५।।
सिंहान् विद्रावयामासुर्वायुर्जलधरानिव।
सिंहान् विद्रवतो दृष्ट्वा माययाष्टपदेन वै।। २६।।
शम्बरश्चिन्तयामास कथमेनं निहन् मे वै।
अहो मूर्खस्वभावोऽहं यन्मया न हतः शिशुः।। २७।।
प्राप्तयौवनदेहस्तु कृतास्त्रश्चापि दुर्मतिः।
तत्कथं निहनिष्यामि शत्रुं रणशिरःस्थितम्।। २८।।

माया सा तिष्ठते तीव्रा पन्नगी नाम भीषणा।
दत्ता मे देवदेवेन हरेणासुरघातिना।। २९।।
तां सृजामि महामायामाशीविषसमाकुलाम्।
तया दह्येत दुष्टात्मा ह्येष मायामयो बली।। ३०।।
सा सृष्टा पन्नगी माया विषज्वालासमाकुला।
तया पन्नगमय्या तु सरथं सहवाजिनम्।। ३१।।
ससूतं स हि प्रद्युम्नं बबन्ध शरबन्धनैः।
बध्यमानं तदा दृष्ट्वा आत्मानं वृष्णिवंशजः।। ३२।।
मायां सञ्चिन्तयामास सौपर्णीं सर्पनाशिनीम्।
सा चिन्तिता महामाया प्रद्युम्नेन महात्मना।। ३३।।
सुपर्णा विचरन्ति स्म सर्पा नष्टा महाविषाः।
भग्नायां सार्पमायायां प्रशंसन्ति सुरासुराः।। ३४।।
साधु वीर महाबाहो रुक्मिण्यानन्दवर्धन।
यत्त्वया धार्षिता माया तेन स्म परितोषिताः।। ३५।।
हतायां सर्पमायायां शम्बरश्चिन्तयत् पुनः।
अस्ति मे कालदण्डाभो मुद्गरो हेमभूषितः।। ३६।।
तमप्रतिहतं युद्धे देवदानवमानवैः।
पुरा यो मम पार्वत्या दत्तः परमतुष्टया।। ३७।।
गृहाण शम्बरेमं त्वं मुद्गरं हेमभूषितम्।
मया सृष्टं स्वदेहे वै तपः परमदुश्चरम्।। ३८।।
मायान्तकरणं नाम सर्वासुरविनाशनम्।
अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ।। ३९।।
शुम्भश्चैव निशुम्भश्च सगणौ सूदितौ मया।
प्राणसंशयमापन्ने त्वया मोक्ष्यः स शत्रवे।। ४०।।
इत्युक्त्वा पार्वती देवी तत्रैवान्तरधीयत।
तदहं मुद्गरं श्रेष्ठं मोचयिष्यामि शत्रवे।। ४१।।
तस्य विज्ञाय चित्तं तु देवराजोऽभ्यभाषत।
गच्छ नारद शीघ्रं त्वं प्रद्युम्नस्य रथं प्रति।। ४२।।
सम्बोधय महाबाहुं पूर्वजातिं च मोक्षय।
वैष्णवास्त्रं प्रयच्छास्मै वधार्थं शम्बरस्य च।। ४३।।
अभेद्यं कवचं चास्य प्रयच्छासुरसूदिने।
एवमुक्तो मघवता नारदः प्रययौ त्वरन्।। ४४।।
आकाशेऽधिष्ठितोऽवोचन्मकरध्वजकेतनम्।
कुमार पश्य मां प्राप्तं देवगन्धर्वनारदम्।
प्रेषितं देवराजेन तव सम्बोधनाय वै।। ४५।।

स्मर त्वं पूर्वकं भावं कामदेवोऽसि मानद।
हरकोपानलाद्दग्धस्तेनानङ्ग इहोच्यते।। ४६।।
त्वं वृष्णिवंशजातोऽसि रुक्मिण्या गर्भसम्भवः।
जातोऽसि केशवेन त्वं *प्रद्युम्न* इति कीर्त्यसे।। ४७।।
आहत्य शम्बरेण त्वमिहानीतोऽसि मानद।
सप्तरात्रे त्वसम्पूर्णे सूतिकागारमध्यतः।। ४८।।
वधार्थं शम्बरस्य त्वं ह्रियमाणो ह्युपेक्षितः।
केशवेन महाबाहो देवकार्यार्थसिद्धये।। ४९।।
यैषा मायावती नाम भार्या वै शम्बरस्य तु।
रतिं तां विद्धि कल्याणीं तव भार्यां पुरातनीम्।। ५०।।
तवसंरक्षणार्थाय शम्बरस्य गृहेऽवसत्।
मायां शरीरजां तस्य मोहनार्थं दुरात्मनः।। ५१।।
रतेः सम्पादनार्थाय प्रेषयत्यनिशं तदा।
एवं प्रद्युम्न बुद्धा वै तत्र भार्या प्रतिष्ठिता।। ५२।।
हते त्वं शम्बरे वीर वैष्णवास्त्रेण संयुगे।
गृह्य मायावतीं भार्यां द्वारकां गन्तुमर्हसि।। ५३।।
गृहाण वैष्णवं चास्त्रं कवचं च महाप्रभम्।
शक्रेण तव संगृह्य प्रेषितं शत्रुसूदन।। ५४।।
शृणु मे ह्यपरं वाक्यं क्रियतामविशङ्कया।
अस्य देवरिपोस्तात मुद्गरो नित्यमूर्जितः।। ५५।।
पार्वत्यां परितुष्टायां दत्तः शत्रुनिबर्हणः।
अमोघश्चैव सङ्ग्रामे देवदानवमानवैः।। ५६।।
तदस्त्रप्रतिघातार्थं देवीं त्वं स्मर्तुमर्हसि।
स्तव्या चैव नमस्या च महादेवी रणोत्सुकैः।। ५७।।
तत्र वै क्रियतां यत्नः सङ्ग्रामे रिपुणा सह।
इत्युक्त्वा नारदो वाक्यं प्रययौ यत्र वासवः।। ५८।।

।। इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि नारदवाक्यं नाम षडधिकशततमोऽध्यायः (१०६)।।

सप्ताधिकशततमोऽध्यायः

शम्बरवधः

वैशम्पायन उवाच :–
शम्बरस्तु ततः क्रुद्धो मुद्गरं तं समाददे।
मुद्गरे गृह्यमाणे तु द्वादशार्काः समुत्थिताः।। १।।
पर्वताश्चलिताः सर्वे तथैव वसुधातलम्।
उन्मार्गाः सागरा याताः संक्षुब्धाश्चापि देवताः।। २।।
गृध्रचक्राकुलं व्योम उल्कापातो बभूव ह।।
ववर्ष रुधिरं देवः परुषं पवनो ववौ।। ३।।
एवं दृष्ट्वा महोत्पातान् प्रद्युम्नः स त्वारान्वितः।
अवतीर्य रथाद्वीरः कृताञ्जलिपुटः स्थितः।। ४।।
देवीं सस्मार मनसा पार्वतीं शङ्करप्रियाम्।
प्रणम्य शिरसा देवीं स्तोतुं समुपचक्रमे।। ५।।
प्रद्युम्न उवाच :–
ॐ नमः कात्यायन्यै गिरीशायै नमो नमः।
नमस्त्रैलोक्यमायायै कात्यायन्यै नमो नमः।। ६।।
नमः शत्रुविनाशिन्यै नमो गौर्यै नमो शिवप्रियै।
नमस्ये शुम्भमथनीं निशुम्भमथनीमपि।। ७।।
कालरात्रि नमस्तुभ्यं कौमार्यै च नमो नमः।
कान्तारवासिनीं देवीं नमस्यामि कृताञ्जलिः।। ८।।
विन्ध्यवासिनीं दुर्गध्नां रणदुर्गां रणप्रियाम्।
नमस्यामि महादेवीं जयां च विजयां तथा।। ९।।
अपराजितां नमस्येहमजितां शत्रुनाशिनीम्।।
घण्टाहस्तां नमस्यामि घण्टामालाकुलां तथा।। १०।।
त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्।।
सिंहानन नमस्यामि सिंहप्रवरकेतनाम्।। ११।।
एकानंशां नमस्यामि गायत्रीं यज्ञसत्कृताम्।
सावित्रीं चापि विप्राणां नमस्येऽहं कृताञ्जलिः।। १२।।
रक्ष मां देवि सततं सङ्ग्रामे विजयं कुरु।
इति कामवचस्तुष्टा दुर्गा सम्प्रीतमानसा।। १३।।
उवाच वचनं देवी सुप्रीतेनान्तरात्मना।
पश्य पश्य महाबाहो रुक्मिण्यानन्दवर्द्धन।। १४।।
वरं वरस्य वत्स त्वममोघं दर्शनं मम।
देव्यास्तु वचनं श्रुत्वा रोमाञ्चोद्गतमानसः।। १५।।

प्रणम्य शिरसा देवीं विज्ञप्तुमुपचक्रमे।
यदि त्वं देवि तुष्टासि दीयतां मे यदीप्सितम्।। १६।।
वरं च वरदे याचे सर्वामित्रेषु मे जयः।
यस्त्वया मुद्गरो दत्तः शम्बरस्यात्मसम्भवः।। १७।।
एष मे गात्रमासाद्य माला पद्मवती भवेत्।
तथास्त्विति च साप्युक्त्वा तत्रैवान्तरधीयत।। १८।।
प्रद्युम्नस्तु महातेजास्तुष्टो रथमथारुहत्।
मुद्गरं तं गृहीत्वा च शम्बरः क्रोधमूर्च्छितः।। १९।।
भ्रामयित्वा स चिक्षेप प्रद्युम्नोरसि वीर्यवान्।
स गत्वा मदनाभ्याशं मालाभूत्वा तु पौष्करी।। २०।।
प्रद्युम्नस्य च कण्ठे तु समासक्ता व्यराजत।
नक्षत्राणां तु मालायां यथा परिवृतो विधुः।। २१।।
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
साधु साध्विति वाचोचुः पूजयन् केशवात्मजम्।। २२।।
मुद्गरं पुष्पभूतं तु दृष्ट्वा प्रद्युम्नसन्निधौ।
वैष्णवं परमास्त्रं तु नारदेन यथाहृतम्।। २३।।
सन्दधे चापमानम्य इदं वचनमब्रवीत्।
यद्यहं रुक्मिणीपुत्रः केशवस्यात्मजो ह्यहम्।। २४।।
तेन सत्येन बाणेन जहि त्वं शम्बरं रणे।
इत्युक्त्वा चापमाकृष्य सन्धाय च महामनाः।। २५।।
चिक्षेप शम्बरस्याथ दहँल्लोकत्रयं यथा।
स क्षिप्तो वृष्णिसिंहेन शरः क्रव्यादमोहनः।। २६।।
हृदयं शम्बरस्याथ भित्त्वा धरणिमागतः।
न चास्य मांसं न स्नायुर्नास्थि न त्वङ् न शोणितम्।।२७।।
सर्वं तद्भस्मसाद्भूतं वैष्णवास्त्रस्य तेजसा।
हते दैत्ये महाकाये दानवे शम्बरेऽधमे।। २८।।
जहृषुर्देवगन्धर्वाः ननृतुश्चाप्सरोगणाः।
उर्वशी मेनका रम्भा विप्रचित्तिस्तिलोत्तमा।। २९।।
ननृतुहहृष्टमनसो जगत्स्थावरजङ्गमम्।
देवराजस्तु सुप्रीतः सर्वदेवगणैः सह।
प्रद्युम्नं पुष्पवर्षेण तमभ्यर्च्य प्रहृष्टवत्।। ३०।।
अथ समरहते तु दैत्यराजे
मधुमथनस्य सुतेन वैष्णवास्त्रैः।
विगतरिपुभयाः सुराश्च जग्मु-
र्मकरविभूषणकेतनं स्तुवन्तः।। ३१।।
स च समरपरिश्रमं वहन् वै
नगरमुखं प्रविवेश रौक्मिणेयः।
प्रियतम इव कान्तया प्रहृष्ट-
स्त्वरितपदं रतिदर्शनं चकार।। ३२।।

।। इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि शम्बरवधो नाम सप्ताधिकशततमोऽध्यायः (१०७) ।।

अष्टाधिकशततमोऽध्यायः
(द्वारकानगरप्रवेशः)

वैशम्पायन उवाच :-
समाप्तमायो मायाज्ञो विक्रान्तः समरेऽव्ययः।
अष्टम्यां निहतो युद्धे मायावी कालशम्बरः।। १।।
तमृक्षवन्ते नगरे निहत्यासुरसत्तमम्।
गृह्य मायावतीं देवीमागच्छन्नगरं पितुः।। २।।
सोऽन्तरिक्षगतो भूत्वा मायावी शीघ्रविक्रमः।
आजगाम पुरीं रम्यां रक्षितां तेजसा पितुः।। ३।।
सोऽन्तरिक्षान्निपतितः केशवान्तःपुरे शिशुः।
मायावत्या सह तया रूपवानिव मन्मथः।। ४।।
तस्मिंस्तत्रावपतिते महिष्यः केशवस्य याः।
विस्मिताश्चैव हृष्टाश्च भीताश्चैवाभवंस्ततः।। ५।।
ततस्तं कामसङ्काशं कान्तया सह सङ्गतम्।
प्रेक्षन्त्यो हृष्टवदनाः पिबन्त्यो नयनोत्सवम्।। ६।।
तं व्रीडितमुखं दृष्ट्वा लज्जमानं पदे पदे।
अभवन् स्निग्धसङ्कल्पाः सर्वास्ताः कृष्णयोषितः।। ७।।
रुक्मिणी चैव तं दृष्ट्वा शोकार्ता पुत्रगृद्धिनी।
सपत्नीशतसङ्कीर्णा सबाष्पा वाक्यमब्रवीत्।। ८।।
तादृक् स्वप्नो मया दृष्टो निशायां यौवने गते।
कंसारिणा ममानीय दत्तं साहारपल्लवम्।। ९।।
शशिरश्मिप्रतीकाशं मुक्तादामविभूषितम्।
केशवेनाङ्कमारोप्य मम कण्ठे न्यबध्यत।। १०।।
श्यामा सुचारुकेशा स्त्री शुक्लाम्बरविभूषिता।
पद्महस्ता निरक्षन्ती प्रविष्टा मम वेश्मनि।। ११।।

तया पुनरहं गृह्य स्नापिता रुचिराम्बुना।
कुशेशयमयीं मालां स्त्री संगृह्याथ पाणिना।। १२।।
मम मूर्धन्युपाघ्राय दत्ता स्वच्छा तया मम।
एवं स्वप्नान् कीर्तयन्ती रुक्मिणी हृष्टमानसा।। १३।।
सखीजनावृता देवी कुमारं वीक्ष्य तं मुहुः।
धन्यायाः खल्वयं पुत्रो दीर्घायुः प्रियदर्शनः।। १४।।
ईदृशः कामसङ्काशो यौवने प्रथमे स्थितः।
जीवपुत्र त्वया पुत्रका सौभाग्यसमन्विता।। १५।।
किमर्थं चाम्बुदश्यामः सभार्यस्त्वमिहागतः।
अस्मिन् वयसि सुव्यक्तं प्रद्युम्नो मम पुत्रकः।। १६।।
भवेद्यदि न नीतः स्यात् कृतान्तेन बलीयसा।
व्यक्तं कृष्णकुमारस्त्वं न मिथ्या मम तर्कितम्।। १७।।
विज्ञातोऽसि मया चिह्नैर्विना चक्रं जनार्दनः।
मुखं नारायणस्येव केशाः केशान्त एव च।। १८।।
ऊरू वक्षौ भुजौ तुल्यौ हलिनः श्वशुरस्य मे।
कस्त्वं वृष्णिकुलं सर्वं द्योतयन् वपुषा स्थितः ।। १९।।
अहो नारायणस्यैव दिव्या ते परमा तनुः।
एतस्मिन्नन्तरे कृष्णः सहसा प्रविवेश ह।
नारदस्य वचः श्रुत्वा शम्बरस्य वधं प्रति।। २०।।
सोऽपश्यत्तं सुतं ज्येष्ठं सिद्धं मन्मथलक्षणैः।
स्नुषां मायावतीं चैव हृष्टचेता जनार्दनः।। २१।।

कृष्ण उवाच :–

सोऽब्रवीत् सहसा देवीं रुक्मिणीं देवतामिव।
अयं स देवि सम्प्राप्तः सुतश्चापधरस्तव।। २२।।
अनेन शम्बरं हत्वा मायायुद्धविशारदम्।
हता मायासुताः सर्वा याभिर्देवानबाधयत्।। २३।।
सती चेयं शुभा साध्वी भार्या वै तनयस्य ते।
मायावतीति विख्याता शम्बरस्य गृहोषिता।। २४।।
मा च ते शम्बरस्येयं पत्नीति भवतु व्यथा।
मन्मथे तु गते नाशं गते चानङ्गतां पुरा।। २५।।
कामपत्नी न कान्तैषा शम्बरस्य रतिप्रिया।
मायारूपेण तं दैत्यं मोहयत्यसकृच्छुभा।। २६।।
न चैषा तस्य कौमारे वशे तिष्ठति शोभना।
आत्ममायामयं कृत्वा रूपं शम्बरमाविशत्।। २७।।
पत्न्येषा मम पुत्रस्य स्नुषा तव वराङ्गना।
लोककान्तस्य साहाय्यं करिष्यति मनोमयम्।। २८।।
प्रवेशयैनां भवनं पूज्यां ज्येष्ठां स्नुषां मम।
चिरं प्रणष्टं च सुतं भजस्व पुनरागतम्।। २९।।

वैशम्पायन उवाच :–

श्रुत्वा तु वचनं देवी कृष्णेनोदाहृतं तदा।
प्रहर्षमतुलं लब्ध्वा रुक्मिणी वाक्यमब्रवीत्।। ३०।।
अहो धन्यतरास्मीति वीरपुत्रसमागमात्।
अद्य मे सफलः कामः पूर्णो मेऽद्य मनोरथः।। ३१।।
चिरप्रणष्टपुत्रस्य दर्शनं प्रियया सह।
आगच्छ पुत्र भवनं सभार्यः प्रविवेश ह।। ३२।।
ततोऽभिवाद्य चरणौ गोविन्दं मातरं च ताम्।
प्रद्युम्नः पूजयामास हलिनं च महाबलम्।। ३३।।
उत्थाप्य तं परिष्वज्य मूर्ध्न्युपाघ्राय वीर्यवान्।
प्रद्युम्नं बलिनां श्रेष्ठं केशवः परवीरहा।। ३४।।
स्नुषां चोत्थाप्य तां देवीं रुक्मिणी रुक्मभूषणा।
परिष्वज्योपसंगृह्य स्नेहाद्गद्गदभाषिणी।। ३५।।
समेत्य भवनं पत्न्या शचीन्द्रमदितिर्यथा।
प्रवेशयामास तदा रुक्मिणी सुतमागतम्।। ३६।।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि
(द्वारकानगरप्रवेशो नाम)
अष्टाधिकशततमोऽध्यायः (१०८)।।

नवाधिकशततमोऽध्यायः

बलदेवाह्निकम् (प्रद्युम्नेन आचरितम्)

वैशम्पायन उवाच :–

अत्राश्चर्यात्मकं स्तोत्रमाह्निकं यजतां वर।
प्रद्युम्ने द्वारकां प्राप्ते हत्वा तं कालशम्बरम्।। १।।
बलदेवेन रक्षार्थं प्रोक्तमाह्निकमुच्यते।
यज्जप्त्वा तु नृपश्रेष्ठ सायं पूतात्मतां व्रजेत्।। २।।
कीर्तितं बलदेवेन विष्णुना चैव कीर्तितम्।
धर्मकामैश्च मुनिभिर्ऋषिभिश्चापि कीर्तितम्।। ३।।
कर्हिचिद्रुक्मिणापुत्रा हलिना संयुतो गृहे।
उपविष्टः प्रणम्याथ तमुवाच कृताञ्जलिः।। ४।।

प्रद्युम्न उवाच :–

कृष्णानुज महाभाग रोहिणीतनय प्रभो।
किञ्चित्स्तोत्रं मम ब्रूहि यज्जप्त्वा निर्भयोऽभवम्।।५।।

श्रीबलदेव उवाच :–

सुरासुरगुरुर्ब्रह्मा पातु मां जगतः पतिः।
अथोङ्कारवषट्कारौ सावित्री विधयस्त्रयः।। ६।।
ऋचो यजूंषि सामानि च्छन्दांस्याथर्वणानि च।
चत्वारस्त्वखिला वेदाः सरहस्याः सविस्तराः।। ७।।
पुराणमितिहासश्च खिलान्युपखिलानि च।
अङ्गान्युपाङ्गानि तथा व्याख्यातानि च पान्तु माम्।।८।।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्।
इन्द्रियाणि मनो बुद्धिस्तथा सत्त्वं रजस्तमः।। ९।।
व्यानोदानः समानश्च प्राणोऽपानश्च पञ्चमः।
वायवः सप्त चैवान्ये येष्वायत्तमिदं जगत्।। १०।।
मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः।
भृगुर्वसिष्ठो भगवान् पान्तु ते मा महर्षयः।। ११।।
कश्यपाद्याश्च मुनयश्चतुर्दश दिशो दश।
नरनारायणौ देवौ सगणौ पान्तु मां सदा।। १२।।
रुद्राश्चैकादश प्रोक्ता आदित्या द्वादशैव तु।
अष्टौ च वसवो देवा अश्विनौ द्वौ प्रकीर्तितौ।। १३।।
ह्रीः श्रीर्लक्ष्मीः स्वधा मेधा तुष्टिः पुष्टिः स्मृतिर्धृतिः।
अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः।। १४।।
हिमवान् हेमकूटश्च निषधः श्वेतपर्वतः।
ऋषभः पारियात्रश्च विन्ध्यो वैडूर्यपर्वतः।। १५।।
सह्योदयश्च मलयो मेरुमन्दरदर्दुराः।
क्रौञ्चकैलासमैनाकाः पान्तु मां धरणीधराः।। १६।।
शेषश्च वासुकिश्चैव विशालाक्षश्च तक्षकः।
एलापुत्रः शुक्लवर्णः कम्बलाश्वतरावुभौ।। १७।।
हस्तिभद्रः पिटरकः कर्कोटकधनञ्जयौ।
तथा पूरणकश्चैव नागश्च करवीरकः।। १८।।
सुमनास्यो दधिमुकस्तथा शृङ्गारपिण्डकः।
मणिनागश्च भगवांस्त्रिषु लोकेषु विश्रुतः।। १९।।
नागराडधिकर्णश्च तथा हारिद्रकोऽपरः।
एते चान्ये च बहवो ये चान्ये नानुकीर्तिताः।। २०।।
भूधराः सत्यधर्माणः पान्तु मां भुजगेश्वराः।
समुद्राः पान्तु चत्वारो गङ्गा च सरितां वरा।। २१।।
सरस्वती चन्द्रभागा शतद्रुर्देविका शिवा।
द्वारावती विपाशा च सरयूर्यमुना तथा।। २२।।
कल्माषी च रथोष्मा च बाहुदा च हिरण्यदा।
प्लक्षा चेक्षुमती चैव स्रवन्ती च बृहद्रथा।। २३।।
ख्याता चर्मण्वती चैव पुण्या चैव वधूसरा।
एताश्चान्याश्च सरितो यश्चान्या नानुकीर्तिताः।।२४।।
उत्तरापथगामिन्यः सलिलैः स्नपयन्तु माम्।
वेणी गोदावरी सीता कावेरी कौङ्कणावती।। २५।।
कृष्णा वेणी मुक्तिमती तमसा पुष्पवाहिनी।
ताम्रपर्णी ज्योतिरथा उत्पलोदुम्बरावती।। २६।।
नदी वैतरणी पुण्या विदर्भा नर्मदा शुभा।
वितस्ता भीमरथ्या च ऐला चैव महानदी।। २७।।
कालिन्दी गोमती पुण्या
नदः शोणश्च विश्रुतः।
एताश्चान्याश्च वै नद्यो
याश्चान्या न तु कीर्तिताः।।२८।।
दक्षिणापथवाहिन्यः सलिलैः स्नपयन्तु माम्।
क्षिप्रा चर्मण्वती पुण्या मही शभ्रवती तथा।। २९।।
सिन्धुर्वेत्रवती चैव भोजान्ता वनमालिका।
पूर्वभद्रा पराभद्रा ऊर्मिला च परद्रुमा।। ३०।।

ख्याता वेत्रवती चैव चापदासीति विश्रुता।
प्रस्थावती कुण्डनदी नदी पुण्या सरस्वती।। ३१।।
चित्रघ्नी चेन्दुमाला च तथा मधुमती नदी।
उमा गुरुनदी चैव तापी च विमलोदका।। ३२।।
विमला विमलोदा च
मत्तगङ्गा पयस्विनी।
एताश्चान्याश्च वै नद्यो
याश्चान्या नानुकीर्तिताः।।३३।।
ता मां समभिषिञ्चन्तु पश्चिमामाश्रिता दिशम्।
भागीरथी पुण्यजला प्राच्यां दिशि समाश्रिता।। ३४।।
सा तु दहतु मे पापं कीर्तिता शम्भुना धृता।
प्रभासं च प्रयागं च नैमिषं पुष्कराणि च।। ३५।।
गङ्गातीर्थं कुरुक्षेत्रं श्रीकण्ठं गौतमाश्रमम्।
रामह्रदं विनशनं रामतीर्थं तथैव च।। ३६।।
गङ्गाद्वारं कनखलं सोमो वै यत्र चोत्थितः।
कपालमोचनं तीर्थं जम्बूमार्गं च विश्रुतम्।। ३७।।
सुवर्णबिन्दु विख्यातं तथा कनकपिङ्गलम्।
दशाश्वमेधिकं चैव पुण्याश्रमविभूषितम्।। ३८।।
बदरी चैव विख्याता नरनारायणाश्रमः।
विख्यातं फल्गुतीर्थं च तीर्थं चन्द्रवटं तथा।। ३९।।
कोकामुखं पुण्यतमं गङ्गासागरमेव च।
मगधेषु तपोदश्च गङ्गोद्भेदश्च विश्रुतः।। ४०।।
तीर्थान्येतानि पुण्यानि महर्षिभिः।
सूकरं योगमार्गं च श्वेतद्वीषं तथैव च।। ४१।।
ब्रह्मतीर्थं रामतीर्थं वाजिमेधशतोपमम्।
धारासम्पातसंयुक्ता गङ्गा किल्बिषनाशिनी।। ४२।।
गङ्गा वैकुण्ठकेदारं सूकरोद्भेदनं परम्।
तं शापमोचनं तीर्थं पुनन्त्वेतानि किल्बिषात्।। ४३।।
धर्मार्थकामविषयो यशः प्राप्तिः शमो दमः।
वरुणशोऽथ धनदो यमो नियम एव च।। ४४।।
कालो नयः सन्नतिश्च क्रोधो मोहः क्षमा धृतिः।
विद्युतोभ्रण्यथौषध्यः प्रमादोन्मादविग्रहः।। ४५।।
यक्षाः पिशाचा गन्धर्वा किन्नराः सिद्धचारणाः।
नक्तंचराः खेचरिणो दंष्ट्रिणः प्रियविग्रहाः।। ४६।।
लम्बोदराश्च बलिनः पिङ्गाक्षा विश्वरूपिणः।
मरुतः सहपर्जन्याः कलात्रुटिलवाः क्षणाः।। ४७।।
नक्षत्राणि ग्रहाश्चैव ऋतवः शिशिरादयः।
मासाहोरात्रयश्चैव सूर्याचन्द्रमसौ तथा।। ४८।।
आमोदश्च प्रमोदश्च प्रहर्षः शोक एव च।
रजस्तमस्तपः सत्यं शुद्धिर्बुद्धिर्धृतिः श्रुतिः।। ४९।।
रुद्राणी भद्रकाली च भद्रा ज्येष्ठा तु वारुणी।
भासी च कालिका चैव शाण्डिली चेति विश्रुता।। ५०।।
आर्या कुहूः सिनिवाली भीमा चित्ररथी रतिः।
एकानंशा च कूष्माण्डी देवी कात्यायनी च या।।५१।।
लोहित्या जनमाता च देवकन्या तु याः स्मृताः।
गोनन्दा देवपत्नी च मां रक्षन्तु सबान्धवम्।। ५२।।
नानाभरणवेषाश्च नानारूपाङ्कितानना।
नानादेशविचारिण्यो नानाशस्त्रोपशोभिताः।। ५३।।
मेदोमज्जाप्रियाश्चैव मद्यमांसवसाप्रियाः।
मार्जारदीपिवक्त्राश्च गजसिंहनिभाननाः।। ५४।।
कङ्कवायसगृध्राणां क्रौञ्चतुल्याननास्तथा।
व्यालयज्ञोपवीताश्च चर्मप्रावरणास्तथा।। ५५।।
क्षतजोक्षितवक्त्राश्च स्वरभेरीसमस्वनाः।
मत्सराः क्रोधनाश्चैव प्रासादरुचिरालयाः।। ५६।।
मत्तोन्मत्तप्रमत्ताश्च प्रहरन्त्यश्च धिष्ठिताः।
पिङ्गाक्षाः पिङ्गकेशाश्च ततोऽन्या लूनमूर्धजाः।। ५७।।
ऊर्ध्वकेश्यः कृष्णकेश्यः श्वेतकेश्यस्तथा वराः।
नागायुतबलाश्चैव वायुवेगास्तथापराः।। ५८।।
एकहस्ता एकपादा एकाक्षाः पिङ्गला मताः।
बहुपुत्राल्पपुत्राश्च द्विपुत्राः पुत्रमण्डिकाः।। ५९।।
मुखमण्डी बिडाली च पूतना गन्धपूतना।
शीतवातोष्णवेताली रेवती ग्रहसंज्ञिताः।। ६०।।
प्रियहास्याः प्रियक्रोधाः प्रयावासाः प्रियंवदाः।
सुखप्रदाश्चासुखदाः सदा द्विजजनप्रियाः।। ६१।।
नक्तंचराः सुखोदर्काः सदा पर्वणि दारुणाः।
मातरो मातृवत्पुत्रं रक्षन्तु मम नित्यशः।। ६२।।
पतामहमुखोद्भूता रौद्रा रुद्राङ्गसंभवाः।
कुमारस्वेदजाश्चैव ज्वरा वै वैष्णवादयः।। ६३।।

महाभीमा महावीर्या दर्पोद्धता महाबलाः।
क्रोधनाऽक्रोधनाः क्रूराः सुरविग्रहकारिणः।। ६४।।
नक्तञ्चराः केसरिणो दंष्ट्रिणः प्रियविग्रहाः।
लम्बोदरा जघनिनः पिङ्गाक्षा विश्वरूपिणः।। ६५।।
शक्त्यृष्टिशूलपरिघप्रासचर्मासिपाणयः।
पिनाकवज्रमुशलब्रह्मदण्डायुधप्रियाः।। ६६।।
दण्डिनः कुण्डिनः शूरा जटामुकुटधारिणः।
वेदवेदाङ्गकुशला नित्ययज्ञोपवीतिनः।। ६७।।
व्यालापीडाः कुण्डलिनो वीराः केयूरधारिणः।
नानावसनसंवीताश्चित्रमाल्यानुलेपनाः।। ६८।।
गजाश्वोष्ट्रर्क्षमार्जारसिंहव्याघ्रनिभाननाः।
वराहोलूकगोमायुमृगाखुमहिषाननाः।। ६९।।
वामना विकटाः कुब्जाः कराला लूनमूर्धजाः।
सहस्रशतश्चान्ये सहस्रजटधारिणः।। ७०।।
श्वेताः कैलाससंकाशाः केचिद्दिनकरप्रभाः।
केचज्जलदवर्णाभा नीलाञ्जनचयोपमाः।। ७१।।
एकपादा द्विपादाश्च तथा द्विशिरसोऽपरे।
निर्मांसाः स्थूलजङ्घाश्च व्यादितास्या भयङ्कराः।। ७२ ।।
वापीतडागकूपेषु समुद्रेषु सरित्सु च।
श्मशानशैलवृक्षेषु शून्यागारनिवासिनः।। ७३।।
एते ग्रहाश्च सततं रक्षन्तु मम सर्वतः।
महागणपतिर्नन्दी महाकालो महाबलः।
माहेश्वरो वैष्णवश्च ज्वरौ लोकभयावहौ।। ७४।।
ग्रामणीश्चैव गोपालो भृङ्गरीटिर्गणेश्वरः।
देवश्च वामदेवस्य घण्टाकर्णः करन्धमः।। ७५।।
श्वेतमोदः कपाली च जम्भकः शत्रुतापनः।
मज्जनोन्मज्जनौ चोभौ सन्तापनविलापनौ।। ७६।।
निजघासो घसश्चैव स्थूणाकर्णः प्रशोषणः।
उल्कामाली धमधमो ज्वालामाली प्रदर्शनः।। ७७।।
सङ्घट्टनः सङ्कुटनः काष्ठभूतः शिवङ्करः।
कूष्माण्डः कुम्भमूर्द्धा च रोचनो वैकृतो ग्रहः।। ७८।।
अनिकेतः सुरारिघ्नः शिवश्चाशिव एव च।
क्षेमकः पिशिताशी च सुरारिर्हरिलोचनः।। ७९।।
भीमको ग्राहकश्चैव तथैवाग्रमयो ग्रहः।
उपग्रहोर्यकश्चैव तथा स्कन्दग्रहोऽपरः।। ८०।।

चपलो समवेतालस्तामसः सुमहाकपिः।
हृदयोद्वर्तनश्चैडः कुण्डाशी कङ्कणप्रियः।। ८१।।
हरिश्मश्रुर्गरुत्मन्तो मनोमारुतरंहसः।
पार्वत्य रोषसम्भूताः सहस्राणि शतानि च।। ८२।।
शक्तिमन्तो द्युतिमन्तो ब्रह्मण्याः सत्यसङ्गराः।
सर्वकामापहन्तारो द्विषतां च मृधे मृधे।। ८३।।
रात्रावहनि दुर्गेषु कीर्तिताः सकलैर्गुणैः।
तेषां गणानां पतयः सगणाः पान्तु मां सदा।। ८४।।
नारदः पर्वतश्चैव गन्धर्वाप्सरसां गणाः।
पितरः कारणं कार्यमाधयो व्याधयस्तदा।। ८५।।
अगस्त्यो गालवो गार्ग्यः शक्तिर्धौम्यः पराशरः।
कृष्णात्रेयश्च भगवानसितो देवलो बलः।। ८६।।
बृहस्पतिरुतथ्यश्च मार्कण्डेयः श्रुतश्रवाः।
द्वैपायनो विदर्भश्च जैमिनिर्माठरः कठः।। ८७।।
विश्वामित्रो वसिष्ठश्च लोमशश्च महामुनिः।
उत्तङ्कश्चैव रैभ्यश्च पौलोमश्च द्वितस्त्रितः।। ८८।।
ऋषिभिर्वै कालवृक्षी यो मुनिर्मेधातिथिस्तथा।
सारस्वतो यवक्रीतिः कुशिको गौतमस्तथा।। ८९।।
संवर्त ऋष्यशङ्गश्च स्वस्त्यात्रेयो विभाण्डकः।
ऋचीको जमदग्निश्च तथौर्वस्तपसां निधिः।। ९०।।
भरद्वाजः स्थूलशिराः कश्यपः पुलहः क्रतुः ।
बृहदग्निर्हरिश्मश्रुर्विजयः कण्व एव च।। ९१।।
वैतण्डी दीर्घतापाश्च वेदगाथोंऽशु माञ्चिछवः।
अष्टावक्रो दधीचिश्च श्वेतकेतुस्तथैव च।। ९२।।
उद्दालकः क्षीरपाणिः शृङ्गी गौरमुखस्तथा।
अग्निवेश्यः शमीकश्च प्रमुचुर्मुमुचुस्तथा।। ९३।।
एते चान्ये च ऋषयः बहवः शंसितव्रताः।
मुनयः शंसितात्मानो ये चान्ये नानुकीर्तिताः।। ९४।।
क्रतवः श्लाघिनः शान्ताः शान्तिं कुर्वन्तु मे सदा।
त्रयोऽग्नयस्त्रयो वेदास्त्रैविद्या कौस्तुभो मणिः।। ९५।।
उच्चैःश्रवा हयः श्रीमान् वैद्यो धन्वन्तरिर्हरिः।
अमृतं गौः सुपर्णश्च दधि गौराश्च सर्षपाः।। ९६।।
शुक्लाः सुमनसः कन्याः श्वेतच्छत्रं यवाक्षताः।
दूर्वा हिरण्यं गन्धाश्च वालव्यजनमेव च।। ९७।।

तथा प्रतिहतं चक्रं महोक्षश्चन्दनं विषम्।
श्वेतो वृषः करी मत्तः सिंहो व्याघ्रो हयो गिरिः ।।९८।।
पृथिवी चोद्धृता लाजा ब्राह्मणा मधु पायसम्।
स्वस्तिको वर्द्धमानश्च नन्द्यावर्तः प्रियङ्गवः।
श्रीफलं गोमयं मत्स्यो दुन्दुभिः पटहस्वनः।। ९९।।
ऋषिपत्न्यश्च कन्याश्च श्रीमद्भद्रासनं धनुः।
रोचना रुचकश्चैव नदीनां सङ्गमोदकम्।। १००।।
सुपर्णाशतपत्राश्च चकोरा जीवजीविकाः।
नन्दीमुखो मयूरश्च बद्धमुक्तामणिध्वजाः।। १०१।।
आयुधानि प्रशस्तानि कार्यसिद्धिकराणि च।
पुण्यं वै विगतक्लेशं श्रीद्वै मङ्गलान्वितम्।। १०२।।
रामेणोदाहृतं पूर्वमायुः श्रीजयकाङ्क्षिणा।
य इदं श्रावयेद्विद्वांस्तथैव शृणुयान्नरः।। १०३।।
मङ्गलाष्टशतं स्नातो जपन् पर्वणि पर्वणि।
वधबन्धपरिक्लेशं व्याधिशोकपराभवम्।। १०४।।
न च प्राप्नोति वैकल्पं परत्रेह च शर्मदम्।
धन्यं यशस्यमायुष्यं पवित्रं वेदसम्मितम्।। १०५।।
श्रीमत्स्वर्ग्यं सदा पुण्यमपत्यजननं शिवम्।
शुभं क्षेमकरं नृणां मेधाजननमुत्तमम्।। १०६।।
सर्वरोगप्रशमनं स्वकीर्तिकुलवर्द्धनम्।
श्रद्दधानो दयोपेतो यः पठेदात्मवान्नरः।
सर्वपापविशुद्धात्मा लभते च शुभां गतिम्।। १०७।।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि बलदेवाह्निकं नाम नवाधिकशततमोऽध्यायः।।

अनुबन्धः - २

आङ्ग्लभाषायां रति-प्रद्युम्नयोः वृत्तान्तः

PRADYUMNA

1) General information.

A son born to Śrīkṛṣṇa of his wife Rukmiṇī, Pradyumna was the rebirth of Kāmadeva. (For genealogy see under kṛṣṇa) .

2) Birth.

It was at the time when Kāmadeva and Ratīdevī were living together that Pārvatī, daughter of Himavān, started her penance to get Śiva as her husband. It was a need of the devas to get a son of Śiva to kill the fierce demon Tārakāsura. The devas employed Kāmadeva to create feelings of love in the ascetic Śiva and make him marry Pārvatī. Taking instructions from Indra, Kāmadeva took aim at Śiva with his bow and arrow. Śiva was then in deep meditation and Kāmadeva broke his concentration and Śiva got angry. He opened his third eye and burnt Kāmadeva to death. Griefstricken by the death of her husband Ratīdevī performed penance near the Himālayas to propitiate Māyāvatī. Māyāvatī appeared before her and consoled her thus: Little girl, Kāmadeva would be reborn as the son of Śrīkṛṣṇa of Rukmiṇī. He would then be named Pradyumna. The devas have cursed Śambara the leader of the asuras, during the battle between the demons and the demi-gods that he (Śambara) would be killed by Pradyumna. So Śambara is now searching for the infant which is a rebirth of Kāmadeva. So you abandon your present body and be born again as Māyāvatī to be the wife of Śambara. Pradyumna, the reborn Kāmadeva, would kill Śambara and accept you as his wife. Devī disappeared after saying this. Obeying the instructions of Māyāvatī, Ratī abandoned her life and was born in the world of asuras. She grew up under the name Māyāvatī and became the wife of Śambara.

While Śrīkṛṣṇa was living as the chief of Dvāraka his first wife Rukmiṇī was yearning for a child. Śrīkṛṣṇa was deeply moved by the grief of Rukmiṇī and he flew on the back of Garuḍa to Kailāsa to obtain a boon for the birth of a child for her. On the way he alighted in the aSrama of Nara-Nārāyaṇas and after obtaining the blessings of the sages there, went to Kailāsa and bowed before Śiva and explained to him the purpose of his visit. Śiva blessed him and said that Kāmadeva who was burnt to death by the fire of his third eye would take birth again as the son of Rukmiṇī. Kṛṣṇa returned to Dvāraka

well-pleased. Rukmiṇī became pregnant and gave birth to Pradyumna, a rebirth of Kāmadeva. The demon Śambara knew of this birth and coming to Dvāraka in an invisible form carried away the infant when it was seven days old.

The demon threw the child into the ocean and a great fish swallowed it. The fishermen of the country of Śambara caught this fish and following the custom prevalent there presented the king with the fish. Śambara called his wife Māyāvatī and asked her to take the fish and get it cooked. When Māyāvatī cut open the fish for cooking she found to her surprise a beautiful child inside it. Even from the first sight of the child Māyāvatī had a great liking for it and so she took the child and brought it up as her own child. When Pradyumna grew into a youth all the charm and beauty of Kāmadeva were found in him. Māyāvatī was excited to find a resemblance in him of her lost husband Kāmadeva. One day the great sage Nārada came that way and calling Māyāvatī to his side secretly revealed to her that Pradyumna was the incarnation of Kāmadeva and was thus her lost husband. From that day onwards Māyāvatī's affection for him changed into one of love. She taught him all the magic and witchcraft of Śambara.

When Pradyumna found that Māyāvatī's affection for him was gradually changing into one of passionate love he questioned her about it. Māyāvatī then told him everything that happened and Pradyumna decided to kill Śambara and take Māyāvatī away.

3) War with Śambara.

Pradyumna waited for an opportunity to kill Śambara. One day Pradyumna went under the flagstaff of Śambara which flew the royal flag of the king with an emblem of the figure of a lion embossed on it. He dropped it down by one stroke of his arrow. Hearing of this Śambara ordered his sons to kill Pradyumna.

The eleven sons of Śambara, viz., Atisena, Citrasena, Viṣvaksena, Śrutasena, Susena, Somasena, Akala, Vikala, Kumbhaketu, Sudamṣṭrā and Keśī, attacked Pradyumna. The devas came in their vimānās and joined sides with Pradyumna. The army of the demons teased him with various kinds of weapons like javelins, arrows, spears and battle axes. But Pradyumna cut them all by his arrows and cut to pieces all the sons of Śambara. Then Śambara sent an army against him. They were also made to flee by the arrows of Pradyumna. Then Śambara himself came on the scene. The fight became horrible. The continuous flow of arrows made it impossible for even Sun's rays to reach the earth. Then Śambara started his magical war. But Pradyumna faced that also. Śambara sent phantom

lions; but Pradyumna made them immobile. Śambara then in turn created storms, rains, wild animals, serpents and vultures. All of them were killed by Pradyumna.

Then with a well-aimed arrow Pradyumna killed Śambara. Then he rushed to Dvārakā carrying Māyāvatī with him. The people of Dvārakā were astounded to see them. Pradyumna went to Śrīkṛṣṇa and Rukmiṇī and told them the whole story. They were overjoyed to find them and blessed them.

Aniruddha who married Uṣā the daughter of Bāṇa was the son of Pradyumna. (Chapters 103 to 108, 10th Skandha, Bhagavata) .

4) Prabhāvatīpariṇaya. Marriage with Prabhāvatī. (See under **Prabhāvatī**) .

5) Other details.

(i) Pradyumna was born of a part of Sanatkumāra. (Śloka 152, Chapter 67, Ādiparva).

(ii) Pradyumna was one among those who came to Arjuna from Dvārakā with dowry for his marriage with Subhadrā. (Śloka 31, Chapter 220, Ādiparva).

(iii) Pradyumna was present for the Rājasūyayajña of Yudhiṣṭhira. (Śloka 16, Chapter 34, Sabhāparva).

(iv) Pradyumna consoled and encouraged the Yādava. Army which stood dumbfounded before the valorous exploits of King Sālva. (Chapter 17, Vanaparva) .

(v) Pradyumna fainted during a fierce fight between himself and King Sālva. (Chapter 17, Śloka 22, Vanaparva) .

(vi) Pradyumna slew King Sālva in the end. (Chapter 19, Vanaparva).

(vii) Pradyumna means the merging of Bhūtajala during Pralaya. (Śloka 37, Chapter 340, Śāntiparva).

(viii) Pradyumna fell dead by the beatings of the Bhojas during the Mausala fight. (Śloka 33, Chapter 3, Mausala Parva) .

(ix) After his death Pradyumna took the form of Sanatkumāra. (Śloka 13, Chapter 5, Svargārohaṇa Parva) .

RATI - 1.

Wife of Kāmadeva and some Purāṇas hold the view that Kāma was the son of Dharma whose father was Brahma. But, the story of Kāma and Ratī is described in the Kalkipurāṇa as follows. Brahma created ten prajāpatis. A beautiful lady called Sandhya was his next creation. As soon as she was born, seeing her exquisite beauty Brahma and

the prajāpatis jumped to their feet. All of them thought in the same way. While the court of Brahma was in such a perplexed confusion, an extremly handsome person emerged from his mind. Fish was the symbol on his flag, and he aked Brahma thus: **"Oh father, what should I do? Give me a suitable name and you should also decide upon a place and position and also a wife for me"**.

Brahma told him as follows:

'You be moving about everywhere in this world (full of men andwomen) engaged in the eternal function of creation with the five arrows of flower in your hands and thus multiply the population. Your arrows will go everywhere and no one, not even the Devās will dare to obstruct your arrows. Everyone will yield to your behests. Viṣṇu, Śiva and I also will yield before your arrows. You will enter the hearts of living beings in invisible form and giving them happiness engage yourself in eternal creation. The chief aim and object of your arrows of flower will be the hearts of living beings. You will be given a suitable name just now'.

The prajāpatis, who understood the wish of Brahma, after mutual consultation said:

"You emerged churning our minds. Therefore, you will become famous under the name Manmatha (he who churns the mind) . You will lay low Śiva's haughtiness and conceit. Oh ! best among men, Dakṣa, chief among the prajāpatis, will give you a wife".

Happily pleased at the above words of Brahma Kāma held up in his hands the bow and arrows of flowers and decided to shoot five arrows, i.e. Harṣaṇam (pleasing or gladdening), Rocanam (attracting or tempting), Mohanam (deluding or infatuating) , Śoṣaṇam (weakening) and Maraṇam (killing). He decided to use the arrows first against Brahma and then against the prajāpatis.

Accordingly the arrows shot forth and Brahma and all the prajāpatis overwhelmed by sexual passion stared at Sandhyādevī. Sandhyā also got excited and from her body sprouted up 49 parts; 64 kalās (arts) also were born from her. She used incessantly against the leaders of the world (Brahma and others) who were downed by the arrows of sexual passion, arrows dear to Manmatha. The expressions of Brahma made Sandhyā sick with love. Śiva, who was just then travelling along the sky, seeing the boisterous exhibitions of passion by Brahma and others alighted there. He ridiculed Brahma for his display of passion towards his own daughter Sandhyā and spoke further like this: "This Kāma too is a fool. He tested his arrows here itself, he has no sense of propriety and discretion." Brahma was thoroughly ashamed at the words of Śiva.

He perspired and swept with his hands the drops of sweat that oozed from his body. With great difficulty he controlled his passion and gave up Sandhyā. From the drops of sweat falling on the ground from the body of Brahma were born the Pitṛs called Agnisvattas and the Barhisadas, the former 64,000 in number and the latter 4,80,000. Drops of sweat from the bodies of the prajāpatis also fell on the ground and from them were born the Devas. The Pitṛs called Sorṇapās are the sons of Kratu; those called Svakalikās are the sons of Vaśiṣṭha; sons of Pulastya are called Ājyapās and Havirbhuks are the sons of Aligiras. Brahma, who was angry that Kāma shot his arrows against him in the presence of Śiva cursed the former that he would be burnt to ashes in the fire of Śiva's eyes, and Kāma trembling with fear at the curse prostrated at the feet of Brahma and wept Then Brahma said that though he would die in the fire of Śiva's eyes, he would be born again. From the drops of perspiration that fell on the ground from Dakṣa's body arose a beautiful woman, and Dakṣa told Kāma that the woman, his daughter would become famous as Ratīdevī. Dakṣa gave Ratīdevī to Kāma to be his wife. Thus did Ratī become Kāma's wife. (For the second birth of Ratī see under Pradyumna and for other details see- under Kāma.)

RATĪ - II.

An apsara woman of Alakāpurī. She danced on the occasion of Kubera welcoming Aṣṭāvakramuni. (Anuśāsana Parva, Chapter 19, Verse 45).

RATĪ - III.

Wife of Vibhu born in the dynasty of King Ṛṣabhadeva of Ajanabhavarsa. Pṛthusena was her daughter. (Bhāgavata, 5th Skandha) .

RATĪ - GUWA.

A Devagandharva whose father was Kaśyapaprajāpati and mother Pradhā. (Ādi Parva, Chapter 65, Verse 47).

Reference Book :

1. Purāṇic Encyclopedia (A Comprehensive Dictionary with Special Reference to the Epic and Purāṇic Literature) Veṭṭaṃ Maṇi, Motilal Banarasidass, Delhi, First Edition in English - 1975. **Pradyumna -** Page No. 594, **Rati - I** : Page No. 644-645.

२. भागवतकथा

रति-प्रद्युम्नयोः प्रणयवृत्तान्तः, प्रद्युम्नेन कृतः शम्बरासुरवधश्च एतदुभयविषयककथावर्णनं **भागवत-हरिवंश-विष्णुपुराणेषु महाभारते** च उपलभ्यते। प्रकृतं **प्रद्युम्नानन्दीयनाटकम्** तत्तत्पुराणकथाम् आश्रित्य विरचितमिति प्रद्युम्नस्य पुराणाश्रितकथासारः **पुराणिक् एन्सौक्लोपेडिया** इति ग्रन्थे प्रद्युम्ननाम्नि, रति-१ नाम्नि च आङ्ग्लभाषायां वर्तते। तस्य अनुवादः अत्र उपस्थाप्यते। एवं तत्तत्पुराणमूलकथाश्च प्रथमानुबन्धे योजिताः।

१.१. प्रद्युम्नस्य जननम् :-

रुक्मिणी-कृष्णयोः पुत्रः प्रद्युम्नः मन्मथस्य अपरः अवतारः एव। परमेश्वरं भर्तृत्वेन प्राप्तुं हिमवतः पुत्री पार्वती तपः आचरति। तारकासुरं संहर्तुं देवाश्च, पार्वत्यां परमेश्वरस्य पुत्रं प्रतीक्षन्ते। ततः पूर्वमेव दृढदीक्षां स्वीकृत्य हिमालयेषु तीव्रं तपश्चरतः परमेश्वरस्य मनसि शृङ्गारभावनाः जनयितुं देवानां प्रभुः इन्द्रः मन्मथं नियोजयति। तेन, पार्वत्या परमेश्वरस्य विवाहः सुकरः भवति इति देवानाम् आलोचनम्। मन्मथः इन्द्रस्य सन्देशं स्वीकृत्य, चापं धृत्वा रतिसमेतः सन्, तपश्चरतः परमेश्वरस्य अभिमुखम् एति। परमेश्वरः निश्चलः सन् तीव्रं ध्यानमग्नः भवति।

मन्मथः पार्वत्याः सेवाकाले परमेश्वरं लक्ष्यीकृत्य पुष्पबाणं सन्दधाति। परमेश्वरः ध्यानात् एकाग्रतायाः च चलितः भवति। सः इमां स्वतपसः च्युतिं, तीव्रम् अन्तरायं चिन्तयति। क्रुद्धश्च भवति। तस्य तृतीयं फालनेत्रम् उन्मीलति। क्रोधाग्निज्वालाश्च मन्मथं दहन्ति। मन्मथः भस्मीभूय पतति।

अकस्मात् क्षणकाले जातेन स्वभर्तुः मन्मथस्य मरणेन बहु विलपिता रतिः स्त्रीदेवतायाः पार्वत्याः आनुकूल्यं सम्पादयितुं हिमालयेषु तपः आचरति। पार्वती रतेः पुरतः प्रत्यक्षं भवति। रतिं समाश्वसिति। बाले! मन्मथः रुक्मिणी-कृष्णयोः पुत्रत्वेन पुनः जननं प्राप्स्यति। तदा सः प्रद्युम्नः इति आहूयते। देव-दानवसङ्ग्रामकाले देवैः **'प्रद्युम्नः त्वां वधिष्यति'** इति शम्बरः अभिशप्तः। तस्मात् कारणात्, शम्बरः इदानीं मन्मथस्य अवतारा(जन्मा)न्तरं प्राप्तवन्तं शिशुम् अन्विष्यति। अतः त्वम् (रतिः) एतत् शरीरं त्यजतु, मायावतीत्वेन पुनः जननम् एतु, शम्बरं पतित्वेन प्राप्नोतु। प्रद्युम्नत्वेन अवतीर्णः मन्मथः शम्बरासुरं संहरति। त्वां (रतिम्) भार्यात्वेन

स्वीकरिष्यति च - इत्येवम् उक्त्वा देवी अन्तर्द्धा भवति। देव्याः वचनानि विधेयतया पालयन्ती रतिः स्वजीवितं त्यजति। पुनः असुरकुले जननम् एति। तत्र रतिः मयावती नाम्ना व्यवह्रियमाणा वर्धते, गच्छता कालेन शम्बरस्य भार्या च भवति।

श्रीकृष्णः द्वारकां पालयति। रुक्मिणी श्रीकृष्णस्य प्रथमा महिषी। सोत्कण्ठा सती सन्तानार्थं बहु प्रतीक्षते। तस्याः प्रतीक्षया चलितः सन्ततिप्रदायकस्य वरस्य अवाप्त्यै श्रीकृष्णः रुक्मिण्या साकं गरुडम् अधिरुह्य कैलासं गच्छति। मार्गमध्ये रुक्मिणी-कृष्णौ नर-नारायणयोः आश्रमं पश्यतः। तत्र नर-नारायणयोः दर्शनं लब्ध्वा, आशीः स्वीकृत्य कैलासं प्राप्नुतः।

तत्र परमेश्वरं नमस्कृत्य स्वागमनकारणं निवेदयतः। परमेश्वरः रुक्मिणी-कृष्णाभ्याम् आशीः प्रदाय **'स्वफालनेत्राग्निदग्धः मन्मथः, रुक्मिण्यां पुनः जन्म लभते'** इति वदति। सन्तुष्टः सन् श्रीकृष्णः सदारः द्वारकाम् आयाति। रुक्मिणी गर्भं धरति। प्रद्युम्नस्य जन्म ददाति। शम्बरः इमं वृत्तान्तं जानाति। द्वारकाम् आयाति। अदृश्यतया रुक्मिण्याः शिशुं सप्ताहवयस्कं प्रद्युम्नम् अपहरति।

शम्बरासुरः मृत्युभिया अपहृतं सप्ताहवयस्कं शिशुं सागरे प्रक्षिपति। कश्चन बृहन्मीनः तं शिशुं गिलति। मीनश्च स्वोदरान्तः स्थापयति। शम्बरासुरप्रान्तीयः कश्चन धीवरः जालपतितं तं मीनं गृह्णाति। तद्देशीयाचारम् अनुसृत्य स धीवरः विशेषगुणसम्पन्नं तन्मीनं शम्बराय समर्पयति। शम्बरः स्वभार्यां मायावतीम् आहूय पाकाय आदिशति। मायावती पक्तुं यदा मीनं खण्डयति तदा तन्मीनस्य गर्भे अन्तः साश्चर्यं सुन्दरं शिशुं पश्यति। मायावती प्रथमदर्शनादारभ्य एव अस्मिन् शिशौ उत्कण्ठाम् आपन्ना अस्ति। सा तं शिशुं परिगृह्णाति। आत्मजम् इव पोषयति।

यदा शिशुः (प्रद्युम्नः) युक्तवयस्कः भवति तदा मायावती तस्य लावण्ये सौन्दर्ये च आकृष्टचित्ता **'स एव अयम्'** इति मन्मथं तं प्रत्यभिजानाति। फालानलज्वालाभिस्सन्तप्तस्य स्वभर्तुः सादृश्यस्य, प्रद्युम्ने दर्शनेन मायावती चिरम् आश्चर्यम् अनुभवति। कदाचित् एकस्मिन् दिने नारदः तन्मार्गे गच्छन्, मायावतीं दृष्ट्वा स्वसमीपम् आह्वयति। रहसि तस्यै **'मायावति ! अयं प्रद्युम्नः, फालानलज्वालाभिस्सन्तप्तः तव भर्ता मन्मथः एव'** इति वदति। तदारभ्य मायावत्याः प्रद्युम्ने वात्सल्यम्, अनुरागात्मना परिणतम्। शस्बरस्य मायोपायान् कुतन्त्रान् दुरागतान् च मायावती प्रद्युम्नाय ज्ञापयति। यदा मायावत्याः वात्सल्यम्, क्रमशः अनुरागात्मना

परिणमते तदा प्रद्युम्नः मायावतीं **'किम् एतत् सर्वम्'** इति पृच्छति। मायावती पूर्वजन्मवृत्तान्तं सर्वं कथयति। प्रद्युम्नः अपि शम्बरासुरं हन्तुम्, मायावतीं तस्मात् नेतुं च दृढमतिः भवति।

१.२. शम्बर-प्रद्युम्नयोः युद्धवर्णनम् :-

प्रद्युम्नः शम्बरासुरं हन्तुम् अवकाशाय प्रतीक्षमाणः आस्ते। शम्बरस्य पताकायाः चिह्नं सिंहः। कदाचित् एकस्मिन् दिने शम्बरासुरस्य सैन्यं स्वराज्ञः पताकां वहत् युद्धाय अभ्यासं कुर्वद्वर्तते। प्रद्युम्नः शम्बरस्य सैनिकशिबिरं प्रविश्य, एकेनैव बाणप्रहारेण शम्बरस्य पताकाम् अवनतं करोति। एतत् श्रुत्वा शम्बरः प्रद्युम्नस्य संहरणाय आदिशति।

शम्बरस्य एकादश पुत्राः - १. अतिसेनः, **२. चित्रसेनः,** ३. विष्वक्सेनः, ४. श्रुतसेनः, ५.सुसेनः, ६. सोमसेनः, ७. अकालः, ८. विकालः, **९. कुम्भकेतुः,** १०. सुदंष्ट्रः, ११. केशी च प्रद्युम्नम् आयुधैः संहर्तुं परितः वृताः भवन्ति। देवाः सर्वे स्वस्वविमानेषु आयान्ति। प्रद्युम्नस्य पार्श्वे अवसरे युद्धाय सिद्धाः भवन्ति। शम्बरासुरसैन्यं चक्र-चाप-परशु-तोमरादिभिः नानाविधैः आयुधैः प्रद्युम्नं हिनस्ति। परं प्रद्युम्नः स्वबाणाघातैः अनायासेन तान् असुरसुतान् खण्डशः कृत्वा संहरति। प्रद्युम्नं संहर्तुं शम्बरः स्वसैन्यम् आदिशति। तदपि प्रद्युम्नस्य बाणप्रघातैः नष्टं भवति। अन्ततः शम्बरः एव युद्धक्षेत्रम् अवतरति।

शम्बर-प्रद्युम्नयोः भयङ्करं युद्धं प्रचलति। निरन्तरं शराणां प्रपातेन सूर्यरश्मयः अपि भूमिं प्राप्तुं न शक्नुवन्ति। शम्बरः स्वीयं मायायुद्धम् आरभते। प्रद्युम्नः मायायुद्धमपि सहते। शम्बरः प्रद्युम्नं भयावहं कर्तुं मायासिंहान् विसृजति। प्रद्युम्नस्तान् निश्चेष्टान् करोति। शम्बरः उत्पातान् सृजति। क्रूरमृगान् संसृज्य प्रद्युम्नस्य उपरि प्रेषयति। प्रद्युम्नस्तान् सर्वान् निर्भयेन संहरति। अन्ततः शक्तियुतं बाणं सन्धाय शम्बरं लक्ष्यीकृत्य प्रहरति। तेन शम्बरः प्राणान् जहाति। ततः प्रद्युम्नः मायावतीं स्वीकृत्य द्वारकां गच्छति। तत्र प्रजाः सम्भ्रमाश्चर्यचकिताः सन्तः महान्तम् आनन्दम् अनुभवन्ति। रुक्मिणी-श्रीकृष्णयोः समीपं गच्छतः। मायावती-प्रद्युम्नौ सर्वं वृत्तान्तं कथयतः। रुक्मिणी-श्रीकृष्णौ तुष्यतः। मायावती-प्रद्युम्नौ आशीर्भिः वर्धयतः च। (भागवतम् दशमस्कन्धः अध्यायाः १०३-१०८)

१.३. कल्किपुराणाश्रिता रति-प्रद्युम्नयोः पूर्वगाथा :-

रतिः मन्मथस्य भार्या। मन्मथस्य कामः, कामदेवः इत्यादीनि नामान्तराणि सन्ति। प्रकृते कानिचन पुराणानि, इमं मन्मथं (कामं) ब्रह्मणः पुत्रः धर्मः इति, तस्य पुत्रः कामः इति

च वर्णयन्ति। परं कल्किपुराणं रती-मन्मथयोः कथाम् एवं वर्णयति। ब्रह्मा प्रजापतीः सृजति। ततः सन्ध्यानाम्नीं सुन्दरीं स्त्रियं सृजति। सन्ध्यायाः जननानन्तरम् एव, असमानम् आकर्षणीयं च तस्याः सौन्दर्यं दृष्ट्वा, ब्रह्मा-प्रजापतयः सर्वे सम्भ्रमं यान्ति। ब्रह्मा-प्रजापतिषु सर्वेषु एवं सम्भ्रान्तेषु सत्सु तेषां मानसेभ्यः अतिसुन्दरः कश्चन पुरुषः आविर्भवति। सुन्दरपुरुषस्य अस्य पताकायाः चिह्नं मीनः। सः तत्र सभायां ब्रह्माणम् **'पितः! अहं किं करवाणि ? मम उचितं नाम ददातु ? मम कर्म निर्दिशतु ? मम स्थानं निश्चिनोतु ?** इति पृच्छति।

